भीमसेन– यह युद्धरूपी यज्ञ है, क्योंकि–

भीमादि हम चारों लोग इस यज्ञ में ऋत्विक् हैं। भगवान् श्री कृष्ण यहाँ कर्म का उपदेश करने वाले हैं। स्वयं धर्मराज युधिष्ठिर संग्रामरूपी यज्ञ का संकल्प लिए हुए हैं। पत्नी द्रौपदी ने इस यज्ञ का व्रत धारण किया हुआ है। सभी कौरव लोग इसमें पशु हैं। प्रियतमा के पराभवरूप क्लेश का शान्त होना ही इस यज्ञ का फल है। इसीलिए यह कीर्तिरूपी दुन्दुभि राजाओं को आमन्त्रित करने के लिए जोर–जोर से बजाया जा रहा है।।25।।

सहदेव– आर्य! महाराज युधिष्ठिर से आज्ञा प्राप्त हुए, हम इस समय पराक्रम के अनुरूप आचरण करने के लिए जा रहे हैं।

भीमसेन– वत्स! हम लोग भी आर्य युधिष्ठिर की आज्ञा का पालन करने के लिए तैयार ही हैं। (उठकर) तो पांचालि! अब हम कुरुकुल के विनाश के लिए जाते हैं।

द्रौपदी– (आँसुओं को रोकती हुई) हे स्वामिन्! असुरों के साथ युद्ध करने के लिए उद्यत भगवान् विष्णु के समान, आप सभी का मंगल होवे तथा जो माता कुन्ती कामना करती हैं, वह सब भी आप सभी को प्राप्त होवे।

शब्दार्थ– जम्भृते–वृद्धि को प्राप्त हो रहा है, सम्भूतम्–उत्पन्न, अम्बर–वस्त्र, ज्योति–प्रकाश, अग्नि, क्षयाय–नष्ट होने के लिए, स्फीत–जोर से।

उभौ– प्रतिगृहीतं मंगलवचनमस्माभिः।

चेटी– अन्यच्च देवी भणति। नाथ! पुनरपि युष्माभिः समरादागत्याऽहं समाश्वासयितव्या।[1]

भीमसेनः– ननु पांचालराजतनये ! किमद्याप्यलीकाश्वासनया।

भूयः परिभवक्लान्तिलज्जाविधुरिताननम्।
अनिःशेषितकौरव्यं न पश्यसि वृकोदरम्।।26।।

(अन्वय– परिभव–क्लान्ति–लज्जा–विधुरित–आननम् अनिःशेषित–कौरव्यम् वृकोदरम् भूयः न पश्यसि ।।26।।)

द्रौपदी– नाथ! मा खलु याज्ञसेनीपरिभवोद्दीपितकोपानला अनपेक्षितशरीराः संचरिष्यथ। यतोऽप्रमत्तसंचरणीयानि रिपुबलानि श्रूयन्ते।[2]

भीमसेनः– अयि सुक्षत्रिये! समर्था वयमस्मिन् रणे परिक्रमितुम्।

अन्योन्यास्फालभिन्नद्विपरुधिरवसामांसमस्तिष्कपंके
मग्नानां स्यन्दनानामुपरिकृतपदन्यासविक्रान्तपत्तौ।
स्फेतासृक्पानगोष्ठीरसदशिवशिवातूर्यनृत्यत्कबन्धे
संग्रामैकार्णवान्तःपर्याप्त विचरितुं पण्डिताः पाण्डुपुत्राः27

(अन्वय– अन्योन्य–आस्फाल–भिन्न–द्विप–रुधिर–वसा–मांस–मस्तिष्क–पंके, मग्नानाम् स्यन्दनानाम् उपरि–कृत–पदन्यास–विक्रान्त–पत्तौ स्फेत–असृक्–पान–गोष्ठी रसत् अशिव–शिवा–तूर्य–नृत्यत् कबन्धे संग्राम– एकार्णव–अन्तः–पर्याप्त विचरितुम् पाण्डुपुत्राः पण्डिताः (सन्ति)।।27।।)

(इति निष्क्रान्ताः सर्वे)

॥ इति प्रथमोऽङ्कः ॥

---

1 . अण्णं च देवी भणादि। णाह पुणो वि तुम्हेहिं समरादो आअच्छिअ समास्सासइदव्वा।

2 णाह, मा क्खु जण्णसेणी परिहवुद्दीबिदकोबाणला अणवेक्खिदसरीरा संचरिस्सध। जदो अप्पमत्तसंचरणिज्जाइं सुणीअन्ति।

दोनों– हम लोगों ने तुम्हारे मंगलवचनों को स्वीकार कर लिया है।

चेटी– देवी और भी कुछ कह रही हैं कि–'हे नाथ! युद्ध से लौटकर आप मुझे फिर से धीरज बँधाइएगा।'

भीमसेन– निश्चय ही, पांचलराजपुत्रि! अब झूठा आश्वासन देने से क्या लाभ है?

तिरस्कार के दुःख एवं लज्जा से मलिन मुख वाले, कौरवों का विनाश किए बिना भीमसेन को तुम जीवित नहीं देखोगी।।26।।

द्रौपदी– नाथ! याज्ञसेनी के तिरस्कार से उद्दीप्त क्रोधरूपी अग्नि वाले, आप लोग अपने शरीर की लापरवाही करके, युद्धक्षेत्र में विचरण नहीं कीजिएगा, क्योंकि शत्रु की सेनाएँ प्रमाद से रहित होकर ही विचरण करने योग्य सुनी जाती हैं।

भीमसेन– अयि, सुक्षत्राणि! इस युद्धक्षेत्र में विचरण करने में हम लोग समर्थ हैं–

आपस में टकराने से विदीर्ण हुए, हाथियों के रक्त, मेदा, माँस एवं कपाल आदि के कीचड़ में डूबे हुए, रथों के ऊपर पैर रखकर, चलने का पराक्रम प्रदर्शित करने वाली, पैदल सेना वाले, विशाल रक्त पान की गोष्ठियों में चिल्लाती हुई, अमंगलसूचक शृगालियों रूपी तुरहियों द्वारा उछलते हुए, धड़ों वाले संग्रामरूपी प्रमुख समुद्र के जलों के बीच में विचरण करने के लिए, हम पाण्डवपुत्र पूर्णरूप से निपुण हैं।।27।।

(इसप्रकार सभी निकल जाते हैं)

॥ इसप्रकार महाकवि भट्टनारायण विरचित वेणीसंहार के प्रथम अङ्क का डॉ. राकेश शास्त्री, बाँसवाड़ा **द्वारा किया हुआ हिन्दी अनुवाद पूर्ण हुआ॥**

।। श्रीः।।

द्वितीयोऽङ्कः

(ततः प्रतिशति कंचुकी)

कंचुकी– आज्ञापितोऽस्मि महाराजदुर्योधनेन– 'विनयन्धरः सत्वरं गच्छ त्वम्। अन्विष्यतां देवी भानुमती। अपि निवृत्ता अम्बायाः पादवन्दनसमयान्न वेति। यतस्तां विलोक्य निहताभिमन्यवो राधेयजयद्रथप्रभृतयोऽस्मत् सेनापतयः समरभूमिं गत्वा सभाजयितव्याः' इति। यन्मया द्रुततरं गन्तव्यमिति। अहो प्रभविष्णुता महाराजस्य, यन्मम जरसाभिभूतस्य मर्यादामात्रमेवावरोधव्यापारः अथवा किमिति जरामुपा–
लमेय,यतः सर्वान्तः पुरिकाणामयमेव व्यावहारिको वेषश्चेष्टा च। तथाहि–

नोच्चैः सत्यपि चक्षुषीक्षितुमलं श्रुत्वापि नाकर्णितं
शक्तेनाप्यधिकार इत्यधिकृता यष्टिः समालम्ब्यते।
सर्वत्र स्खलितेषु दत्तमनसा यातं मया नोद्धतं
सेवास्वीकृतजीवितस्य जरसा किं नाम यन्मे कृतम्।।1।

(अन्वय– चक्षुषि सति अपि उच्चैः ईक्षितुम् न अलम्, श्रुत्वा अपि न आकर्णितम्, शक्तेन अपि अधिकारः इति अधिकृता यष्टिः सम्–आलम्ब्यते, सर्वत्र स्खलितेषु दत्त–मनसा मया उद्धतम् न यातम् सेवा–स्वीकृत–जीवितस्य मे किम् नाम जरसा, यत् कृतम्।।1।।)

प्रस्तुत अंक में दुर्योधन का कामुक चरित्र उभरकर पाठक के सामने आया है, क्योंकि जहाँ एक ओर युद्ध की घोषणा हो गयी हो, वहीं दूसरी ओर उसका अपनी पत्नी के साथ रंगरेलियाँ मनाने का प्रयास, किसी भी दृष्टि से उचित नहीं कहा जा सकता है।

।। श्रीः ।।

द्वितीय अङ्क

(उसके बाद कंचुकी प्रवेश करता है)

कंचुकी– महाराज दुर्योधन ने मुझे आदेश दिया है कि– 'हे विनयन्धर! तुम शीघ्र जाओ और देवी भानुमती को खोजो, क्या वे माता गान्धारी के चरणवन्दन रूप कार्य से निवृत्त हो गयीं हैं? अथवा नहीं, क्योंकि उन्हें देखकर युद्ध–भूमि में जाकर, मुझे अभिमन्यु का संहार करने वाले, कर्ण और जयद्रथ इत्यादि सेनापतियों का सम्मान भी करना है।' इसलिए मुझे अत्यन्त तीव्र गति से जाना चाहिए। महाराज दुर्योधन का प्रभाव वस्तुतः आश्चर्यजनक है?, जिसके कारण वृद्धावस्था से अभिभूत हुए मेरा अन्तःपुर में ठहरना, मर्यादामात्र ही रह गया है अथवा बुढ़ापे को उलाहना देने से क्या लाभ? क्योंकि अन्तःपुर में रहने वाले, सभी लोगों का यही व्यावहारिक वेष तथा चेष्टाएँ होती हैं, क्योंकि–

नेत्र होते हुए भी अन्तःपुर में उन्हें ऊँचा करके देखने नहीं दिया जाता है, सब कुछ सुनते हुए भी उसे अनसुना करना होता है, समर्थ होते हुए भी छड़ी का सहारा लेकर चलना पड़ता है, सभी प्रकार की त्रुटियों पर ध्यान रखते हुए भी, मेरे द्वारा कभी उद्दण्डतापूर्वक प्रस्थान नहीं किया गया, इसप्रकार सेवा करने मात्र के जीवन को धारण करने वाले, मुझ कंचुकी के लिए वृद्धावस्था ने भला क्या नहीं किया?।।1।।

(परिक्रम्य दृष्ट्वा आकाशे) **विहंगिके अपि श्वश्रूजनपादवन्दनं कृत्वा प्रतिनिवृत्ता भानुमती।** (कर्णं दत्वा) **किं कथयति–आर्य! एषा भानुमती देवी पत्युः समरविजयाशंसया निर्वर्तितगुरुदेवपादवन्दना–ऽद्यप्रभृत्यारब्धनियमा देवगृहे बालोद्याने तिष्ठतीति। तद्भद्रे गच्छ त्वमात्मव्यापाराय यावदहमप्यत्रस्थां देवीं महाराजस्य निवेदयामीति।** (परिक्रम्य) **साधु पतिव्रते साधु स्त्रीभावेऽपि वर्तमाना वरं भवती, न पुनर्महाराजः। योऽयमुद्यतेषु बलवत्सु अथवा कि बलवत्सु वासुदेवसहायेषु पाण्डुपुत्रेष्वरिष्वद्याप्यन्तःपुरविहारसुखमनभुवति।** (विचिन्त्य) **इदमपरम–यथातथं स्वामिनश्चेष्टितम्। कुतः–**

आशस्त्रग्रहणादकुण्ठपरशोस्तस्याऽपि जेता मुने–
स्तापायास्य न पाण्डुसूनुभिरयं भीष्मः शरैः शायितः।
प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो
बालस्यायमरातिलूनधनुषः प्रीतोऽभिमन्योर्वधात्।।2।।

(**अन्वय–** आ–शस्त्र–ग्रहणात् अकुण्ठ–परशोः तस्य अपि मुनेः जेता, अयम् भीष्मः पाण्डु–सूनुभिः शरैः शायितः अस्य तापाय न, प्रौढ़ा–अनेक–धनुर्धर–अरि–विजय–श्रान्तस्य च एकाकिनः अराति–लून–धनुषः बालस्य अभिमन्योः वधात् अयम् प्रीतः।।2।।)

सर्वथा देवं नः स्वस्ति करिष्यति तद्यावदत्रस्थां देवीं महाराजस्य निवेदयामि। (इति निष्क्रान्तः)

(विष्कम्भकः)

(ततः प्रविशत्यासनस्था देवी भानुमती, सखी चेटी च)

सखी– सखि भानुमति, कस्मादिदानीं त्वं स्वप्नदर्शनमात्रस्य कृतेऽभिमानिनो महाराजदुर्योधनस्य महिषी भूत्वैवं विगलितधीरभावातिमात्रं सन्तप्यसे?[1]

---

1. सहि भाणुमदि, कीस दाणिं तुमं सिविण अदंसणमेत्तस्य किदे अहिमाणिणो महाराअदुज्जोहणस्स महिसी अविअ एव्वं विअलिअधीरभावा अति मेत्तं शंतप्पसि।

(घूमकर और आकाश में देखकर) हे विहंगिके! श्वश्रूजनों के चरणों की वन्दना करके, भानुमती क्या लौट आयी हैं? (कान लगाकर) क्या कह रही हो? 'आर्य! यह देवी भानुमती पति के युद्ध–विजय की कामना से, गुरुजनों तथा देवों के पाद–वन्दन से निवृत्त होकर, आज से ही व्रतादि नियमों का पालन करना आरम्भ करके, बालोद्यान में विद्यमान हैं,' तो भद्रे! तुम अपना कार्य करने के लिए जाओ, तब तक मैं भी यहाँ महारानी के स्थित होने की सूचना महाराज दुर्योधन को दे देता हूँ। (घूमकर) साधु, पतिव्रते! स्त्रीभाव होते हुए भी तुम श्रेष्ठ हो, न कि महाराज, जो कि बलवानों अथवा निर्बलों, वासुदेव श्रीकृष्ण का सहयोग प्राप्त करने वाले, पाण्डुपुत्रों से युद्ध हेतु उद्यत होने पर भी अन्तःपुर में विहार करने का सुख अनुभव कर रहे हैं। (विचारकर) महाराज दुर्योधन का यह दूसरा कार्य भी अनुचित है, क्योंकि–

शस्त्र ग्रहण करने के दिन से लेकर, जिनका फरसा कभी कुण्ठित नहीं हुआ, इसप्रकार के पराक्रमी मुनि परशुराम पर भी विजय प्राप्त करने वाले, वे भीष्म, पाण्डुपुत्रों द्वारा बाणों की शय्या पर सुला दिए गए, वह भी इनके सन्ताप का कारण नहीं हुआ, जबकि प्रसिद्ध अनेक धनुर्धारी वीरों को युद्धभूमि में हटाकर थके हुए, अकेले शत्रुओं द्वारा काटे गए, धनुष वाले बालक अभिमन्यु के वध से ये ही महाराज अत्यधिक प्रसन्न हो रहे हैं।।2।।

ऐसा होने पर भी भाग्य हमारा कल्याण करे। इसलिए तब तक यहाँ स्थित देवी भानुमती की सूचना महाराज के प्रति निवेदन करता हूँ। (यह कहकर निकल जाता है)

(विष्कम्भक)

(उसके बाद आसन पर बैठी देवी भानुमती, सखी एवं चेटी प्रवेश करती हैं)

सखी– सखि भानुमति! अभिमानी राजा दुर्योधन की पटरानी होकर भी तुम इस समय स्वप्न देखने मात्र से इसप्रकार धैर्यविहीन होकर, अत्यधिक सन्ताप क्यों कर रही हो?

चेटी– भट्टिनि, शोभनं भणति सुवदना। स्वपंजनः किं न खलु प्रलपति।[1]

भानुमती– हंजे, एवं न्विदं किन्तु एष स्वप्नोऽकुशलदर्शनं मे प्रतिभाति।[2]

सखी– प्रियसखि! यद्येवं तत् कथय स्वप्नं येन आवामपि प्रतिष्ठापयन्त्यौ धर्म्मप्रशंसया देवतानां संकीर्तनेन दूर्वादिपरिग्रहेण च परिहरिष्यामः।[3]

चेटी– शोभनं खलु भणति सुवदना। अकुशलदर्शना अपि स्वप्ना प्रशंसया कुशलपरिणामा भवन्तीति श्रूयते।[4]

भानुमती– यद्येवं तत्कथयिष्ये। अवहिते तावद् भवतम्।[5]

सखी– कथयतु प्रियसखी।[6]

भानुमती– सखि! भयेन विस्मृताऽस्मि, तत्तिष्ठ यावत्सर्वं स्मृत्वा कथयिष्ये।[7] (इति चिन्तां नाटयति)

(ततः प्रविशति दुर्योधनः कंचुकी च)

दुर्योधनः– सूक्तमिदं कस्यचित्।

गुप्त्या साक्षान्महानल्पः स्वयमन्येन वा कृतः।
करोति महतीं प्रीतिमपकारोऽपकारिषु।।3।।

(अन्वय– अपकारिषु गुप्त्या साक्षात् वा महान् अल्पः वा स्वयम् अन्येन वा अपकारः कृतः, महतीम् प्रीतिम् करोति ।।3।।)

---

1. भट्टिणि, सोहणं भणादि सुवअणा। सिविणअन्तो जणो किं ण क्खु प्पलवदि।

2. हंजे, एवं णेदं। किणु एदं सिविणअं अकुसलदंसणं मे पडिभादि।

3. पियसहि! जइ एव्वं ता कधेहि सिविणअं जं अम्बेहि पडिट्ठाव अन्तीओ धमप्पसंसाए देवदाणं संकीत्तणेण दूवादिपडिग्गहेण अ पडिहडिस्सामो

4. सोहणं क्खु भणदि सुबअणा! अकुसलदंसणावि। सिविणआप्पसंसाए कुशल– परिणामा होन्ति त्ति सुणीअदि।

5. जइ एव्वं ता कहइस्सं। अवहिदा दाव होध।

6. कहेदु पिअसही।

7. हला! भएण विसुमरिदह्मि, ता चिट्ठ जाव सव्वं सुमरिअ कहइस्सं।

चेटी– स्वामिनि! सुवदना ठीक ही कह रही है, स्वप्न में व्यक्ति क्या–क्या प्रलाप नहीं करता है?

भानुमती– हंजे! बात तो ऐसी ही है, किन्तु मुझे तो यह स्वप्न अशुभसूचक प्रतीत हो रहा है।

सखी– प्रियसखि! यदि ऐसा है तो तुम अपने स्वप्न को कहो, जिससे हम दोनों भी धार्मिक चर्चाओं द्वारा एवं देवों के संकीर्तन आदि से और दूर्वा आदि मांगलिक वस्तुओं को धारण करके, उस अमंगल को दूर करेंगी।

चेटी– सुवदना निःसन्देह ठीक कह रही है, क्योंकि ऐसा सुनते हैं कि अशुभसूचक स्वप्न भी देवों के संकीर्तन आदि से माँगलिक फल वाले बन जाते हैं।

भानुमती– यदि ऐसा है तो मैं अवश्य कहूँगी, तब तक तुम दोनों सावधान हो जाओ।

सखी– कहिए प्रियसखी।

भानुमती– हे सखि! मैं भय के कारण भूल गयी हूँ, इसलिए थोड़ा ठहरो। जब तक मैं सभी कुछ याद करके कहती हूँ।

(इसप्रकार चिन्तन करने का अभिनय करती है)

(उसके बाद दुर्योधन और कंचुकी प्रवेश करते हैं)

दुर्योधन– यह किसकी कहावत है?

अपकार करने वाले शत्रुओं पर गुप्तरूप से या प्रत्यक्षरूप से, बड़ा अथवा छोटा, स्वयं या फिर दूसरे द्वारा किया गया, अपकार अत्यधिक सन्तोष को उत्पन्न करने वाला होता है।।3।।

शब्दार्थ– प्रलपति–प्रलाप कर रही है, कथय–कहो, प्रतिभाति–प्रतीत हो रहा है, परिहरिष्यामः–दूर करेंगे, शोभनम्–सुन्दर, श्रूयते–सुना जाता है, अवहिते–दोनों सावधान हो जाओ, कथयतु–कहिए, विस्मृता–भूल गयी, अस्मि–हूँ, स्मृत्वा–याद करके, कथयिष्ये–कहूँगी, नाटयति–अभिनय करती है, तिष्ठ–ठहरो, प्रविशति–प्रवेश करती है, गुप्त्या–गुप्तरूप से।

येनाद्य द्रोणकर्णजयद्रथादिभिर्हतमभिमन्युमुपश्रुत्य समुच्छ्वसितमिव नश्चेतसा।

कंचुकी– देव, नेदमतिदुष्करमाचार्यशस्त्रप्रभावात्। कर्णजयद्रथयोर्वा का नामात्र श्लाघा?

राजा– विनयन्धर, किमाह भवान्? एकाकी बहुभिर्बालो लूनशरासनश्च निहत इत्यत्र का श्लाघा कुरुपुंगवानाम्। मूढ, पश्य–

हते जरति गांगेये पुरस्कृत्य शिखण्डिनम्।
या श्लाघा पाण्डुपुत्राणां सैवास्माकं भविष्यति।।4।।

(अन्वय– शिखण्डिनम् पुरस्कृत्य जरति गांगेये हते, पाण्डुपुत्राणाम् या श्लाघा, सा एव अस्माकम् भविष्यति।।4।।)

कंचुकी– (सवैलक्ष्यम्) देव, नैवेदं कल्पयितुमर्हसि। यतस्तव व: पौरुषप्रतिघातोऽस्माभिर्नानलोकितपूर्व, इत्यत एवं विज्ञापयामि।

राजा– एवमिदम्।

सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम्।
स्वबलेन निहन्ति संयुगे न चिरात्पाण्डुसुतः सुयोधनम्।5

(अन्वय– पाण्डु–सुतः स्व–बलेन, सह–भृत्य–गणम्, स–बान्धवम्, सह–मित्रम्, स–सुतम्, सह–अनुजम् सुयोधनम् संयुगे, न चिरात् निहन्ति।।5।।)

कंचुकी– (कर्णौ पिधाय। सभयम्) शान्तं पापम्। प्रतिहतममंगलम्।

राजा– विनयन्धर! किं मयोक्तम्?

कंचुकी–

सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम्।
स्वबलेन निहन्ति संयुगे न चिरात्पाण्डुसुतं सुयोधनः।।6

(अन्वय– सुयोधनः, पाण्डु–सुतम् स्व–बलेन, सह–भृत्य–गणम्, स–बान्धवम्, सह–मित्रम्, स–सुतम्, सह–अनुजम् संयुगे, न चिरात् निहन्ति ।।6।।)

एतद्विपरीतमभिहितं देवेन।

जिसके कारण आज द्रोण, कर्ण, जयद्रथ आदि महारथियों द्वारा अभिमन्यु का मारा जाना, सुनकर मेरा हृदय प्रफुल्लित सा हो रहा है।

कंचुकी– महाराज! द्रोणाचार्य जैसे शस्त्र प्रभाव वालों का यह अभिमन्यु को मारना, अत्यन्त दुष्कर कार्य नहीं है अथवा कर्ण एवं जयद्रथ की इस अभिमन्यु वध में प्रशंसा की क्या बात है?

राजा– विनयन्धर! आपने भला क्या कहा? कि– 'एक ही धनुर्विहीन बालक को अनेक ने मिलकर मार डाला', इसमें कौरवश्रेष्ठों की क्या प्रशंसा है? मूर्ख, जरा देखो–

शिखण्डी को सामने करके, बूढ़े भीष्मपितामह को मारने में, जो प्रशंसा पाण्डवों की थी, वही हमारी भी होगी।।4।।

कंचुकी– (आश्चर्यपूर्वक) महाराज! आपको इसप्रकार की कल्पना नहीं करनी चाहिए, क्योंकि आपका ऐसा पौरुष हम लोगों ने इससे पूर्व कभी नहीं देखा, इसीलिए मैं ऐसा कह रहा हूँ।

राजा– यह ऐसा ही है,

पाण्डुपुत्र अपने बल से, सेवकवर्ग, बान्धववर्ग, मित्रमण्डल एवं पुत्रों तथा छोटे भाइयों के साथ सुयोधन को युद्ध में शीघ्र ही मार डालेंगे।।5।।

कंचुकी– (दोनों कान बन्द करके भयपूर्वक) पाप शान्त हो, अमंगल नष्ट हो।

राजा– विनयन्धर! भला मैंने ऐसा क्या कह दिया?

कंचुकी– पाण्डुपुत्रों को सुयोधन अपने बल से, सेवकवर्ग, बन्धुवर्ग, मित्रमण्डल एवं पुत्रों तथा छोटे भाइयों के साथ युद्ध में शीघ्र ही मार डालेंगे।।6।।

महाराज ने इसका ठीक विपरीत कहा था।

राजा– विनयन्धर, अद्य खलु भानुमती यथापूर्वं मामनामन्त्र्य वासभवनात्प्रातरेव निष्क्रान्तेति व्याक्षिप्तमिव मे मनः। तदादेशय तमुद्देशं यत्रस्था भानुमती।

कंचुकी– इत इतो देवः।

(उभौ परिक्रामतः)

कंचुकी– (पुरोऽवलोक्य। समन्ततो गन्धमाघ्राय) देव, पश्य, पश्य, एतत्तुहिनकणशिशिरसमीरणोद्वेल्लितवृन्तबन्धुरशेफालिकाविरचितकुसुम-प्रकरम्, ईषदालोहितमुग्धवधूकपोलपाटललोध्रप्रसूनविजितश्यामलता-सौभाग्यम्, उन्मीलितबहुलकुन्दकुसुमसुरभिशीतलं प्रभातकालरमणीय-मग्रस्ते बालोद्यानम्। तदवलोकयतु देवः। तथाहि–

प्रालेयमिश्रमकरन्दकरालकोशैः
पुष्पैः समं निपतिता रजनीप्रबुद्धैः।
अर्कांशुभिन्नमुकुलोदरसान्द्रगन्ध–
संसूचितानि कमलान्यलयः पतन्ति।।7।।

(अन्वय– प्रालेय–मिश्र–मकरन्द–कराल–कोशैः रजनी–प्रबुद्धैः पुष्पैः समम् निपतिताः, अलयः अर्कांशु–भिन्न–मुकुल–उदर–सान्द्र–गन्ध–संसूचितानि कमलानि पतन्ति।।7।।)

राजा–(समन्तादवलोक्य) विनयन्धर, इदमपरममुष्मिन्नुषसि रमणी-यतरम् पश्य–

जृम्भारम्भप्रविततदलोपान्तजालप्रविष्टै–
र्हस्तैर्भानोनृपतय इव स्पृश्यमाना विबुद्धाः।
स्त्रीभिः सार्धं घनपरिमलस्तोकलक्ष्यांगरागा
मुंचन्त्येते विकचनलिनीगर्भशय्यां द्विरेफाः।।8।।

(अन्वय–जृम्भ–आरम्भ–प्रवितत–दल–उपान्त–जाल–प्रविष्टैः भानोः हस्तैः स्पृश्यमानाः विबुद्धाः नृपतयः इव, एते द्विरेफाःघन–परिमल–स्तोक–लक्ष्य–अंगरागाः स्त्रीभिः सार्धम् विकच–नलिनी–गर्भ–शय्याम् मुंचन्ति।।8।।)

राजा– विनयन्धर! वस्तुतः आज भानुमती पहले के समान, मुझसे पूछे बिना ही निवास–गृह से प्रातःकाल ही बाहर निकल गयी, इसलिए मेरा हृदय व्याकुल सा हो रहा है। अतः तुम उस स्थान को कहो, जहाँ पर भानुमती स्थित है।

कंचुकी– महाराज, इधर से आइए, इधर से।

(दोनों घूमते हैं)

कंचुकी– (सामने देखकर, चारों ओर सुगन्ध को सूँघकर) महाराज! देखिए, यह ओस के कणों से शीतल वायु द्वारा कँपाए हुए डण्ठलों से ऊँची–नीची शेफालिकाओं द्वारा बना हुआ पुष्पों का समूह, किंचित् गुलाबी लज्जायुक्त सुन्दरियों के कपोलों के समान, श्वेत पुष्पों से पराजित प्रियंगुलता के सौन्दर्य से युक्त, विकसित मौलश्री तथा कुन्द के पुष्पों से सुगन्धित एवं शीतल प्रातःकाल की रमणीयता से सम्पन्न, बालोद्यान आपके सामने है, महाराज इसका अवलोकन करें।

क्योंकि ओस के कणों से मिले हुए, मकरन्द से मुकुलित एवं रात्रि में खिले हुए, पुष्पों के साथ घिरे हुए, भौंरे सूर्य की किरणों से विकसित कलियों की तीखी गन्ध के कारण, ठीकप्रकार ज्ञात होने वाले कमलों पर गिर रहे हैं।।7।।

राजा– (चारों ओर देखकर) विनयन्धर! इस उषःकाल में यह दूसरी रमणीयता है। देखो,

विकसित होना आरम्भ होने पर विकसित पंखुडियों के किनारों रूपी झरोखों से प्रविष्ट होने वाली, सूर्य की किरणों द्वारा छुए जाते हुए, राजाओं के समान ये भौंरे, तीखी गन्ध के कारण थोड़ा–थोड़ा दिखायी देने वाले, अंगरागों वाली अपनी स्त्रियों के साथ विकसित कमलिनी के मध्यभाग रूपी शय्या का परित्याग कर रहे हैं।।8।।

कंचुकी– देव, नन्वेषा भानुमती सुवदनया तरलिकया च पर्युपास्यमाना तिष्ठति। तदुपसर्पतु देवः।

राजा– (दृष्ट्वा) आर्य विनयन्धर, गच्छ त्वं सांग्रामिकं मे रथमुपकल्पयितुम्। अहमप्येष देवीं दृष्ट्वाऽनुपदमागत एव।

कंचुकी– एष कृतो देवादेशः। (इति निष्क्रान्तः)

सखी– प्रियसखी, अपि स्मृतं त्वया।[1]

भानुमती– सखी स्मृतम्।[2]

सखी– कथयतु प्रियसखी।[3]

भानुमती– अद्य किल प्रमदवने आसीनाया ममाग्रत एव केनाऽप्यतिशयितदिव्यरूपेण नकुलेनाहिशतं व्यापादितम्।[4]

उभे– (अपवार्य! आत्मगतम्) शान्तं पापम्। प्रतिहतममंगलम्। (प्रकाशम्) ततस्ततः।[5]

भानुमती– सन्तापावगृहीतहृदयया विस्मृतं मया। तत्पुनरपि स्मृत्वा कथयिष्ये।[6]

राजा– (अवलोक्य) अहो, देवी भानुमती सुवदनातरलिकाभ्यां सह किमपि मन्त्रयमाणा तिष्ठति। भवतु। अनेन लताजालेनान्तरितः शृणोमि तावदासां विश्रम्भालापम्। (इति तथा कृत्वा स्थितः)

सखी– सखि, अलं सन्तापेन। कथयतु प्रियसखी।[7]

---

[1]. पिअसहि, अवि सुमरिदं तुए।

[2]. सहि! सुमरिदम्।

[3]. कहेदु पियसही।

[4]. अज्ज किल पमदवणे आसीणाए मम अग्गदो एव्व केण वि अदिसइद दिव्व–रूवेण णउलेन अहिसदं वावादिदम्।

[5]. सान्तं पावम्। पडिहदं अमंगलं। तदो तदो।

[6]. सन्दावावगहीदहिअआए विसुमरिदं मए। ता पुणोवि सुमरिअ कहइस्सम्।

[7]. सहि अलं संदावेण। कहेदु पिअसही।

कंचुकी– महाराज! सुवदना और तरलिका द्वारा सेवा की जाती हुई, निश्चय ही, ये भानुमती, स्थित हैं, आप इनके पास में चलिए।

राजा– (देखकर) आर्य विनयन्धर! जाओ, तुम मेरा युद्ध वाला रथ तैयार करो। मैं भी महारानी को देखकर अभी आया।

कंचुकी– बस, महाराज का आदेश यह किया।

(यह कहकर निकल जाता है)

सखी– प्रिय सखि! क्या आपको याद आ गया?

भानुमती– सखि! याद आ गया।

दोनों सखियाँ– तो प्रिय सखी कहिए।

भानुमती– निश्चय ही, आज **प्रमदवन** में बैठी हुई मेरे सामने ही, किसी अत्यधिक दिव्य रूपधारी नेवले ने सौ साँपों को मार डाला।

दोनों– (एक ओर मुख करके, मन में) पाप शान्त हो, अमंगल नष्ट हो (प्रकट में) उसके बाद क्या हुआ?

भानुमती– मानसिक वेदना के कारण व्याकुल हुई मैं, फिर से भूल गयी, तो फिर से याद करके कहूँगी।

राजा– (देखकर) अहो, देवी भानुमती, सुवदना एवं तरलिका के साथ कुछ मन्त्रणा कर रही हैं। ठीक है, तब तक इस लतासमूह से छिपकर, इनके विश्वस्त वार्तालाप को सुनता हूँ।

(ऐसा कहकर, वैसा करके स्थित होता है)

सखी– सखि! दुःख से बस कीजिए, प्रियसखी आगे कहिए।

शब्दार्थ– ननु–निश्चय ही, एषा–यह, पर्युपास्यमाना–सेवा की जाती हुई, तिष्ठति–बैठी है, उपसर्पतु–पास जावे, गच्छ–जाओ, उपकल्पितुम्–तैयार करने के लिए, आगतः–आया, कृतः–किया, निष्क्रान्तः–निकल गया, स्मृतम्–याद आया, व्यापादितम्–मार डाला, अग्रतः–सामने, आत्मगतम्–अपने मन में, प्रतिहतम्–विनष्ट हो, प्रकाशम्–प्रकट में, **अपवार्य**–छिपाकर(यह नाट्यसंकेतों में परिगणित पारिभाषिक शब्द है, इसमें मंच पर स्थित अभिनेता तीन अंगुलियों की आड़ में पात्र विशेष से छिपाकर कुछ कहता है, जिसे दर्शक तथा मंच पर स्थित दूसरे पात्र भी सुनते हैं।)

राजा– किं न खल्वस्याः सन्तापकारणम्। अथवाऽनामन्त्र्य मामियमद्य वासभवनान्निष्क्रान्तेति समर्थित एवास्या मया कोपः। अयि भानुमति! अविषयः खलु दुर्योधनो भवत्याः कोपस्य। पश्य–

किं कण्ठे शिथिलीकृतो भुजलतापाशः प्रमादान्मया
निद्राच्छेदविवर्तनेष्वभिमुखी नाद्यासि सम्भाविता।
अन्यस्त्रीजनसंकथालघुरहं स्वप्ने त्वया लक्षितो
दोषं पश्यसि कं प्रिये परिजनोपालम्भयोग्ये मयि।।9।।

(अन्वय– मया कण्ठे प्रमादात् भुज–लता–पाशः शिथिली–कृतः किम्? अद्य निद्रा–च्छेद–विवर्तनेषु अभिमुखी (त्वम्) सम्भाविता न असि? अन्य–स्त्री–जन–संकथा–लघुः अहम् स्वप्ने अपि त्वया न लक्षितः? प्रिये! परिजन–उपालम्भ–योग्ये मयि कम् दोषम् पश्यसि ।।9।।)

(विचिन्त्य)

अथवा।

इयमस्मदुपाश्रयैकचित्ता
मनसा प्रेमनिबद्धमत्सरेण।
नियतं कुपितातिवल्लभत्वात्
स्वयमुत्प्रेक्ष्य ममापराधलेशम्।।10।।

(अन्वय– अस्मत् उपाश्रय–एकचित्ता इयम् प्रेम–निबद्ध–मत्सरेण मनसा अति–वल्लभत्वात् मम अपराध–लेशम् स्वयम् उत्प्रेक्ष्य नियतम् कुपिता।।10।।)

तत्रापि शृणुमस्तावत् किन्नु वक्ष्यतीति।

भानुमती– ततोऽहं तस्यातिशयितदिव्यरूपिणो नकुलस्य दर्शनेनो–त्सुकाजाता हृतहृदया च। तत् उज्झित्वा तदासनस्थानं लतामण्डपं प्रवेष्टुमारब्धा।[1]

---

[1]. हला! तदो अहं तस्स अदिसइददिव्वरुविणो णउलस्स दंसणेण उच्छुआ जादा हिदहिअआ अ। तदो उज्झिअ तं आसणट्ठाणं लदामंडवं पविसिदुं आरद्धा।

राजा– वास्तव में, इसके सन्ताप का क्या कारण है? या फिर यह मुझसे कहे बिना वासभवन से निकल आयी थी, इसकारण मैं क्रुद्ध हो जाऊँगा, यह इन्होंने सिद्ध कर दिया है। हे भानुमति! निश्चय ही, यह दुर्योधन तुम्हारे क्रोध के योग्य नहीं है। देखो,

क्या मैंने तुम्हारे कण्ठ में डाली हुई अपनी भुजलताओं के पाश को उपेक्षापूर्वक ढ़ीला कर दिया है? क्या आज निद्रा के टूटने पर करवटें बदलते समय परस्पर आमने–सामने होने पर आलिंगन आदि न करने का अपराध कर दिया है? अथवा किसी दूसरी स्त्री के साथ प्रेमालाप करते हुए, तुमने मुझे स्वप्न में देख लिया है, जिससे मैं तुम्हारी दृष्टि में तुच्छ हो गया हूँ? हे प्रिये! दास के समान उलाहना देने योग्य मुझमें तुम ऐसा कौन सा अपराध देख रही हो?।।9।।

(चिन्तन करके) अथवा,

एक मात्र मुझमें ही अनुरक्त चित्त वाली यह, प्रेम से उत्पन्न होने वाले क्रोध से युक्त, मन से अत्यधिक प्रेम के कारण, मेरे थोड़े से अपराध को देखकर, निश्चय ही नाराज़ हो गयी है।।10।।

फिर भी जरा सुनते तो हैं कि यह क्या कह रही है?

भानुमती– सखि! उस समय उस अत्यधिक सुन्दर रूप सम्पन्न, नकुल के दर्शन के कारण उत्सुक चित्त वाली मैं पराधीन हो गयी थी और उस स्थान को छोड़कर मैंने लतामण्डप में घुसना आरम्भ कर दिया।

शब्दार्थ– सन्ताप–दुःख, कष्ट, अनामन्त्र्य–आमन्त्रित किए बिना, अद्य–आज, निष्क्रान्ता–निकल गयी, पश्य–देखो, विवर्तनेषु–करवटों के बदलने पर, लक्षितः–देख लिया गया, पश्यसि–देखती हो, मत्सरेण–ईर्ष्या से, उत्प्रेक्ष्य–कल्पना करके, कुपिता –क्रोधित हुई, तत्र–वहाँ, अपि–भी, शृणुमः–सुनते हैं, ततः–उसके बाद, उज्झित्वा–छोड़कर।

राजा– (सवैलक्ष्यम् आत्मगतं) किं नामातिशयितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता हृतहृदया च। तत्किमनया पापया माद्रीसुताऽनुरक्तया वयमेवं विप्रलब्धाः। (सोत्प्रेक्षम्, 'इयमस्मत्–' (2/10) इत्यादि पठित्वा) मूढ दुर्योधन, कुलटाविप्रलभ्यमानमात्मानं (बहुमन्यमानो ऽधुना किं पठित्वा) मूढ दुर्योधन, कुलटाविप्रलभ्यमानमात्मानं बहुमन्यमानो ऽधुना किं वक्ष्यसि। (किं 'कण्ठे' (2/9) इत्यादि पठित्वा दिशोऽवलोक्य) अहो, एतदर्थमेवास्याः प्रातरेव विविक्तस्थानाभिलाषः सखीजनसंकथासु च पक्षपातः। दुर्योधनस्तु मोहादविज्ञातबन्धकीहृदयसारः क्वापि परिभ्रान्तः। आः पापे! मत्परिग्रहपांसुले।

तद्भीरुत्वं तव मम पुरः साहसानीदृशानि
श्लाघा साऽस्मद्वपुषि विनयव्युत्क्रमेऽप्येष रागः।
तच्चौदार्यं मयि जडमतौ चापले कोऽपि पन्थाः
ख्याते तस्मिन्वितमसि कुले जन्म कौलीनमेतत्।।11।।

(अन्वय– मम पुरः तव तत् भीरुत्वम् ईदृशानि साहसानि, अस्मत् वपुषि सा श्लाघा, विनय–व्युत्क्रमे अपि एषः रागः, जड़मतौ मयि तत् च औदार्यम्, चापले कः अपि पन्थाः तस्मिन् ख्याते, वितमसि कुले जन्म, एतत् कौलीनम् ।।11।।)

सखी– ततस्ततः।[1]

भानुमती– ततः सोऽपि मामनुसरन्नेव लतामण्डपं प्रविष्टः।[2]

राजा–(आत्मगतम्) अहो, कुलटोचितमस्याः पापाया अशालीनत्वम्।

यस्मिंश्चिरप्रणयनिर्भरबद्धभाव–
मावेदितो रहसि मत्सुरतोपभोगः।
तत्रैव दुश्चरितमद्य निवेदयन्ती
ह्रीणासि पापहृदये न सखीजनेऽस्मिन्।।12।।

---

1. तदो तदो।
2. तदो सोवि मं अणुसरन्तो एव्व लदामंडवं पविट्ठो।

राजा– (आश्चर्यपूर्वक, मन में) अत्यधिक सुन्दर रूप वाले नकुल के दर्शन से क्या उत्कण्ठित हो गयी? और उस पर मुग्ध हो गयी एवं उस पापी माद्रीपुत्र पर अनुरक्ति से हम इसप्रकार फिर से ठगे गए। (उपहासपूर्वक 'इयमस्मत्' 2/10 इत्यादि श्लोक का उच्चारण करके)

मूर्ख दुर्योधन! इस कुलटा द्वारा धोखा दिए जाने पर स्वयं को धन्य समझता हुआ, तू अब दूसरों के समक्ष क्या कहेगा? (पुनः किं कण्ठे' 2/9 इत्यादि श्लोक पढ़ते हुए, इधर उधर देखकर) अहो! इसी कारण प्रातःकाल ही इसकी एकान्त स्थान पर जाने की इच्छा हुई थी तथा सखियों के साथ वार्तालाप करने का आग्रह भी था। यह दुर्योधन तो मोह के कारण इस कुलटा के मन की बात को जाने बिना ही भ्रम में पड़ा रहा। अरी पापिन्! मेरी निकृष्ट पत्नी!

मेरे सामने इसप्रकार तेरा भीरुपन प्रदर्शित करना और अब इस प्रकार लता के कुँज में अकेले जाने का दुःसाहस करना और हमारे शरीर की उसप्रकार प्रशंसा करना एवं जड़मती मुझमें इसप्रकार की उदारता दिखाना। इसके अलावा उस निर्दोष प्रसिद्ध कुल में जन्म ग्रहण करना एवं इसप्रकार की नीच कुल की स्त्रियों के कर्मों को करना। (ये सभी नितान्त विरुद्ध कार्य हैं)।।11।।

सखी– उसके बाद?

भानुमती– उसके पश्चात् वह भी मेरा अनुसरण करता हुआ लता मण्डप में प्रविष्ट हो गया।

राजा– (मन में) अहो! कुलटाओं के लिए उपयुक्त इस पापिनी का अशालीनत्व वस्तुतः विचित्र है।

हे दुराचारिणि! जिन सखीजनों के मध्य में तुम एकान्त में मेरी रतिक्रीड़ा विषयक व्यापार को चिरकाल से उत्पन्न होने वाले प्रेम की घनता के उत्पन्न होने वाले भाव से, अत्यन्त चाव के साथ कहती थी, वही तुम उसी सखी समुदाय में आज अपना दुराचार कह रही हो, तुम्हें जरा भी लज्जा नहीं आ रही है?।।12।।

(अन्वय– पाप–हृदये यस्मिन् सखी–जने, रहसि मत् सुरत–उपभोगः, चिर–प्रणय–निर्भर–बद्ध–भावम् आवेदितः, तत्र एव अस्मिन् अद्य दुश्चरितम् निवेदयन्ती न ह्रीणासि ।।12।।)

उभे– ततस्ततः।[1]

भानुमती–ततस्तेन सप्रगल्भं प्रसारितकरेणाऽपहृतं मे स्तनांशुकम्।[2]

राजा– (सक्रोधम्) **अलमिदानीमतः परमाकर्णनेन। भवतु, तावत्तस्य परवनितावस्कन्दनप्रगल्भस्य माद्रीसुतहतकस्य जीवितमपहरामि।** (किंचिद् गत्वा। विचिन्त्य) **अथवा इयमेव तावत्पापशीला प्रथममनुशासनीया।**

(इति निवर्तते)

उभे– ततस्ततः।[3]

भानुमती– तत आर्यपुत्रस्य प्रभातमंगलतूर्यरवमिश्रेण वारविलासिनीजनसंगीतरवेण प्रतिबोधिताऽस्मि।[4]

राजा– (सवितर्कम्) **किं नाम प्रतिबोधितास्मीति स्वप्नदर्शनमनया वर्णितं भवेत्।** (विचिन्त्य) **अथवा सखीवचनादेव व्यक्तिर्भविष्यति।**

(उभे सविषादमन्योन्यं पश्यतः)

सुवदना– यत्किमपि अपहितं तद्भागीरथीप्रमुखानां नदीनां सलिलेनापह्रियताम्। ब्राह्मणानामप्याशिषा आहुतिहुतेन प्रज्वलितेन भगवता हुताशनेन च अन्तर्यताम्।[5]

राजा– अलं विकल्पेन। स्वप्नदर्शनमेवैतदनया वर्णितम्। मया पुनर्मन्दधियाऽन्यथैव सम्भावितम्।

---

[1]. तदो तदो।

[2]. तदो तेण सप्पगब्भं प्पसारिअकरेण अवहिदं मे त्थणं सुअम्।

[3]. तदो तदो ।

[4]. तदो अज्ज उत्तस्य पभादमंगलतूररवमिस्सेण वारविलसिणीजणसंगद रवेण पडिबोधिदह्मि।

[5]. जं किम्बि अच्चाहिदं तं भाईरहीप्पमुहाणं णइणं सलिलेण अवहारिअदु। वह्म–णाणं वि आसीसाए आहुदिहुदेण पज्जलिणेण भअवदा हुदासणेण अ अन्तरीअदु हारिअदु।

दोनों सखियाँ– उसके बाद?

भानुमती– फिर उसने धृष्टतापूर्वक हाथ फैलाकर, मेरा स्तनांशुक खींच लिया।

राजा– (क्रोधपूर्वक) इसके पश्चात् अब और कुछ सुनना व्यर्थ है। ठीक है, तब तो उस पराई स्त्री के साथ बलात्कार करने वाले, धृष्ट एवं दुष्ट माद्री के पुत्र नकुल के प्राण ही लिए लेता हूँ। (कुछ दूर जाकर, सोचकर) अथवा इससे से भी पूर्व इसी पापचारिणी को दण्ड देता हूँ। (यह कहकर लौट आता है)

दोनों सखियाँ– उसके बाद?

भानुमती– हे सखि! उसके बाद, आर्यपुत्र के प्रातःकालीन. मंगल वाद्यों की ध्वनि से युक्त, वारविलासिनियों के संगीत के शब्द से मैं जाग गयी।

राजा– (विमर्शपूर्वक) क्या कहा जाग गयी? क्या वास्तव में इसने स्वप्नदर्शन का ही वर्णन किया था। (सोचकर) ठीक है, सखियों के कहने से ही स्पष्ट हो जाएगा।

(दोनों विषादपूर्वक परस्पर देखती हैं)

सुवदना– इस स्वप्न में जो कुछ भी अमंगल है, वह गंगा आदि नदियों के पवित्र जल के स्पर्श से दूर हो जाए और ब्राह्मणों के आशीर्वाद एवं हवन द्वारा प्रज्वलित भगवान् अग्निदेव के द्वारा भस्म हो जाए।

राजा– अब सन्देह करने की आवश्यकता नहीं है। इसने यह स्वप्नदर्शन ही वर्णित किया है, जबकि मन्दबुद्धि वाले, मेरे द्वारा इसे अन्य ही समझ लिया गया।

शब्दार्थ– पापहृदये–पापी हृदय में, रहसि–एकान्त में, ह्रीणासि–लज्जित हो रही हो, न–नहीं, इदानीम्–इस समय, स्तनांशुकम्–आँचल वस्त्र, प्रसारित–फैला हुआ, सप्रगल्भम्–धृष्टतापूर्वक, हतक–नीच, अपहरामि–हरण कर लेता हूँ, पर–दूसरे की, वनिता–स्त्री, अवस्कन्दन–बलात्कार, जोरजबरदस्ती, निवर्तते–लौट आता है।

दिष्ट्यार्धं श्रुतविप्रलम्भजनितक्रोधादहं नो गतो
दिष्ट्या नो पुरुषं रुषाऽर्धकथने किंचिन्मया व्याहृतम्।
मां प्रत्याययितुं विमूढहृदयं दिष्ट्या कथान्तं गता
मिथ्यादूषितयाऽनया विरहितं दिष्ट्या न जातंजगत्।।13

(अन्वय– दिष्ट्या अहम् अर्धम् श्रुत–विप्रलम्भ–जनित–क्रोधात् नो गतः, दिष्ट्या अर्ध–कथने रुषा किंचित् पुरुषम् मया नो व्याहृतम्, दिष्ट्या विमूढ–हृदयम् माम् प्रत्याययितुम् कथा अन्तम् गता, दिष्ट्या मिथ्या–दूषितया अनया जगत् विरहितम् न जातम्।।13।।)

भानुमती– हला, कथय किमत्र प्रशस्तं किं वाऽशुभसूचकमिति।[1]

सखी चेटी च– (अन्योन्यमवलोक्य, अपवार्य) अत्र नास्ति स्तोक–मपि शुभसूचकम्। ततोऽलीकं कथयन्ती प्रियसख्या अपराधिनी भविष्यामि। मे इदानीं स्निग्धो जनो यः पृष्टः परुषमपि हितं भणति। (प्रकाशम्) सखि, सर्वमेवैतदशुभनिवेदनम्। तद् देवतानां प्रणामेन दूर्वादिप्रतिग्रहेण चान्तर्यताम्। न खलु दंष्ट्रिणो नकुलस्य वा दर्शनमहिशतवधं च स्वप्ने प्रशंसन्ति विचक्षणाः।[2]

राजा– अवितथमाह सुवदना। नकुलेन पन्नगशतवधः स्तनांशुका–पहरणं च नियतमनिष्टोदर्कमस्माकं तर्कयामि।

प्रायेणैव हि दृश्यन्ते स्वप्नाः कामं शुभाशुभाः।
शतसंख्या पुनरियं सानुजं स्पृशतीव माम्।।14।।

(अन्वय– कामम् शुभ–अशुभाः स्वप्नाः प्रायेण एव हि दृश्यन्ते, पुनः शत–संख्या इयम् सानुजम् माम् स्पृशति इव।।14।।)

---

1. हला, कहेहि किं एत्थ पसत्थं किं वा असूहसूअअं त्ति।

2. एत्थ णत्थि त्थोअं वि सुहसुअअम्। तदो अलीअं कधअन्ती पिअसहीए अव–राहिणी भविस्सम्। सो दाणी सिणिद्धो जणो जो पुच्छिदो परुसं वि हिदं भणादि। सहि, सव्वं एव एदं असुहणविदेदणम्। ता देव दाणं पणामेण दुब्बादिपडिग्गहेण अ अन्तरीअदु। ण हु दाढिणो णउलस्स वा दंसणं अहिसदवहं अ सिविणए पसंसन्ति विअक्खणाओ।

सौभाग्यवश आधी सुनी हुई उलटी बात के कारण उत्पन्न हुए क्रोध से मैं, माद्रीपुत्र नकुल को मारने के लिए नहीं चला गया। अच्छा ही हुआ कि अधूरी बात में आकर मैंने क्रोधित होकर इसे अपशब्द नहीं कहे, यह भी अच्छा ही हुआ कि मुझ मूर्ख के हृदय को समझाने तथा इसे विश्वास दिलाने के लिए इस कथा का अन्त ही हो गया। इसके अलावा सौभाग्य की बात है कि झूठा दोष लगाने से इस भानुमती से संसार विहीन नहीं हो गया (अर्थात् मैंने इसे मार नहीं दिया)।।13।।

भानुमती– हे सखियों! कहो, कि इसमें क्या प्रशंसनीय है तथा क्या अशुभशूचक है?

सखी और चेटी– (एक दूसरे की ओर देखकर, एक ओर मुख करके) इसमें तो थोडा भी, शुभ की सूचना देने वाला नहीं है, इसलिए असत्य कहकर ही प्रिय सखी की अपराधिनी बनूँगी, किन्तु यदि स्नेही जन से पूछा जाता है तो कठोर होने पर भी हितकर ही कहा जाता है। (प्रकटरूप से) सखि! यह सब तो अशुभ कथन ही है। इसलिए देवों के प्रणाम से एवं दधि, दूर्वा आदि मंगल वस्तुओं के स्पर्श से, इस अमंगल को दूर कीजिए। वास्तव में तो दाढ़ों वाले नेवले अथवा दूसरे किसी को स्वप्न में देखने या फिर सौ साँपों का स्वप्न में मारने को भी विद्वान् लोग अच्छा नहीं बताते हैं।

राजा– सुवदना ने सत्य कहा, वस्तुतः नकुल द्वारा सौ सर्पों का मारा जाना एवं वक्षःस्थल का वस्त्र खींचना, निश्चय ही, अशुभ के सूचक हैं, ऐसा ही हमें भी प्रतीत हो रहा है।

यद्यपि लोगों द्वारा शुभ एवं अशुभ अनेक प्रकार के स्वप्न देखे जाते हैं, किन्तु सौ की यह गिनती तो अनुजों सहित मेरा ही स्पर्श कर रही है।।14।।

शब्दार्थ– दिष्ट्या–सौभाग्य से, अर्धम्–आधा, रुषा–क्रोध से, प्रत्याययितुम्–विश्वास दिलाने के लिए, गता–गयी, जातम्–हुआ, प्रशस्तम्–प्रशंसनीय, हला– अरी सखी, अन्योन्यम्–आपस में, अवलोक्य–देखकर।

(वामाक्षिस्पन्दनं सूचयित्वा) आः! कथं ममापि नाम दुर्योधनस्यानिमित्तानि हृदयक्षोभमावेदयन्ति। (सावष्टम्भम्) अथवा भीरुजनहृदयप्रकम्पनेषु का गणना दुर्योधनस्यैवं विधेषु विषयेषु? गीतश्चायमर्थोऽगिरसा–

ग्रहाणां चरितं स्वप्नोऽनिमित्तान्युपयाचितम्।
फलन्ति काकतालीयं तेभ्यः प्राज्ञा न बिभ्यति।।15।।

(अन्वय– ग्रहाणाम् चरितम्, स्वप्नः, अनिमित्तानि उपयाचितम्, काकतालीयम् फलन्ति, तेभ्यः प्राज्ञाः न बिभ्यति।।15।।)

तद्भानुमत्या स्त्रीस्वभावसुलभामलीकाशंकामपनयामि।

भानुमती– हला सुवदने! पश्य तावदुदयगिरिशिखरान्तरविमुक्तरथवरो विगलितसन्ध्यारागप्रसन्नदुरालोकमण्डलो जातो भगवान् दिवसनाथः।[1]

सखी– सखि, रोषानीतकनककान्तिसदृशेन लताजालान्तरापतितकिरणनिवहेन पिंजरितोद्यानभूमिभागः पूरितप्रतिज्ञ इव रिपुदुष्प्रेक्षणीयो जातो भगवान्सहस्रकिरणः। तत्समयस्ते कुसुमचन्दनगर्भेणाऽर्घेण पर्युपस्थातुम्।[2]

भानुमती– हंजे तरलिके! उपनय मेऽर्घ्यभाजनं यावद्भगवतः सहस्ररश्मेः सपर्यां निर्वर्तयामि।[3]

चेटी– यद्देवी आज्ञापयति। (इति निष्क्रम्य, पुनः प्रविश्य) देवि एतदर्घभाजनम्। तन्निवर्तयतु भगवतः सहस्ररश्मेः सपर्याम्।[1]

---

1. हला सुवअणे पेक्ख दाव उदअगिरिसिहरन्तरविमुक्करहवरो विअलि असंझाराअप्पसण्णदुरालोअमण्डलो जादो भअवं दिवहणाहो।

2. सहि रोसाण्णिअकण्णकन्तिसरिसेण लदाजालन्तरा पडिदकिरणनिवहेण पिंजरिदोज्जाणभूमिभाओ पूरिदपदिण्णो विअरि उदुप्पेक्खणिज्जो जादो भअवं सहस्सकिरणो। ता समओ दे कुसुमचन्दगब्भेण अग्घेणपज्जुवट्– ठादुम्।

3. हंजे तरलिए! उवणेहि मे अग्घभाअणं जाव भअवदो सहस्सरस्सिणो सबरिअं निव्वट्ठेमि।

(बायीं आँख का फड़कना सूचित करके) आः! क्या **अपशकुन** मुझ दुर्योधन के हृदय में भी क्षोभ को उत्पन्न कर रहे हैं। (गर्वपूर्वक) अथवा इसप्रकार के विषयों में डरपोक लोगों के हृदय को प्रकम्पित करने वाले अपशकुनों की गिनती, दुर्योधन के लिए क्या अर्थ रखती है? महर्षि अंगिरा ने इस विषय में कहा भी है कि–

ग्रहों की गति, स्वप्न, अपशकुन एवं दिव्य उत्पात, ये सभी काकतालीय न्याय के अनुसार ही फल प्रदान करते हैं, इसलिए उनसे विद्वान् लोग भयभीत नहीं होते हैं।।15।।

अतः स्त्रीजनों के स्वभाव के अनुरूप भानुमती की इस झूठी शंका को मैं अभी दूर कर देता हूँ।

भानुमती–सखि, सुवदने! देखो तो भगवान् दिवसनाथ, उदयाचल के शिखर के बीच में छोड़े गए, सुन्दर रथ वाले, सन्ध्याकालीन लालिमा के विगलित होने के कारण, अत्यधिक निर्मल प्रकाश के पुँज वाले हो गए हैं।

सखी– सखि! स्वर्ण की कान्ति के समान, अरुणिमा से युक्त लतासमूह के बीच में पड़ने वाले, रश्मिजाल से उद्यान की भूमि को शुभ बताने वाले, शत्रुओं द्वारा दिखायी न देने योग्य, भगवान् सहस्र रश्मि मानो अपनी परिक्रमा पूरी कर चुके हैं। इसलिए पवित्र चन्दन युक्त अर्घ्य द्वारा आपके पूजन करने का समय हो गया है।

भानुमती– सखि, तरलिके! मेरा अर्घ्यपात्र ले आओ, जिससे मैं भगवान् भास्कर की पूजा कर सकूँ।

चेटी– जैसी देवी की आज्ञा **(यह कहकर निकल जाती है, फिर से प्रवेश करके)** स्वामिनि! यह अर्घ्यपात्र है, इसलिए आप भगवान् सहस्ररश्मि की पूजा सम्पन्न कीजिए।

---

[1] . जं देवी आणवेदि। भट्टिनि! एवं अग्घभाअणं। ता ण्बिट्टीअदु भअवदो सहस्स–रस्सिणो सवरिआ।

राजा– अयमेव साधुतरोऽवसरः प्रियासमीपं गन्तुम्।

(इत्युपसर्पति)

सखी– (विलोक्यात्मगतम्) कथं महाराजः समागतः। हन्त! कृतोऽस्याः प्रियसख्या नियमभंगो राज्ञा।[1]

भानुमती– (दिनकराभिमुखीभूय) भगवन् अम्बरमहासरएकसहस्रपत्र, पूर्वदिशावधूमुखमण्डनकुङ्कुमविशेषक, सकलभुवनैकरत्नप्रदीप! अत्र स्वप्नदर्शने यत्किमप्यत्याहितं तद्भगवतः प्रणामेन सभ्रातृकस्याऽऽर्यपुत्रस्य कुशलपरिणामि भवतु। (अर्घ्यं दत्त्वा) हंजे तरलिके! उपनय मे कुसुमानि यावदपरासामपि देवतानां सपर्यां निर्वर्तयामि।[2] (इति हस्तौ प्रसारयति)

(राजा संज्ञया परिजनमुत्सार्य पुष्पाणि स्वयमुपनयति, स्पर्शसुखमभिनीय कुसुमानि भूमौ पातयति च।)

भानुमती– (सरोषम्) अहो! प्रमादः परिजनस्य।[3]

(परिवृत्य राजानमवलोक्य ससाध्वसं लज्जां नाटयति)

राजा– देवि! अनिपुणः परिजनोऽयमेवंविधे सेवावकाशे। तत्प्रभवत्यनुशासने देवी। अयि प्रिये!

विकिर धवलदीर्घापांगसंसर्पि चक्षुः
परिजनपथवर्तिन्यत्र किं सम्भ्रमेण।
स्मितमधुरमुदारं देवि! मामालपोच्चैः
प्रभवति मम पाण्योरंजलिः सेवितुं त्वाम्।।16।।

(**अन्वय–** किम् सम्भ्रमेण परिजन–पथ–वर्तिनि अत्र धवल–दीर्घ–अपांग–संसर्पि चक्षुः विकिर, देवि! माम् स्मित–मधुरम् उदारम् उच्चैः आलप, मम पाण्योः त्वाम् सेवितुम् अंजलिः प्रभवति।।16।।)

---

1. कहं महाराओ समाअदो। हन्त! किदो से पिअसहीए णिअमभंगो रण्णा।

2. भअव! अंबरमहासरेक्कहस्सपत्त! पुव्वदिसाबहूमुहमण्डणकुंकुमविसेसअ, सअलभुवणेक्करअणप्पदीव एत्थ सिबिणअदंसणे जं किं बि अच्चाहिदं तं भअवदो पणामेण सभादुअस्स अज्जउत्तरस कुसलपरिणामि होदु। (अर्घ्य दत्त्वा) हंजे तरलिए! उवणेहि मे कुसुमाइं जाव अवराणं वि देवदाणं सवरिअं णिब्बट्टेमि।

3. अहो प्पमादो परिजनस्य।

राजा– यही प्रिया के पास जाने का उपयुक्त अवसर है।

(ऐसा कहकर आगे बढ़ता है)

सखी– (देखकर, मन में) क्या महाराज आ गए हैं? हाय, तब तो प्रिय सखी का व्रत राजा के द्वारा तोड़ दिया गया है।

भानुमती– (सूर्य की ओर मुख करके) हे भगवन्! आकाशरूपी विशाल जलाशय के प्रमुख कमल! पूर्व दिशारूपी वधू के मुख को अलंकृत करने वाले, कुमकुम के तिलक! सम्पूर्ण भुवन के एकमात्र रत्न प्रदीप! इस स्वप्न–दर्शन में जो भी अमंगल हो, उसे आप श्रीभगवान् के प्रणाम द्वारा भाइयों सहित, आर्यपुत्र के लिए कुशल परिणाम वाला बना दीजिए। (अर्घ्य देकर) हंजे, तरलिके! मेरे लिए पुष्प ले आओ, जिससे मैं दूसरी देवियों की पूजा भी कर लूँ। (यह कहकर हाथ फैलाती है)

(राजा संकेत से परिजनों को हटाकर पुष्प स्वयं ले लेता है और सुख के स्पर्श का अभिनय करके, पुष्पों को भूमि पर गिरा देता है)

भानुमती– (क्रोधपूर्वक) अहो! दासीवर्ग की लापरवाही?

राजा– देवि! आपका यह सेवक इसप्रकार की सेवा करने में निपुण नहीं है। इसलिए देवी मुझे दण्डित करने में समर्थ हैं। अयि प्रिये!

घबराहट से बस करो, सेवकों के मार्ग पर चलने वाले, धवल विशाल अपांग भागपर्यन्त फैले हुए, नेत्रों को मेरी ओर डालो, देवि! मुझसे मन्द मुस्कान युक्त, उदार एवं स्पष्ट शब्दों वाला वार्तालाप करो, मेरे हाथों का अंजलि पुट तुम्हारी सेवा के लिए तत्पर है।।16।।

शब्दार्थ– साधुतरः–सर्वाधिक उपयुक्त, गन्तुम्–जाने के लिए, उपसर्पति–पास जाती है, विलोक्य–देखकर, समागतः–आ गए हैं, हन्त–दुःखसूचक अव्यय, दिनकर–सूर्य, अभिमुखीभूय–की ओर मुख करके, अत्याहितम्–अनिष्ट, भवतु–होवे, उपनय–लाओ, उत्सार्य–हटाकर, उपनयति–ले जाती है, प्रसारयति–फैलाती है, अभिनीय–अभिनय करके, पातयति–गिरा देता है।

भानुमती– आर्यपुत्र, अभ्यनुज्ञातायास्त्वयास्ति मे कस्मिन्नपि नियमेऽभिलाषः।[1]

राजा– श्रुतविस्तार एवास्मि भवत्याः स्वप्नवृत्तान्तं प्रति। तदलमेव प्रकृतिसुकुमारमात्मानं खेदयितुम्।

भानुमती– आर्यपुत्र, अतिमात्रं मां शंका बाधते। तदनुमन्यतां मामार्यपुत्रः।[2]

राजा– (सगर्वम्) देवि, अलमनया शंकया। पश्य–

किं नो व्याप्तदिशां प्रकम्पितभुवामक्षौहिणीनां फलं
किं द्रोणेन किमंगराजविशिखैरेवं यदि क्लाम्यसि।
भीरु! भ्रातृशतस्य मे भुजवनच्छायासुखोपस्थिता
त्वं दुर्योधनकेसरीन्द्रगृहिणी शंकास्पदं किं तव ।।17।।

(अन्वय– यदि एवम् क्लाम्यसि, नः व्याप्त–दिशाम् प्रकम्पित–भुवाम् अक्षौहिणीनाम् किम् फलम्? द्रोणेन किम्? अंगराज–विशिखैः किम्? भीरु! त्वम् मे भ्रातृ–शतस्य भुज–वन–च्छाया–सुख–उपस्थिता दुर्योधन–केसरीन्द्र–गृहिणी, तव किम् शंकास्पदम् ।।17।।)

भानुमती– आर्यपुत्र! नहि किमपि मे शंकाकारणं युष्मासु सन्निहितेषु। किन्त्वार्यपुत्रस्यैव मनोरथसम्पत्तिमभिनन्दामि।[3]

राजा– अयि सुन्दरि! एतावन्त एव मनोरथा यदहं दयितया संगतः स्वेच्छया विहरामीति। पश्य–

प्रेमाऽऽबद्धस्तिमितनयनाऽऽपीयमानाब्जशोभं
लज्जायोगादविशदकथं मन्दमन्दस्मितं वा।
वक्त्रेन्दुं ते नियममुषितालक्तकाग्राधरं वा
पातुं वांछा परमसुलभं किं नु दुर्योधनस्य।।18।।

---

1. अज्जउत्त, अब्भणुण्णादाए तुए अत्थि मे कस्सिं बि णिअमे अहिलासो।
2. अज्जउत्त, अदिमात्तं मे संका बाहेइ। ता अणुमण्णदु मं अज्जउत्तो।
3. अज्जउत्त, ण हि किं बि मे संकाकालणं तुम्हेसु सण्णिहिदेसु। किन्तु अज्जउत्तस्स एव्व मणोरहसंपत्ति अहिणंदामि।

भानुमती– आर्यपुत्र! आपकी आज्ञा लेकर मुझे कोई भी व्रत (नियम) करने की अभिलाषा है।

राजा– मैंने तुम्हारे स्वप्न को विस्तारपूर्वक सुन लिया है। इसलिए स्वभाव से कोमल स्वयं को पीड़ा देने की आवश्यकता नही है।

भानुमती– आर्यपुत्र! मुझे अत्यधिक शंका व्याकुल कर रही है। इसलिए आप मुझे व्रत करने की अनुमति प्रदान कीजिए।

राजा– (गर्वपूर्वक) देवि! शंका करने से बस करो, देखो–

यदि तुम इसप्रकार व्याकुल होती हो, तो दिशाओं को व्याप्त करने वाली, भूमि को कम्पित कर देने वाली, हमारी अक्षौहिणी सेनाओं का क्या फल है? आचार्य द्रोण से क्या लाभ है? हे भीरु! तुम तो सौ भाइयों वाले मुझ दुर्योधन केसरीन्द्र की भुजारूपी वन की छाया में सुख से निवास करने वाली मेरी पत्नी हो, तुम्हारे लिए शंका का भला क्या स्थान है?।।17।।

भानुमती– आर्यपुत्र! आपके समीप होने पर मेरे लिए कोई शंका का स्थान नहीं है, ऐसा करके तो मैं आर्यपुत्र के मनोरथों का ही अभिनन्दन कर रही हूँ।

राजा– अरी, सुन्दरि! मेरी तो केवल इतनी ही कामनाएँ हैं कि मैं प्रिया के साथ स्वेच्छापूर्वक विहार करूँ। देखो,

प्रेम से बँधे हुए निश्चल नेत्रों से तुम्हारे मुख–कमल की शोभा का पान करने वाले, लज्जा के कारण अस्पष्ट वार्तालाप करने वाले, अथवा मन्द–मन्द मुस्कुराने वाले, व्रत का पालन करने के कारण, अलक्तक रस से रहित अधरों से युक्त, दुर्लभ तुम्हारे मुखरूपी चन्द्र का पान करने की मेरी अभिलाषा है, क्योंकि मुझ दुर्योधन के लिए इसके अलावा दूसरी क्या इच्छा हो सकती है, जो मेरे लिए दुर्लभ हो?।।18।।

(**अन्वय**– प्रेम–आबद्ध–स्तिमित–नयन–आपीयमान–अब्ज–शोभम् लज्जा–योगात् अविशद–कथम् वा, मन्द–मन्द–स्मितम् वा, ते नियन्त्र उषित–आलक्तक–अग्र–अधरम् परम् असुलभम् ते वक्त्र–इन्दुम्, पातुम् वांछा, किम् नु दुर्योधनस्य।।18।।)

(नेपथ्ये महान् कलकलः! सर्वे आकर्णयन्ति)

भानुमती– (सभयं राजानं परिष्वज्य) **परित्रायताम् परित्रायतामार्यपुत्रः।**[1]

राजा– (समन्तादवलोक्य) **प्रिये, अलं सम्भ्रमेण। पश्य–**

दिक्षु व्यूढाङ्घ्रिपांगस्तृणजटिलचलत्पांशुदण्डोऽन्तरिक्षे
झांकारी शर्करालः पथिषु विटपिनां स्कन्धकार्षैः सधूमः।
प्रासादानां निकुंजेष्वभिनवजलदोद्गारगम्भीरधीर–
श्चण्डारम्भः समीरो वहति परिदिशं भीरु! किं सम्भ्रमेण।

(**अन्वय**– भीरु! दिक्षु व्यूढ–अङ्घ्रि–पांगः अन्तरिक्षे, तृण–जटिल–चलत्–पांशु–दण्डः, पथिषु झांकारी शर्करालः विटपिनाम् स्कन्ध–कार्षैः सधूमः प्रासादानाम् निकुंजेषु अभिनव–जलद–उद्गार–गम्भीर–धीरः चण्ड–आरम्भः समीरः परि–दिशम् वहति, सम्भ्रमेण किम् ?।।19।।)

सखी– **महाराज, प्रविशतु एनं दारुपर्वतप्रसादम्। उद्वेगकारी खल्वयमुत्थितपरुषरजःकलुषीकृतनयनविदलिततरुवरशब्दविन्नस्त मन्दुरापरिभ्रष्टवल्लभतुरंगमपर्याकुलीकृतजनपद्धतिर्भीषणः समीरणाऽऽसारः।**[2]

राजा– (सहर्षम्) **उपकारि खल्विदं वात्याचक्रं सुयोधनस्य। यस्य प्रसादादयत्नपरित्यक्तनियमया देव्या सम्पादितोऽस्मन्मनोरथः। कथमिति।**

न्यस्ता न भ्रकुटिर्न बाष्पसलिलैराच्छादिते लोचने
नीतं नाननमन्यतः सशपथं नाहं स्पृशन्वारितः।

---

[1]. परित्ताअदु परित्ताअदु अज्जउत्तो।

[2]. महाराअ, पविसदु एदं दारुपव्वअप्पासादम्। उव्वेअकारी क्खु अअं उत्थिद–पस्सरअ कुलसीकिंदणअणो उन्मूलिदतरुवरसद्दवित्तत्थमन्दुरापरिब्भट्ठवल्लहतुलं–गमपज्जाउलीकिदजणपद्धई भीसणो ससीरणासाओ।

(नेपथ्य में महान् कलकल होता है, सभी सुनते हैं)

भानुमती– (भयपूर्वक राजा का आलिंगन करके) आर्यपुत्र! रक्षा कीजिए, रक्षा कीजिए।

राजा– (चारों ओर देखकर) प्रिये! घबराहट से बस करो। देखो,

चारों ओर वृक्षों की शाखाओं को फैला देने वाला, आकाश में घासफूस से युक्त दण्ड के आकार की धूल को उड़ाने वाला, झाँय, झाँय शब्द करता हुआ, मार्गों में रेत तथा कंकड़ों से युक्त, वृक्षों के तनों को परस्पर रगड़ने के कारण, निकलते हुए धुएँ से युक्त, ऊँचे–ऊँचे भवनों के कुँजों में, नए मेघ के समान गम्भीर ध्वनि वाला, हे भीरु! यह भयंकर वायु चारों ओर प्रवाहित हो रहा है, इसमें भयभीत होने की क्या आवश्यकता है?।।19।।

सखी– महाराज! इस दारुपर्वत वाले महल में प्रवेश कीजिए, क्योंकि उद्वेग उत्पन्न करने वाला, धूल को उड़ाकर, नेत्रों को व्याकुल कर देने वाला, उखाड़े गए विशाल वृक्षों के शब्द से व्याकुल हुए घुड़साल के उत्कृष्ट घोड़ों के इधर–उधर भागने के जन–मार्गों को आकुलित कर देने वाला, भयंकर वायु का यह वेग उठ खड़ा हो गया है।

राजा– (प्रसन्नतापूर्वक) यह झंझावात वास्तव में मुझ सुयोधन का उपकार करने वाला है, जिसकी कृपा से बिना प्रयत्न किए ही अपने व्रतरूप नियम को छोड़कर देवी भानुमती ने मेरा मनोरथ पूरा कर दिया है, क्योंकि–

इस तन्वंगी ने न तो भौंहों को टेढ़ा किया, न ही दोनों नेत्रों को अश्रुओं से आच्छादित ही किया और न ही अपने मुख को दूसरी ओर घुमाया तथा मेरा स्पर्श करते हुए, शपथ दिलाकर ऐसा करने से मना भी नहीं किया, अपितु भयवश अपने पयोधरों को वक्षःस्थल पर गड़ा कर आलिंगन करना आरम्भ कर दिया। इसलिए इसके व्रत को तोड़ने वाला, यह भयंकर वायु क्या मेरा मित्र नहीं है?।।20।।

तन्व्या मग्नपयोधरं भयवशादाबद्धमालिंगितं
भङ्क्ताऽस्या नियमस्य भीषणमरुन्नायं वयस्यो नु मे।।20

(**अन्वय–** तन्व्या भ्रुकुटिः न न्यस्ता, बाष्प–सलिलैः लोचने न आच्छादिते, आननम् अन्यतः न नीतम्, स्पृशन् अहम् स–शपथम् न वारितः, भय–वशात् मग्न–पयोधरम् आलिंगितम् आबद्धम्, अस्या नियमस्य भङ्क्ता, अयम् भीषण–मरुत् नु मे वयस्यः।।20।।)

तत्सम्पूर्णमनोरथस्य मे कामचारः सम्प्रति विहारेषु। तदितो दारु–पर्वतप्रासादमेव गच्छामः।

(सर्वे वात्याबाधां रूपयन्तः यत्नतः परिक्रामन्ति)

राजा–

कुरु घनोरु पदानि शनैः शनै–
रयि! विमुंच गतिं परिवेपिनीम्।
सुतनु! बाहुलतोपनिबन्धनं मम
निपीडय गाढमुरःस्थलम्।।21।।

(**अन्वय–** घनोरु! पदानि शनैः शनैः कुरु, अयि! परिवेपिनीम् गतिम् विमुंच, सुतनु! बाहुलता–उप–निबन्धनम् मम उरः स्थलम् गाढम् निपीडय।।21।।)

(प्रवेशं रूपयित्वा) **प्रिये, अलब्धावकाशः समीरणः संवृतत्वाद् गर्भगृहस्य। विश्रब्धमुन्मीलय चक्षुरुन्मृष्टरेणुनिकरम्।**

भानुमती– (सहर्षम्) **दिष्ट्योत्पातसमीरणसारो न बाधते।**[1]

सखी– महाराज! आरोहणसम्भ्रमनिःसहं प्रियसख्या ऊरुयुगलम्। तत्कस्मादिदानीं महाराज आसनवेदीं न भूषयति।[2]

राजा– (देवीमवलोक्य) **भवति! अनल्पमोवाऽपकृतं वात्यासम्भ्रमेण। तथाहि–**

---

[1]. दिट्ठिआ उप्पादसमीरणासारो ण बाधेइ।

[2]. महाराअ! आरोहणसंभमणिस्सहं पिअसहीए ऊरुजुअलं। ता कीस दाणीं महाराओ आसणवेदी ण भूसेदि।

इसलिए मेरा मनोरथ पूरा हो गया है। अब मैं विहार करने में स्वतन्त्र हूँ। इसलिए हम दारुपर्वत वाले महल की ओर ही चलते हैं।

(सभी आँधी की बाधा का अभिनय करते हुए यत्नपूर्वक घूमते हैं)

राजा– हे घनी जँघाओं वाली! अपने कदम धीरे–धीरे रखो, कम्पनयुक्त गति का परित्याग कर दो। हे सुन्दरि! अपनी बाहुलताओं से गलबहियाँ डालकर, मेरे वक्षःस्थल का प्रगाढ़ आलिंगन करो।।21।।

(प्रवेश का अभिनय करके)

प्रिये! दीवारों से घिरे होने के कारण, महल के भीतरी प्रकोष्ठ में वायु को प्रवेश नहीं मिल पा रहा है। इसलिए विश्वासपूर्वक धूल के समूह को पोंछकर अपने नेत्रों को खोल लो।

भानुमती– (प्रसन्नतापूर्वक) सौभाग्य से झंझावातरूपी वायु यहाँ पीड़ित नहीं कर रहा है।

सखी– महाराज! दारुपर्वत पर चढ़ने के कारण प्रिय सखी की दोनों जँघाएँ असह्य पीड़ा का अनुभव कर रही हैं। इसलिए महाराज इस समय आसन वेदी को सुशोभित क्यों नहीं कर रहे हैं?

राजा– (देवी को देखकर) समादरणीया! इस आँधी ने आपको कुछ कम कष्ट नहीं दिया है, क्योंकि–

शब्दार्थ– सम्प्रति–इस समय, कुरु–करो, विमुंच–छोड़ो, निपीडय–दबाओ, अवलोक्य–देखकर, तत्–तो, इसलिए, इतः–इधर, वात्याः–आँधी की, रूपयन्तः–अभिनय करते हुए, परिक्रामन्ति–घूमते हैं, उरु–जँघा, शनैः शनैः–धीरे–धीरे, परि–वेपिनीम्–कम्पन करने वाली, सुतनु–तन्वंगि!, उन्मीलय–खोल दो, विश्रब्धम्–विश्वासपूर्वक, निश्चिन्त होकर, उन्मृष्ट–पोंछकर, रेणुनिकरम्–धूल के समूह को, सहर्षम्–हर्षपूर्वक, बाधते–बाधित नहीं कर रहा है, भूषयति–सुशोभित कर रहे हैं, अपकृतम्–अपकार, कष्ट को।

रेणुर्बाधां विधत्ते तनुरपि महतीं नेत्रयोरायतत्त्वा–
दुत्कम्पोऽल्पोऽपि पीनस्तनभरितमुरः क्षिप्तहारं दुनोति।
ऊर्वोर्मन्देऽपि याते पृथुजघनभराद्वेपथुर्वर्धतेऽस्या
वात्याखेदं मृगाक्ष्याः सुचिरमवयवैर्दत्तहस्ताकरोति।।22।।

(अन्वय– तनुः अपि रेणुः अस्याः नेत्रयोः आयतत्त्वात् महतीम् बाधाम् विधत्ते, अल्पः अपि उत्कम्पः पीन–स्तन–भरितम् उरः क्षिप्त–हारम् दुनोति, मन्दे अपि याते पृथु–जघन–भरात् ऊर्वोः वेपथुः वर्धते, मृगाक्ष्याः अवयवैः दत्तहस्ता वात्या सुचिरम् खेदम् करोति।।22।।)

(सर्वे उपविशन्ति)

राजा– तत्किमित्यनास्तीर्णं कठिनशिलातलमध्यास्ते देवी। यतः–

लोलांशुकस्य पवनाकुलितांशुकान्तं
त्वद्दृष्टिहारि मम लोचनबान्धवस्य।
अध्यासितुं तव चिरं जघनस्थलस्य
पर्याप्तमेव करभोरु! ममोरुयुग्मम्।।23।।

(अन्वय– करभोरु! पवन–आकुलित–अंशु–कान्तम् त्वत् दृष्टि–हारि मम उरु–युग्मम् लोल–अंशुकस्य मम लोचन–बान्धवस्य तव जघन–स्थलस्य चिरम् अध्यासितुम् पर्याप्तम् एव।।23।।)

(प्रविश्य पटाक्षेपेण सम्भ्रान्तः)

कंचुकी– देव, भग्नं भग्नम्।

(सर्वे साकूतं पश्यन्ति)

राजा– केन?

कंचुकी– देव! भीमेन।

राजा– कस्य?

कंचुकी– भवतः।

राजा– आः, किं प्रलपसि?

भानुमती– आर्य, किमनर्थं मन्त्रयसे।[1]

---

[1] . अज्ज, किं अणत्थं मन्तेसि।

दोनों नेत्रों के बड़े–बड़े होने के कारण धूलि के छोटे कण भी अत्यधिक बाधा उत्पन्न कर रहे हैं। थोड़ा सा कम्पन भी स्थूल स्तनों के कारण भारी वक्षःस्थल को हार पहनने पर कष्ट पहुँचा रहा है। इसीप्रकार धीरे चलने पर भी विशाल जघनभार से दोनों जँघाओं में कम्पन बढ़ रहा है। अतः इस मृगनयनी के अंगों का अवलम्ब प्राप्त करके, यह झंझावात बहुत देर तक खेद उत्पन्न कर रहा है।।22।।

(सभी बैठते हैं)

राजा– तो क्या देवी भानुमती कठोर शिलातल पर बिना कुछ बिछाए ही बैठ गयी हैं?

हे करभोरु! वायु से हिलते हुए वस्त्र के छोर वाली, तुम्हारी दृष्टि को आकर्षित करने वाली, मेरी दोनों जँघा, चंचल वस्त्रों वाले मेरे, दोनों नेत्रों को आकृष्ट करने वाले, तुम्हारे दोनों जघन स्थलों का चिरकाल तक सेवन करने के लिए पर्याप्त हैं।।23।।

(पर्दा हटाकर प्रवेश करके घबराहट के साथ)

कंचुकी– महाराज! टूट गया, टूट गया।

(सभी भयपूर्वक देखते हैं)

राजा– किसने तोड़ दिया?

कंचुकी– महाराज! भीमसेन ने तोड़ दिया।

राजा– किसका?

कंचुकी– आपका।

राजा– आः! कैसा प्रलाप कर रहे हो?

भानुमती– आर्य! अनर्थ क्यों सोच रहे हो?

शब्दार्थ– आयतत्त्वात्–विशाल होने से, महतीम्–अत्यधिक, विधत्ते–धारण कर रहा है, उत्कम्पः–कम्पन, दुनोति–पीड़ित कर रहा है, वेपथुः–कम्पन, वर्धते–बढ़ रहा है, उपविशन्ति–बैठते हैं, यतः–क्योंकि, करभोरु–करभ के समान उरु वाली, (करभ–हाथ में अँगूठे सहित नीचे के भाग अथवा केले के तने को कहते हैं, कवियों ने स्त्री की जँघा की उपमा के लिए इसे उपमानरूप में ग्रहण किया है।)

राजा– धिक्प्रलापिन्! वृद्धापसद! कोऽयमद्य ते व्यामोहः?

कंचुकी– देव! न खलु कश्चिद्व्यामोहः। सत्यमेव ब्रवीमि।

भग्नं भीमेन भवतो मरुता रथकेतनम्।
पतितं किंकिणीक्वाणबद्धाक्रन्दमिव क्षितौ।।24।।

(अन्वय– भीमेन मरुता भवतः रथ–केतनम् भग्नम्, किंकिणी–क्वाण–बद्ध–आक्रन्दम् इव क्षितौ पतितम् ।।24।।)

राजा– यदि बलवत्समीरणवेगात्कम्पिते भुवने भग्नः स्यन्दकेतुः। तत्किमित्युद्धतं प्रलपसि 'भग्नं भग्नमि' ति।

कंचुकी– देव! न किंचित्। किन्तु 'शमनार्थमस्याऽनिमित्तस्य विज्ञापयितव्यो देवं इति स्वामिभक्तिर्मां मुखरयति।

भानुमतीः–आर्यपुत्र! परिहार्यतामेतदनिमित्तं प्रसन्नब्राह्मणवेदा–नुघोषेण होमेन च।[1]

राजा– (सावज्ञम्) ननु गच्छ। पुरोहितसुमित्राय निवेदय!

कंचुकी– यदाज्ञापयति देवः। (इति निष्क्रान्तः)

(प्रविश्य)

प्रतीहारी– (सोद्वेगमुपसृत्य) जयतु जयतु महाराजः। महाराज! एषा खलु जामातुः सिन्धुराजस्य माता दुःशला च प्रतीहारभूमौ तिष्ठतः।[2]

राजा– (किंचिद्विचिन्त्यात्मगतम्) किं 'जयद्रथमाता दुःशला चे'ति। कच्चिदभिमन्युवधामर्षितैः पाण्डुपुत्रैर्न किंचिदत्याहितमाचेष्टितं भवेत्। (प्रकाशम्) गच्छ, प्रवेशय शीघ्रम्।

प्रतीहारी– यन्महाराज आज्ञापयति।[3]

(इति निष्क्रान्ता)

(ततः प्रविशति सम्भ्रान्ता जयद्रथमाता दुःशला च)

---

1. अज्जउत्त! पडिहरीअदु एदं अणिमित्तं पस्सण्णबह्मणवेआणुघोसेण होमेण अ।

2. जअदु जअदु महाराओ। महाराअ! एसा क्खु जामादुणो सिन्धुराअस्स मादा दुस्सला अ पडिहारभूमीए चिट्ठदि।

3. जं महाराओ आणवेदि।

राजा– हे व्यर्थ प्रलाप करने वाले! तुम्हें धिक्कार है। नीच वृद्ध! आज तेरी बुद्धि का यह कैसा व्यामोह है?

कंचुकी– महाराज! निश्चय ही, कोई बुद्धि का व्यामोह नहीं है। मैं सत्य ही कह रहा हूँ।

भयंकर वायु ने आपके रथ की ध्वजा को तोड़ दिया है और वह बजती हुई छोटी–छोटी घण्टियों की ध्वनि के समान क्रन्दन करती हुई, भूमि पर गिर गयी है।।24।।

राजा– यदि बलवान् वायु के वेग से, तीनों भुवनों को कँपा देने से, रथ की पताका टूट गयी है, तो इसप्रकार उद्धत प्रलाप क्यों कर रहा है? टूट गयी, टूट गयी।

कंचुकी– महाराज! अन्य कुछ नहीं, किन्तु 'इस अपशकुन के शमन के लिए मुझे आपको कह देना चाहिए,' यह स्वामी–भक्ति ही मुझे बोलने के लिए प्रेरित कर रही है।

भानुमती– आर्यपुत्र! यह अपशकुन, ब्राह्मणों को दान आदि से प्रसन्न करके, वेद–पाठादि से और होम द्वारा दूर कर दीजिए।

राजा– (तिरस्कारपूर्वक) निश्चय ही, तुम जाओ और पुरोहित सुमित्र से इसे निवेदन करो।

कंचुकी– महाराज की जैसी आज्ञा।

(यह कहकर निकल जाता है) (प्रवेश करके)

प्रतीहारी– (घबराहट के साथ पास जाकर) जय हो, महाराज की जय हो। महाराज! ये दामाद सिन्धुराज जयद्रथ की माता तथा पत्नी दुःशला सिंहद्वार पर स्थित हैं।

राजा– (कुछ सोचकर मन में) क्या जयद्रथ माता और दुःशला आयी हैं? कहीं अभिमन्यु के वध के कारण क्रुद्ध पाण्डवों ने कुछ अनर्थ तो नहीं कर दिया है। (प्रकट में) जाओ, शीघ्र प्रवेश कराओ।

प्रतीहारी– जैसी महाराज की आज्ञा।

(यह कहकर निकल जाती है)

(उसके बाद घबरायी हुई जयद्रथ की माता तथा दुःशला प्रवेश करती है)

(उभे सास्रं दुर्योधनस्य पादयोः पततः)

माता– परित्रायतां परित्रायतां कुरुनाथः।[1]

(दुःशला रोदिति)

राजा– (ससम्भ्रममुत्थाप्य) अम्ब! समाश्वसिहि, समाश्वसिहि। किमत्याहितम्। अपि कुशलं समरांगणेष्वप्रतिरथस्य जयद्रथस्य?

माता– जात, कुतः कुशलम्।[2]

राजा– कथमिव?

माता– (साशंकम्) अद्य खलु पुत्रवधामर्षोद्दीपितेन गाण्डीविना–ऽनस्तमिते दिवसनाथे तस्य वधः प्रतिज्ञातः।[3]

राजा–(सस्मितम्) इदं तदश्रुकारणमम्बाया दुःशलायाश्च। पुत्रशोकादुत्तप्तस्य किरीटिन प्रलपितेरेवमवस्था। अहो मुग्धत्वमबलानां नाम। अम्ब, कृतं विषादेन। वत्से दुःशले! अलमश्रुपातेन। कुताश्चाऽयं तस्य धनंजयस्य प्रभावो दुर्योधनबाहुपरिघरक्षितस्य महारथजयद्रथस्य विपत्तिमुत्पादयितुम्।

माता– जात, जात! ते हि पुत्रबन्धुवधामर्षोद्दीपितकोपानला अनपेक्षितशरीरा वीराः परिक्रामन्ति।[4]

राजा– (सोपहासम्) एवमेतत्। सर्वजनप्रसिद्धैवामर्षिता पाण्डवा–नाम्। पश्य–

हस्ताकृष्टविलोलकेशवसना दुःशासनेनाज्ञया
पांचाली मम राजचक्रपुरतो गौर्गौरिति व्याहृता।
तस्मिन्नेव स किं नु गाण्डीवधरो नासीत्पृथानन्दनो
यूनः क्षत्रियवंशजस्य कृतिनः क्रोधास्पदं किं न तत्।।25

---

1. पडित्ताअदु पडित्ताअदु कुलुणाहो।
2. जाद, कुदो कुसलम्।
3. अज्ज क्खु पुत्तवहामरिसुद्दीबिदेण गाण्डीविणा अणत्थमिदे दिवहणाहे तस्स वहो पडिण्णादो।
4. जाद, जाद! दे हि पुत्तबन्धुवहामरिसुद्दीविदकोबाणला अणपेक्खिदसरीरा वीरा परिक्कामन्ति।

(दोनों ही अश्रुओं के साथ दुर्योधन के पैरों में गिर जाती हैं)

माता– हे कौरवों के स्वामी! रक्षा कीजिए, रक्षा कीजिए।

(दुःशला रोती है)

राजा– (घबराहट के साथ उठकर) हे माता! धैर्य धारण कीजिए, धैर्य धारण कीजिए। क्या अनिष्ट हो गया है? क्या युद्ध के मैदान में अद्वितीय महारथी जयद्रथ का कुशल तो है?

माता– हे पुत्र! भला कुशल कहाँ है?

राजा– वह क्यों भला?

माता– (आशंकापूर्वक) वस्तुतः आज ही पुत्रवध से क्रुद्ध होकर, गाण्डीव धनुर्धारी अर्जुन ने सूर्यास्त से पूर्व उस जयद्रथ के वध की प्रतिज्ञा की है।

राजा– (मन्द मुस्कानपूर्वक) तो माता और दुःशला के अश्रुओं का यह कारण है। पुत्रशोक से अत्यधिक व्याकुल हुए, किरीटी के प्रलापों से ही आपकी यह दशा हुई है। वस्तुतः अबलाओं का भोलापन धन्य है। माता! विषाद से बस करो। पुत्रि दुःशले! अश्रुपात से बस करो, क्योंकि इस धनंजय की सामर्थ्य, दुर्योधन की भुजारूपी कृपाण से रक्षा किए गए, जयद्रथ के लिए विपत्ति उत्पन्न करने की भला कैसे हो सकती है?

माता– पुत्र, हे पुत्र! क्योंकि उद्दीप्त क्रोधानल वाले, वे पाण्डव वीरपुत्र बन्धुओं के मारे जाने के कारण, अपने शरीरों की परवाह किए बिना युद्ध के मैदान में इधर–उधर घूम रहे हैं।

राजा– (उपहासपूर्वक) तो ऐसा है। पाण्डवों का क्रोध करना तो सभी लोगों में प्रसिद्ध है। देखो,

मेरी आज्ञा से दुःशासन ने अपने हाथों से द्रौपदी के केश तथा वस्त्रों को खींचा था और राजसमूह के सामने मैं गाय हूँ, मैं गाय हूँ। उसने इसप्रकार कहा था। उस अवसर पर क्या गाण्डीव धनुष को धारण करने वाला ,पृथापुत्र अर्जुन वहाँ नहीं था। क्षत्रिय वंश में उत्पन्न युवा पुत्र के क्रोध के लिए क्या इतना पर्याप्त नहीं था।।25।।

(अन्वय– मम आज्ञया दुःशासनेन हस्त–आकृष्ट–विलोल–केश–वसना पांचाली, राज–चक्र–पुरतः, गौः, गौः, इति व्याहृता, तस्मिन् गाण्डीव–धरः पृथा–नन्दनः एव सः किम् नु न आसीत्? यूनः कृतिनः क्षत्रिय–वंशजस्य तत् क्रोध–आस्पदम् न किम्? ।।25।।)

माता– असमाप्तप्रतिज्ञाभरेणात्मवधस्तेन प्रतिज्ञातः।[1]

राजा– यद्येवमलमानन्दस्थानेऽपि ते विषादेन। ननु वक्तव्यमुत्सन्नः सानुजो युधिष्ठिर इति। अन्यच्च मातः! का शक्तिरस्ति धनंजयस्याऽन्यस्य वा कुरुशतपरिवारवर्धितमहिम्नः कृपकर्णद्रोणाश्वत्थामादि–महारथपराक्रमद्विगुणीकृतनिरावरणविक्रमस्य नामाऽपि ग्रहीतुं ते तनयस्य। अयि सुतपराक्रमाऽनभिज्ञे!

> **धर्मात्मजं प्रति यमौ च कथैव नास्ति**
> **मध्ये वृकोदरकिरीटभृतोर्बलेन।**
> **एकोऽपि विस्फुरितमण्डलचापचक्रं**
> **कः सिन्धुराजमभिषेणयितुं समर्थः।।26।।**

(अन्वय– धर्मात्मजम्, यमौ च प्रति कथा एव न अस्ति, वृकोदर–किरीट–भृतोः मध्ये एकः अपि कः विस्फुरित–मण्डल–चाप–चक्रम् सिन्धुराजम् बलेन अभिषेणयितुम् समर्थः? ।।26।।)

भानुमती– आर्यपुत्र! यद्यप्येवं तथापि 'गुरुकृतप्रतिज्ञाभार' इति स्थानं खलु शंकायाः।[2]

माता– जाते! साधु, कालोचितं त्वया मन्त्रितम्।[3]

राजा– आः ममाऽपि नाम दुर्योधनस्य शंकास्थानं पाण्डवाः। पश्य–

> **कोदण्डज्याकिणांकैरगणितरिपुभिः कंकटोन्मुक्तदेहैः**
> **शिलष्टान्योन्यातपत्रैः सितकमलवनभ्रान्तिमुत्पादयद्भिः।**
> **रेणुग्रस्तार्कभासां प्रचलदसिलतादन्तुराणां चमूना–**
> **माक्रान्ता भ्रातृभिर्मे दिशि समरे कोटयः सम्पतन्ति।।।27**

(अन्वय– कोदण्ड–ज्या–किणांकैः अगणित–रिपुभिः कंकट–उन्मुक्त–देहैः शिलष्ट–अन्योन्य–आतपत्रैः सित–कमलवन–भ्रान्तिम्,

---

1. असमत्तसपडिण्णाभरेण अप्पवहो तेण पडिण्णादो।
2. अज्ज उत्त, जहबि एव्वं तहबि 'गुरुकिदपडिण्णाभारोह्लाणं' क्खु संकाए।
3. जादे साहु, कालोइदं तुए मंदिदं।

माता– प्रतिज्ञा पूर्ण न कर पाने पर, उसने अपना वध करने का संकल्प किया है।

राजा– यदि ऐसा है तो आनन्द के स्थान पर तुम्हें दुःखी नहीं होना चाहिए। तुम्हें तो यही कहना चाहिए कि अपने अनुजों के साथ युधिष्ठिर नष्ट हो गए। हे माता! दूसरी बात यह भी है कि सौ कौरवों के परिवार वालों से जिसकी महिमा बढ़ी हुई है, ऐसे कृपाचार्य, कर्ण और द्रोणाचार्य जैसे महारथियों के पराक्रम से दुगनी बढ़ी हुई शक्ति द्वारा पराक्रम के आवरण को भी छिन्न–भिन्न कर देने वाले, तुम्हारे पुत्र जयद्रथ को मारने की तो बात ही क्या, उसका नाम तक भी ले पाने में वे समर्थ नहीं हैं। हे अपने पुत्र के पराक्रम को न जानने वाली!

युधिष्ठिर, नकुल, सहदेव का तो कहना ही क्या? वृकोदर तथा किरीटी के बीच में से भी कोई इतना समर्थ नहीं है कि जो चंचल वर्तुलाकार धनुष से युक्त, सिन्धुराज जयद्रथ के बल के सामने, युद्ध करने में समर्थ हो सके।।26।।

भानुमती– आर्यपुत्र! यद्यपि ऐसा ही है फिर भी दृढ़ प्रतिज्ञा करने वाले धनंजय निश्चय ही सन्देह के योग्य हैं।

माता– पुत्रि! तुमने ठीक और समयोचित कहा है।

राजा– आः! क्या मुझ दुर्योधन के लिए भी पाण्डव शंका के स्थान हैं? देखो,

युद्ध करते रहने से धनुष की डोरी को खींचने के कारण, जिनके गड्ढे पड़ गए हैं, जो असंख्य शत्रुओं से भी डरते नहीं हैं, जो कवच से शरीर को ढ़के हुए हैं, युद्ध की यात्रा में, जिनके छत्र परस्पर टकराने के कारण, शुभ्र कमलवन होने का भ्रम उत्पन्न कर देते हैं, ऐसे मेरे भाइयों से युक्त, उठी हुई धूलि से सूर्य के तेज को आच्छादित करने वाली, चलती हुई असिलताओं से ऊँची–नीची सेनाओं की श्रेणियाँ, चारों ओर से घिरी हुई होने पर भी, प्रत्येक दिशा में चारों ओर गिर रही हैं।।27।।

उत्पादयद्भिः, मे भ्रातृभिः रेणु–ग्रस्त–अर्क–भासाम् प्रचलत् असि–लता-दन्तुराणाम् चमूनाम् कोटयः समरे आक्रान्ताः दिशि सम्पतन्ति।।27)

अपि च भानुमति! विज्ञातपाण्डवप्रभावे, किन्त्वमप्येवमाशंकसे। पश्य–

दुःशासनस्य हृदयक्षतजाऽम्बुपाने
दुर्योधनस्य च यथा गदयोरुभंगे।
तेजस्विनां समरमूर्धनि पाण्डवानां
ज्ञेया जयद्रथवधेऽपि तथा प्रतिज्ञा।।28।।

(अन्वय– तेजस्विनाम् पाण्डवानाम् समर–मूर्धनि दुःशासनस्य हृदय–क्षतजा–अम्बु–पाने गदया दुर्योधनस्य च उरु–भंगे यथा प्रतिज्ञा तथा जयद्रथ–वधे अपि ज्ञेया।।28।।)

कः कोऽत्र भोः! जैत्रं मे रथमुपकल्पय तावत्। यावदहमपि तस्य प्रगल्भपाण्डवस्य जयद्रथपरिरक्षणेनैव मिथ्याप्रतिज्ञावैलक्ष्यसम्पादितम्-शस्त्रपूतं मरणमुपदिशामि।

(प्रविश्य)

कंचुकी– देव!

उद्घातक्वणितविलोलहेमघण्टः
प्रालम्बद्विगुणितचामरप्रहासः।
सज्जोऽयं नियमितवल्गिताकुलाश्वः
शत्रूणां क्षपितमनोरथो रथस्ते।।29।।

(अन्वय– उद्घात–क्वणित–विलोल–हेम–घण्टः, प्रालम्ब–द्विगुणित–चामर–प्रहासः, नियमित–वल्गित–आकुलाश्वः, शत्रूणाम् क्षपित-मनोरथः, अयम् ते रथः सज्जः।।29।।)

राजा– देवि! प्रविश त्वमभ्यतरमेव।

(यावदहमपि तस्य प्रगल्भस्य पाण्डवस्य' इत्यादि पठन् परिक्रामति)

(इति निष्क्रान्ताः सर्वे)

॥ इति द्वितीयोऽङ्कः ॥

और भी, पाण्डवों के प्रभाव को जानने वाली, हे भानुमति! तुम भी इसप्रकार की आशंका क्यों कर रही हो? देखो,

तेजस्वी पाण्डवों द्वारा युद्धभूमि में दुःशासन के वक्षःस्थल को विदीर्ण करके, खून पीने और गदा द्वारा दुर्योधन की जँघा को तोड़ने में जिसप्रकार की प्रतिज्ञा की गयी थी, वैसी ही प्रतिज्ञा जयद्रथ वध में भी तुम्हें समझनी चाहिए।।28।।

अरे! यहाँ कौन है? जरा मेरा विजयी–रथ तैयार करो, तब तक मैं भी उस धृष्ट पाण्डुपुत्र अर्जुन की प्रतिज्ञा को, जयद्रथ की रक्षा करके प्रतिज्ञा के झूठा हो जाने पर लज्जा के कारण की जाने वाली अस्त्रहीन मृत्यु के लिए कहूँ।

(प्रवेश करके)

कंचुकी– महाराज,

आघातों के कारण बज रही, चंचल सोने की घण्टियों वाला, लटकने के कारण दुगुने चामर के प्रकाश से युक्त, नियन्त्रित किए जाने से विशेष गति के कारण व्याकुल घोड़ों वाला, शत्रुओं के मनोरथों को नष्ट करने वाला, आपका यह रथ तैयार है।।29।।

राजा– हे देवि! तुम अन्दर जाओ।

(यावदहमपि तस्य प्रगल्भस्य पाण्डवस्य' इत्यादि पूर्व वाक्य को पढ़ते हुए घूमता है)

(इसप्रकार सभी निकल जाते हैं)

॥ इसप्रकार महाकवि भट्टनारायण विरचित वेणीसंहार के द्वितीय अङ्क का डॉ. राकेश शास्त्री, बाँसवाड़ा **द्वारा किया हुआ हिन्दी अनुवाद पूर्ण हुआ॥**

।श्रीः।।

तृतीयोऽङ्कः

(ततः प्रविशति विकृतवेषा राक्षसौ)

राक्षसी– (विकृतं विहस्य। सपरितोषम्)

हतमानुषमांसशोणितैः कुम्भसहस्रं वसाभिः संचितम्।
अनिशं च पिबामि शोणितं समरं वर्षशतं भवतु।।1।।[1]

(अन्वय– हत–मानुष–मांस–शोणितैः, वसाभिः संचितम् कुम्भ-सहस्रम् अनिशम् शोणितम् पिबामि, समरम् च वर्ष–शतम् भवतु।।1।।)

(नृत्यन्ती सपरितोषम्) **यदि सिन्धुराजवधदिवस इव दिवसे दिवसे समरकर्म प्रतिपद्यतेऽर्जुनस्ततः पर्याप्तभरितकोष्ठागारं मांसशोणितैर्मे गृहं भविष्यति।** (परिक्रम्य दिशोऽवलोक्य) **अथ क्व खलु गतो मे रुधिरप्रियो भविष्यति। तद्यावदस्मिन् समरे प्रियं भर्त्तारं रुधिरप्रियमन्विष्ये।** (परिक्रम्य) **भवतु। शब्दापयिष्ये तावत्। अरे! रुधिरप्रिय! रुधिरप्रिय! इत एहि।**[2]

(ततः प्रविशति तथाविधो राक्षसः)

राक्षसः– (भ्रमणं नाटयन्)

प्रत्यग्रहतानां मांसं यद्युष्णं रुधिरं च लभ्येत।

---

1 . हदमाणुशमंशशोणिदेहिं कुम्भशहश्शं वशाहिं शंचिदम्।
अणिशं अ पिबामि शोणिअं शमलं वलिशशदं हुबीअदु।।1।।

2 . जइ सिन्धुलाअवहदिअहे विअ दिअहे दिअहे शमलकम्म पडिवज्जइ अज्जुणो तदो पज्जत्तभलिदकोट्टागाले मंशशोणिएहिं मे गेहे हुबीअदि। अह कहिं क्खु गदे मे लुहिलप्पिए हुबीअदि। ता जाव इमस्सि शमले पिअभत्तालं लुहिलप्पिआ अण्णे शामि। होदु। शद्दावइश्शं दाव। अले लुहिलप्पिआ लुहिलप्पिआ लुहिलप्पिआ, इदो एहि।

। श्रीः ।।

तृतीय अङ्कः

(उसके बाद विकृत वेष वाली राक्षसी प्रवेश करती है)

राक्षसी– (विकराल रूप में हँसकर, संतोषपूर्वक)

युद्ध में मारे गए लोगों के मांस, मेदा और रक्त से हजारों घड़े भर लिए गए हैं और मैं रात–दिन निरन्तर रुधिर पी रही हूँ। यह युद्ध सैंकड़ों वर्षों तक इसीप्रकार चलता रहे।।1।।

(नाचती हुई संतोष के साथ) यदि सिन्धुराज के वध वाले, दिन के समान, अर्जुन युद्ध–कर्म को प्रतिदिन करे, तो मेरा घर मांस एवं रुधिर से परिपूर्ण कोठी–कुठलों वाला हो जाएगा। **(घूमकर चारों ओर देखकर)** इसके अलावा न जाने मेरा रुधिर प्रिय कहाँ पर होगा? तो जब तक इस युद्ध में ही अपने प्रिय स्वामी रुधिरप्रिय को ढूढ़ती हूँ। तब तक पुकारती हूँ। अरे! रुधिरप्रिय, रुधिरप्रिय! यहाँ आओ।

(इसके बाद उसीप्रकार का राक्षस प्रवेश करता है)

राक्षस– (घूमने का अभिनय करता हुआ)

यदि अभी–अभी मारे गए लोगों का मांस एवं गरम खून मिल जाए, तो मेरी यह थकान क्षणमात्र में ही दूर हो जाए।।2।।

शब्दार्थ– ततः–उसके बाद, विकृतवेषा–विकृतवेष वाली, विहस्य–हँसकर, संचितम्–एकत्र किया हुआ, अनिशम्–निरन्तर, पिबामि–पीता हूँ, भवतु–होवे, क्व–कहाँ, भविष्यति–होगा, अस्मिन्–इसमें, अन्विष्ये–खोजूँ, परिक्रम्य–घूमकर, एहि–आओ, शब्दापयिष्ये–पुकारूँगी, तथाविधः–उसप्रकार का, प्रत्यग्र–शीघ्र ही, समरकर्म–युद्धकार्य।

तदेष मम परिश्रमः क्षणमात्रमेव लघु नश्येत्।।2।।[1]

(अन्वय– यदि प्रत्यग्र–हतानाम् मांसम् च उष्णम् रुधिरम् लभ्येत तत् मम एषः परिश्रमः क्षण–मात्रम् एव लघु नश्येत्।।2।।)

(राक्षसी पुनर्व्याहरति)

राक्षसः– (आकर्ण्य) **अरे का मां शब्दायते। कथं प्रिया मे वसागन्धा।** (उपसृत्य) **वसागन्धे, कस्मान्मां शब्दायसे।**[2]

रुधिरासवपानमत्तिके रणहिण्डनस्खलद्गात्रिके।
शब्दायसे कस्मान्मां प्रिये पुरुषसहस्रं हतं श्रूयते।।3।।[3]

(अन्वय– रुधिर–आसव–पान–मत्तिके! रण–हिण्डन–स्खलद्-गात्रिके! प्रिये! कस्मात् माम् शब्दायसे? पुरुष–सहस्रम् हतम् श्रूयते।।3)

राक्षसी– **अरे रुधिरप्रिय! इदं खलु मया तवकारणात्प्रत्यग्रहतस्य कस्यापि राजर्षेः शरीरवयवहृतं प्रभूतवसास्निग्धं कोष्णं नवरुधिरमग्रमासं चाऽऽनीतम्। तत्पिबैतत्।**[4]

राक्षसः– (सपरितोषम्) **साधु, वसागन्धे, साधु! सुष्ठुं शोभनं त्वया कृतम्, यत्कोष्णं कोष्णं रुधिरमानीतम्। बलवदस्मि पिपासितः। तदुपनय।**[5]

राक्षसी–अरे रुधिरप्रिय! ईदृशेऽपि नाम हतनरगजतुरंगमशोणित-वसासमुद्रदुःसंचरे समरांगणे परिभ्रमंस्त्वं पिपासितोऽसीत्याश्चर्यम्।[1]

---

[1]. पच्चग्गहदाणं मंशए जइ उण्हे लुहिले अ लब्भइ।
ता एशे महु पलिश्शमे क्खणमेत्तं एव्व लहु णश्शइ।।2।।

[2]. अले के मं शद्दावेदि। 'विलोक्य, कहं पिआ मे वशागन्धा। (उपसृत्य) वशागन्धे, कीश मं शद्दावेशि।

[3]. लुहिलाशवपाणमत्तिए लणहिण्डन्तखलन्तगत्तिए।
शद्दाअशि कीश मं पिए! पुलिशशहश्शं हदं शुणीअदि।।3।।

[4]. अले लुहिलप्पिआ! एदं क्खु मए तुह कालणादो पच्चग्गहदश्श कश्शवि लाएसिणो शलीलावयवदुहं प्पहूदवशाशिणिग्धं कोण्हं णवलुहिलं अग्गमंशं अ आण- द्रम्। ता पिबाहि णम्।

[5]. शाहु वशागन्धे, शाहु! शुट्ठु शोहणं तुए किदम्, जं कोशिणं कोशिणं लुहिलं आणीदम्। बलिअह्मि पिवाशिए। ता उवणेहि।

(राक्षसी फिर से पुकारती है)

राक्षस– **(सुनकर)** अरे! यह कौन मुझे पुकार रही है? **(देखकर)** क्या प्रिया वसागन्धा है? **(पास जाकर)** वसागन्धे! मुझे क्यों पुकार रही हो?

हे रुधिररूपी मदिरा का पान करने में मत्त, युद्ध में पर्याप्त समय तक विचरण करने वाली प्रिये! मुझे क्यों पुकार रही हो, हजारों लोग युद्ध में मारे गए, सुने जा रहे हैं।।3।।

राक्षसी– अरे रुधिरप्रिय! वस्तुतः मैं यह तुम्हारे निमित्त तत्काल मारे गए, किसी राजर्षि के शरीर के अवयवों से निकाला गया, अधिक वसा के कारण थोड़ा चिकना, थोड़ा–थोड़ा गरम ताजा रुधिर लायी हूँ, तुम इसे पी लो।

राक्षस– **(संतोषपूर्वक)** साधु वसागन्धे! साधु, तुमने बहुत ही अच्छा किया, जो थोड़ा–थोड़ा गरम रुधिर ले आयी हो, क्योंकि मैं बहुत प्यासा हूँ। तो लाओ।

राक्षसी– अरे, रुधिरप्रिय! इसप्रकार के हाथी, घोड़ों तथा मनुष्यों के रुधिर एवं वसा के सागर में मुश्किल से चलने योग्य समरांगण में भी घूमते हुए भी तुम प्यासे हो, यह तो अत्यधिक आश्चर्यजनक है।

शब्दार्थ– तत्–तो, एषः–यह, मम–मेरा, व्याहरति–पुकार रही है, माम्–मुझे, आकर्ण्य–सुनकर, शब्दायसे–पुकार रही हो, कस्मात्–किसलिए, खलु–निश्चय ही, हतम्–मरे हुए, अपि–भी, उपनय–लाओ, कृतम्–किया, ईदृशे–इसप्रकार के, परि–भ्रमन्–घूमते हुए, पिपासितः–प्यासा, बलवद्–अत्यधिक, अस्मि–हूँ, त्वम्–तुम, समरांगणे–युद्ध क्षेत्र में,

(प्रस्तुत राक्षस–राक्षसी संवाद के माध्यम से महाकवि ने युद्धक्षेत्र में अनेक वीरों के मरने की सूचना दी है, जो **प्रवेशक** के रूप में प्रयुक्त हुई है। विष्कम्भक के समान ही यह भी दो अंकों के बीच में नीच पात्रों द्वारा प्रयुक्त किया जाता है, इसमें पूर्व में घटित घटनाओं की जानकारी दी जाती है)

---

[1]. अले लुहिलप्पिआ, एदिशे वि णाम हदणलगअतुलंगमशोणि अवशाश मुद्दु श्शंचले शमलांगणे पडिब्भमन्ते तुमं पिबाशिएशित्ति अच्चलिअम्।

राक्षसः– (सक्रोधम्) अरे वसागन्धे! ननु पुत्रघटोत्कचशोकसन्तप्त-हृदयां स्वामिनीं हिडिम्बादेवीं प्रेक्षितुं गतोऽस्मि।[1]

राक्षसौ– रुधिरप्रिय! अद्यापि स्वामिन्या हिडिम्बादेव्या घटोत्कच-शोको नोपशाम्यति।[2]

राक्षसः– वसागन्धे, कुतोऽस्या उपशमः? केवलमभिमन्युशोकसमान दुःखया सुभद्रादेव्या याज्ञसेन्या च कथं कथमपि समाश्वास्यते।[3]

राक्षसी–रुधिरप्रिय! गृहाणैतद्धस्तिशिरःकपालसंचितमग्रमांसो-पदंशम्। पिबाहि शोणितासवम्।[4]

राक्षसः– (तथा कृत्वा) वसागन्धे, अथ कियत्प्रभूतं त्वया संचितं रुधिरमग्रमांसं च?[5]

राक्षसी– अरे रुधिरप्रिय, पूर्वसंचितं त्वमपि जानास्येव। नवसंचितं शृणु तावत्। भगवदत्तशोणितैः कुम्भः सिन्धुराजवसाभिः कुम्भौ द्वौ द्रुपदमत्स्याधिपभूरिश्रवः सोमदत्तबाह्लीकप्रमुखाणां नरेन्द्राणामन्येषामपि प्राकृतपुरुषाणां रुधिरमांसस्य घटा अपिनद्धमुखाः सहस्रसंख्याः सन्ति मे गेहे।[6]

---

1. अले वशागंधे! णं पुत्तघडुक्कअशोअशन्तत्तहिअअं शामिणीं हिडिम्बादेवीं पेक्खिदुं गदह्मि।

2. लुहिलप्पिआ! अज्जवि शामिणीए हिडिम्बादेवीए घडुक्कअशोए ण उपशम्मइ।

3. वशागन्धे, कुदो शे उवशमे केवलं अहिमण्णुशोअशमाणदुक्खाए शुभद्दादेवीए जण्णशेणीए अ कधं कधं वि शमाश्शाशीअदि।

4. लुहिलप्पिआ। गेण्ह एदं हत्थिशिलक्कवालशंचिअ अग्गमं शोवदंशम्। पिबाहि शोणिआशवम्।

5. वशागन्धे, अह किअप्पहूदं दुए शंचिअं लुहिलं अग्गमंशं अ?

6. अले लुहिलप्पिआ, पूव्वशंचिअं तुमं वि जाणाशि जेव्व। णवशंचिअं शिणु दाव। भअदत्तशोणिएहिं कुम्मं, शिन्धुलाअवशाहिं कुम्भे दुवे, दुवदमच्छाहिवभूलिश्शव-शोमदत्तबहि्लअप्पमुहाणं णलिन्दाणं अण्णाणं वि पाकिदपुलिशाणं लुहिलवशा मंशस्स घटा अविणद्धमुहा सहस्सशंखा शन्ति मे गेहे।

राक्षस– **(क्रोधपूर्वक)** अरी, वसागन्धे! वास्तव में तो मैं पुत्र घटोत्कच के शोक से व्याकुल हृदय वाली, स्वामिनी हिडिम्बा देवी को देखने के लिए चला गया था।

राक्षसी– हे रुधिर प्रिय! क्या अब भी स्वामिनी हिडिम्बा देवी का घटोत्कच विषयक शोक शान्त नहीं हो रहा है?

हे वसागन्धे! उन्हें भला शान्ति कैसी? केवल अभिमन्यु के शोक से समान दुःख वाली, सुभद्रा देवी और द्रौपदी द्वारा येन केन प्रकारेण उन्हें धैर्य बँधाया जा रहा है।

राक्षसी– हे रुधिरप्रिय! यह हाथी के सिररूपी कपाल में इकट्ठे किए हुए, उत्तम मांस और रुधिर रूपी मदिरा को तुम पी लो।

राक्षस– **(वैसा करके)** वसागन्धे! तुमने कितना रुधिर एवं श्रेष्ठ मांस इकट्ठा कर लिया है।

राक्षसी– अरे रुधिरप्रिय! पहले एकत्र किए हुए को तो तुम जानते ही हो, इसलिए नए इकट्ठे किए हुए को सुनो, भगदत्त के रक्त से एक घड़ा, सिन्धुराज की चर्बी से दो घड़े, मत्स्यराज द्रुपद, भूरिश्रवा, सोमदत्त, बाह्लीक आदि राजाओं के रक्त तथा वसा से खुले मुँह वाले एक हजार घड़े मेरे घर में भरे हुए रखे हैं।

शब्दार्थ– प्रेक्षितुम्–देखने के लिए, अद्यापि–आज भी, उपशाम्यति–शान्त हो रहा है; उपशमः–शान्ति, समाश्वास्यते–आश्वासन दिया जा रहा है, गृहाण–ग्रहण करो, संचितम्–एकत्र किया हुआ, शृणु–सुनो, अन्येषाम्–दूसरों का, सक्रोधम्–क्रोध के साथ, कुतः–कहाँ से, कथम्–कैसे, क्यों, अपि–भी, अथ–इसके बाद, त्वया–तुम्हारे द्वारा, अग्रमांसम्–श्रेष्ठ मांस को, याज्ञसेन्या–द्रौपदी द्वारा, जानासि–जानते हो, नव–नया, उपदंशम्–श्रेष्ठ मांसरूपी खाद्यपदार्थ, शोणित–रक्त, आसवम्–मदिरा, कियत्–कितना।

राक्षसः— (सपरितोषमालिंग्य) साधु सुगृहिणि, साधु। अनेन ते सुगृहिणीत्वेनाद्य स्वामिन्या हिडिम्बादेव्याः संविधानेन प्रनष्टं मे जन्म—दारिद्र्यम्।[1]

राक्षसी— रुधिरप्रिय, कीदृशं स्वामिन्या संविधानं कृतम्।[2]

राक्षसः— वसागन्धे, अद्याऽहं स्वामिन्या हिडिम्बादेव्या सबहुमान—माहूयाऽऽज्ञप्तः यथा— रुधिरप्रिय, अद्यप्रभृति त्वया आर्यपुत्रभीमसेनस्य पृष्ठतोऽनुपृष्ठं समर आहिण्डितव्यमिति तत्तस्यानुमार्गगामिनो हतमानुष—शोणितनददर्शनप्रणष्टबुभुक्षापिपासस्येहैव मे स्वर्गलोको भविष्यति। त्वमपि विस्रब्धो भूत्वा रुधिरवसाभिः कुम्भसहस्रं संचिनु।[3]

राक्षसी—रुधिरप्रिय, किन्निमित्तं कुमारभीमसेनस्य पृष्ठत आहिण्ड्यते।[4]

राक्षसः— वसागन्धे! तेन हि स्वामिना वृकोदरेण दुःशासनस्य रुधिरं पातुं प्रतिज्ञातम्। तच्चास्माभिः राक्षसैरनुप्रविश्य पातव्यम्।[5]

राक्षसौ— (सहर्षम्) साधु स्वामिनि, साधु। सुसंविधानो मे भर्ता त्वया कृतः।[6]

(नेपथ्ये महान्कलकलः। उभावाकर्णयतः)

---

[1]. शाहु शुग्घलिणीए, शाहु। इमिणा दे शुग्घलिणीत्तणेण अज्ज शामिणीए हिडिम्बादेवीए शम्बिहाणेण प्पणट्टं मे जम्मदालिदम्।

[2]. लुहिलप्पिआ, केलिशे शामिणीए शविहाणए किदे।

[3]. वशागन्धे, अज्ज अहं शामिणीए हिडिम्बादेवीए शबहुमाणं शद्दावलि आणत्ते जहा—लुहिलप्पिआ, अज्जप्पहुदि तुए अज्जउत्तभीमशेणश्श पिट्ठदोऽणुपिट्ठं शमले आहिण्डिदव्वं त्ति। ता तश्श अणुमग्गगामिणो हओमाणुशशोणिअणइदश्शण प्पणट्ठ—बुभुक्खापिवाशश्श इव एव्व मे शग्गलोआ हुविअदि। तुमं वि वीशद्धा भविअ लुहि—लवशाहि कुम्भहश्शं शंचेहि।

[4]. लुहिलप्पिआ, किंणिमित्तं कुमालभीमशेणश्शपिट्ठदो आहिण्डीअदि।

[5]. वशागन्धे! तेण हि शामिणा विओदलेण दुश्शाशणश्श लुहिलं पादुं पडिण्णादम्। तं च अम्हेहिं लक्खशेहिं अणुप्पवशिअ पादव्वम्।

[6]. शाहु, शामिणीए! शाहु। शुशंविहाणे मे भत्ता तुए किदे।

राक्षस– **(संतोषपूर्वक आलिंगन करके)** साधु सुगृहिणि! साधु। तुम्हारे इस सुगृहिणीभाव से और स्वामिनी हिडिम्बा देवी के उपाय से तो आज मेरा जन्मभर का दारिद्र्य ही दूर हो गया है।

राक्षसी– हे रुधिरप्रिय! स्वामिनी ने भला कैसा उपाय किया है?

राक्षस– हे वसागन्धे! मैं आज स्वामिनी हिडिम्बा देवी द्वारा अत्यधिक सम्मानपूर्वक बुलाकर आज्ञा दिया गया हूँ कि– 'आज से तुम्हें युद्धभूमि में आर्यपुत्र भीमसेन के पीछे–पीछे घूमना है।' इसलिए उनके पीछे–पीछे रहने पर मारे जाते हुए, लोगों की रुधिर की नदी को देखने मात्र से नष्ट हुई भूख एवं प्यास वाले व्यक्ति के समान, यहीं पर मुझे स्वर्गलोक का आनन्द प्राप्त हो जाएगा और तुम भी निश्चिन्त होकर, रक्त एवं मज्जा के हजारों घड़ों को भर लो।

राक्षसी– रुधिरप्रिय! तुम किसकारण कुमार भीमसेन के पीछे घूमते रहते हो?

राक्षस– वसागन्धे! उसी कारण, जो उन स्वामी वृकोदर द्वारा दुःशासन के खून को पीने की, जो प्रतिज्ञा की गयी है। इसलिए वह तो हमारे जैसे राक्षसों द्वारा शरीर में प्रवेश करके ही पीना है।

राक्षसी– **(हर्षपूर्वक)** साधु, स्वामिनि! साधु। आपने तो मेरे पति को शुभकार्य में नियोजित कर दिया है।

(नेपथ्य में महान् कलकल ध्वनि होती है, दोनों सुनते हैं)

शब्दार्थ– सपरितोषम्–संतोषपूर्वक, आलिंग्य–आलिंगन करके, सुगृहिणीत्वेन–श्रेष्ठ गृहिणीभाव से, प्रनष्टम्–दूर हो गया, कीदृशम्–कैसा, अद्यप्रभृति–आज से लेकर, आहूय–बुलाकर, अनुपृष्ठम्–पीछे–पीछे, आहिण्डितव्यम्–घूमना चाहिए, भूत्वा –होकर, विस्रब्धः–निश्चिन्त हुआ, संचिनु–एकत्र करो, समरे–युद्ध में, किम्– क्या, निमित्त–कारण, वृकोदरेण–भीमसेन द्वारा, पृष्ठतः–पीछे, पातुम्–पीने के लिए, प्रतिज्ञातम्–प्रतिज्ञा की है, साधु–श्रेष्ठ, अच्छा, शोभन, **नेपथ्ये**–पर्दे के पीछे से, भर्ता–स्वामी, उभौ–दोनों, आकर्णयतः–सुनते हैं।

राक्षसी– (आकर्ण्य, ससम्भ्रमम्) **अरे रुधिरप्रिय! किं नु खल्वेष महान्कलकलः श्रूयते।**[1]

राक्षसः– (दृष्ट्वा) **वसागन्धे! एष खलु धृष्टद्युम्नेन द्रोणः केशेष्वाकृष्यासिपत्रेण व्यापाद्यते।**[2]

राक्षसी– (सहर्षम्) **रुधिरप्रिय! एहि। वयमपि गत्वा द्रोणस्य रुधिरं पिबामः।**[3]

राक्षसः–(सभयम्) **वसागन्धे, ब्राह्मणशोणितं खल्वेतत् गलं दहद्दहत प्रविशति। तत्किमेतेन?**[4]

(नेपथ्ये पुनः कलकलः)

राक्षसी– **रुधिरप्रिय, पुनरप्येष महान्कलकलः श्रूयते।**[5]

राक्षसः–(नेपथ्याभिमुखमवलोक्य) **(वसागन्धे एष खल्वश्वत्थामा-कृष्टासिपत्र इत एवागच्छति। कदाचिद् द्रुपदसुतरोषेणावामपि व्यापादयिष्यति। तदेहि स्वामिन्या हिडिम्बादेव्या आज्ञप्तिं कुर्मः।**[6]

राक्षसी– **एवं करवाव।**[7]

(इति निष्क्रान्तौ)

प्रवेशकः

---

1 . अले लुहिलप्पिआ! किं णु क्खु एशे महन्ते कलअले शुणीअदि।

2 . वशागन्धे, एशे क्खु धिट्ठज्जुण्णेण दोणे केशेशु आकड्डिअ अशिवत्तेण वावदीअदि।

3 . लुहिलप्पिआ! एहि! अम्हे वि गच्छिअ दोणश्शलुहिलं पिबम्ह।

4 . वशागन्धे, बह्मणशोणिअं क्खु एदं गलअं दहन्ते दहन्ते पविशदि। ता किं एदिणा।

5 . लुहिलप्पिआ! पुणोवि एशे महन्ते कलअले शुणीअदि।

6 . वशागन्धे! एशे क्खु अश्शत्थामे आकड्डिदाशिवत्ते इदो एव्व आअच्छदि। कदावि दुवदशुदलोशेण अम्हे वि वावादइश्शइ। ता एहि शामिणीए हिडिम्बादेवीए आणत्तिं कलेम्हि।

7 . एवं करेम्ह।

राक्षसी– (सुनकर घबराहट के साथ) हे रुधिरप्रिय! यह महान् कोलाहल भला क्या सुनायी पड़ रहा है?

राक्षस– (देखकर) वसागन्धे! यह धृष्टद्युम्न द्वारा द्रोणाचार्य के केश पकड़कर, उन्हें खींचकर तलवार से मारा जा रहा है।

राक्षसी– (प्रसन्नतापूर्वक) रुधिरप्रिय! आओ, हम भी द्रोणाचार्य के रुधिर को पीते हैं।

राक्षस– (भयपूर्वक) वसागन्धे! निश्चय ही, ब्राह्मण का यह रक्त गले को जलाते हुए प्रवेश करेगा, तो फिर इससे क्या लाभ?

(नेपथ्य में फिर से कलकल ध्वनि होती है)

राक्षसी– रुधिरप्रिय! फिर से यह महान् कलकल सुनायी दे रहा है?

राक्षस– (नेपथ्य की ओर देखकर) वसागन्धे! यह अश्वत्थामा तलवार खींचकर इधर ही आ रहा है। कहीं धृष्टद्युम्न के प्रति क्रोध से हमें ही न मार डाले, इसलिए चलते हैं, देवी हिडिम्बा के आदेश का पालन करें।

राक्षसी– हम दोनों ऐसा ही करते हैं।

(ऐसा कहकर दोनों निकल जाते हैं)

प्रवेशक

शब्दार्थ– महान्–बहुत बड़ा, कलकलः–कोलाहल, श्रूयते–सुनायी दे रहा है, आकृष्य–खींचकर, असिपत्रेण–तलवार द्वारा, व्यापाद्यते–मारा जा रहा है, एहि–आओ, वयम्–हम, अपि–भी, गत्वा–जाकर, पिबामः–पीते हैं, शोणितम्–रक्त, खलु–निश्चय ही, दहद्दहत्–जलते जलते, प्रविशति–प्रवेश करता है, पुनः–फिर से, अवलोक्य–देखकर, आकृष्ट–खींचकर, इतः–इधर, एव–ही, आगच्छति–आ रहा है, कदाचित्–कहीं, द्रुपदसुतः–द्रुपद का पुत्र, रोषेण–क्रोध से, व्यापादयिष्यति–मार डालेगा, तत्–तो, आज्ञप्तिम्–आज्ञा को, कुर्मः–करते हैं।

(ततः प्रविशत्याकृष्टखड्गः कलकलमाकर्णयन्नश्वत्थामा)

अश्वत्थामा–

महाप्रलयमारुतक्षुभितपुष्करावर्तक–
प्रचण्डघनगर्जितप्रतिरवानुकारी मुहुः।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः।।4।।

(अन्वय– महा–प्रलय–मारुत–क्षुभित–पुष्कर–आवर्तक–प्रचण्ड–घन–गर्जित–प्रतिरव–अनुकारी स्थगित–रोदसी–कन्दरः, श्रवण–भैरवः, समर–उदधेः अभूत–पूर्वः पुरः अयम् रवः, मुहुः अद्य कुतः?।।4।।)

(विचिन्त्य) ध्रुवं गाण्डीविना सात्यकिना वृकोदरेण वा यौवनदर्पादतिक्रान्तमर्यादेन परिकोपितस्तातः। यतः समुल्लंघ्यशिष्यप्रियतामात्मप्रभावसदृशमाचेष्टते। तथाहि–

यद्दुर्योधनपक्षपातसदृशं युक्तं यदस्त्रग्रहे
रामाल्लब्धसमस्तहेतिगुरुणो वीर्यस्य यत्साम्प्रतम्।
लोके सर्वधनुष्मतामधिपतेर्यच्चानुरूपं रुषः
प्रारब्धं रिपुघस्मरेण नियतं तत्कर्म तातेन मे।।5।।

(अन्वय– यत् दुर्योधन–पक्षपात–सदृशम्, यत् अस्त्र–ग्रहे च युक्तम्, यत् रामात् लब्ध–समस्त–हेति गुरुणः, वीर्यस्य साम्प्रतम्, यत् लोके सर्व–धनुष्मताम् अधिपतेः च रुषः अनुरूपम्, रिपु–घस्मरेण मे तातेन तत् कर्म नियतम् प्रारब्धम्।।5।।)

(पृष्ठतो विलोक्य) **तत्कोऽत्र। रथमुपनयतु। अथवाऽलमिदानीं मम रथप्रतीक्षया अनया। सशस्त्र एवास्मि, सजलजलधरप्रभाभासुरेण सुप्रग्रहविमलकलधौतत्सरुणाऽमुना खड्गेन। यावत्समरभुवमवतरामि।** (परिक्रम्य वामाक्षिस्पन्दनं सूचयित्वा) **आ! कथं ममापि नामऽश्वत्थाम्नः समरमहोत्सवप्रमोदनिर्भरस्य तातविक्रमदर्शनलालसस्यानिमित्तानि समर–गमनविघ्नमुत्पादयन्ति। भवतु। गच्छामि।**

(सावष्टम्भं परिक्रम्याग्रतो विलोक्य)

(उसके बाद तलवार खींचकर, कलकल ध्वनि को सुनते हुए अश्वत्थामा प्रवेश करता है)

अश्वत्थामा– **महान् प्रलयकारी वायु से क्षुभित पुष्करावर्तक नामक प्रलयंकारी मेघों के गर्जन का अनुकरण करने वाला, पृथ्वी एवं आकाश की कन्दराओं में गूँजने वाला, कानों को भयंकर प्रतीत होने वाला, युद्ध रूपी सागर से उत्पन्न अभूतपूर्व यह कोलाहल आज सामने ही भला कहाँ से उठ रहा है।।4।।**

(सोचकर) निश्चय ही, गाण्डीवधारी अर्जुन, सात्यकि अथवा वृकोदर ने यौवनाभिमान के कारण अपनी मर्यादा का परित्याग करके, पिताजी को क्रोधित कर दिया है, वस्तुतः वे ही अपनी शिष्यप्रियता का उल्लंघन करके, अपने प्रभाव के अनुकूल कार्य कर रहे हैं, क्योंकि–

जो दुर्योधन के पश्चात्ताप के अनुकूल है एवं जो अस्त्र ग्रहण करने पर उचित है तथा जो परशुराम से प्राप्त की गयी, सम्पूर्ण शस्त्र विद्या के गौरव के योग्य है, जो संसार में सभी धनुर्धारियों के स्वामी के क्रोध के अनुरूप है, वस्तुतः शत्रुओं का संहार करने वाले, मेरे पिताजी ने वही कर्म आरम्भ कर दिया है।।5।।

(पीछे की ओर देखकर) अरे! यहाँ कौन है? जरा रथ ले आओ। अथवा इस रथ की प्रतीक्षा करना मेरे लिए व्यर्थ है, क्योंकि मेघ की कान्ति के समान, सरलता से पकड़े जाने योग्य, चमचमाते हुए, सुनहरी मूठ वाले, इस खड्ग से युक्त होने से, शस्त्रयुक्त तो मैं हूँ ही। इसलिए तब तक मैं युद्धभूमि में उतरता हूँ।

(घूमकर, बायीं आँख के स्पन्दन को सूचित करके)

आः! क्या युद्धरूपी महोत्सव के आनन्द पर निर्भर रहने वाले, पिताश्री के पराक्रम को देखने के इच्छुक, मुझ अश्वत्थामा को भी, अपशकुन संग्रामभूमि में जाने में विघ्न उत्पन्न कर सकते हैं? ठीक है, जाता हूँ।

(अभिमानपूर्वक घूमकर, सामने देखकर)

कथमवधीरितक्षात्रधर्माणामुज्झितसत्पुरुषोचितलज्जावगुण्ठनानां[1] विस्मृतस्वामिसत्कारलघुचेतसां द्विरदतुरंगमचरणचारिणामगणितकुलयशः सदृशपराक्रमव्रतानां रणभूमेः समन्तादपक्रामतामयं महान्नादो बलानाम् (निरूप्य) हा हा धिक्कष्टम्। कथमेते महारथाः कर्णादयोऽपि समरात् पराङ्मुखा भवन्ति। (साशंकम्) कथं नु ताताधिष्ठितानामपि बलानामियमवस्था भवेत्। भवतु सस्तम्भयामि। भोः भोः कौरवसेनासमुद्रवेलापरिपालनमहामहीधरा नरपतयः, कृतं कृतममुना समरपरित्यागसाहसेन।

यदि समरमपास्य नास्ति मृत्यो–
र्भयमिति युक्तमितोऽन्यतः प्रयातुम्।
अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः कुरुध्वे।।6।।

(**अन्वय–** यदि समरम् अपास्य मृत्योः भयम् इति न अस्ति इतः अन्यतः प्रयातुम् युक्तम्, अथ जन्तोः मरणम् अवश्यम् एव, यशः मुधा किम् इति मलिनम् कुरुध्वे।।6।।)

अपि च

अस्रज्वालाऽवलीढ़प्रतिबलजलधेरन्तरौर्वायमाणे,
सेनानाथे स्थितेऽस्मिन्मम पितरि गुरौ सर्वधन्वीश्वराणाम्
कर्णऽलं सम्भ्रमेण व्रज कृप समरं मुंच हार्दिक्यशंकां
ताते चापद्वितीये वहति रणधुरं को भयस्याऽवकाशः।।7।

(**अन्वय–** अस्र–ज्वाला–अवलीढ़–प्रतिबल–जलधेः, अन्तः और्वायमाणे, अस्मिन् सर्व–धनु–ईश्वराणाम् गुरौ, मम पितरि सेना–नाथे स्थिते, कर्ण! अलम् सम्भ्रमेण, कृप समरम् व्रज, हार्दिक्य–शंकाम् मुंच, चाप–द्वितीये ताते रण–धुरम् वहति, भयस्य कः अवकाशः।।7।।)

(नेपथ्ये)

कुतोऽद्यापि ते तातः।

---

[1]. महाकवि की विशेषता रही है कि वे एक पंक्ति से भी अधिक लम्बा समस्त पद प्रयोग करते हैं, प्रस्तुत अंश इसके प्रमाणरूप में प्रस्तुत किया जा सकता है।

यह क्या? क्षत्रियजनोचित धर्म का परित्याग करके, साधुजनों के लिए उपयुक्त लज्जारूपी आवरण को हटाकर, स्वामी के सत्कार को भुलाए हुए, अपने कुल की कीर्ति के समान, पराक्रम विषयक व्रत को स्वीकार न करने वाले, नीच अश्वारोही, गजारोही और पैदल रणभूमि से चारों ओर भागने वाले, सैन्यसमूह का यह कोलाहल हो रहा है।

(भलीप्रकार देखकर) हाय, हाय, धिक्कार है, कष्ट की बात है। ये कर्ण आदि महारथी भी युद्ध से भागे जा रहे हैं, **(सन्देह के साथ)** पिताजी से संरक्षित सेना की भी यह स्थिति हो सकती है? ठीक है, इन्हें रोकता हूँ। अरे! कौरवसेनारूपी सागर की सीमा की रक्षा करने वाले, महान् पर्वत जैसे राजाओं! इसप्रकार युद्धभूमि का परित्याग करने का साहस करना उचित नहीं है।

यदि युद्धक्षेत्र से भागकर मृत्यु का भय नहीं है, तो यहाँ से अन्यत्र जाना ठीक है, किन्तु जब संसार में प्राणी का निधन होना अनिवार्य ही है, तो फिर व्यर्थ में अपनी कीर्ति को मलिन क्यों कर रहे हो?।।6।।

और भी,

अस्त्ररूपी ज्वालाओं से व्याप्त, शत्रुओं की सेनारूपी समुद्र के मध्य में वडवानल के समान, विचरण करने वाले, धनुर्धारियों के गुरु और सेनापति, मेरे पिता के इस युद्ध में अवस्थित होने पर भी, हे कर्ण! तुम्हारा सन्देह करना व्यर्थ है। हे कृपाचार्य! युद्धभूमि में जाइए। हे हृदिकापुत्र, कृतवर्मन्! शंका का परित्याग कर दो, क्योंकि धनुर्मात्र सहायक मेरे पिताश्री के युद्ध के भार को धारण करने पर, भला अब भय का अवसर कहाँ है?।।7।।

(नेपथ्य में)

अब तुम्हारे पिताश्री कहाँ हैं?

अश्वत्थामा– (श्रुत्वा) किं ब्रूथ– 'कुतोऽद्यापि ते तातः' इति (सरोषम्) आः क्षुद्राः समरभीरवः, कथमेवं प्रलपतां वः सहस्रधा न विदीर्णमनया जिह्वया।

दग्धुं विश्वं दहनकिरणैर्नोदिता द्वादशार्काः
वाता वाता दिशि दिशि न वा सप्तधा सप्त भिन्नाः।
छन्नं मेघैर्न गगनतलं पुष्करावर्तकाद्यैः,
पापं पापाः! कथयत कथं? शौर्यराशेः पितुर्मे।।8।।

(अन्वय– द्वादश–अर्काः दहन–किरणैः विश्वम् दग्धुम् न उदिताः, सप्तधाः भिन्नाः वाताः दिशि दिशि न वाताः, वा सप्त पुष्कर–आवर्तक–आद्यैः मेघैः, गगन–तलम् न छन्नम्, पापाः! शौर्य–राशेः मे पितुः पापम् कथम् कथयत? ।।8।।)

(प्रविश्य सम्भ्रान्तः सप्रहारः)

सूतः– परित्रायतां, परित्रायतां कुमारः। (इति पादयोः पतति)

अश्वत्थामा– (विलोक्य) अये, कथं तातस्य सारथिरश्वसेनः! आर्य! ननु त्रैलोक्यत्राणक्षमस्य सारथिरसि। किं मत्तः शिशुजनात् परित्राणमिच्छसि?

सूतः– (उत्थाय, सकरुणम्) कुतोऽद्यापि ते तातः!

अश्वत्थामा– (सावेगम्) किं तातो नामाऽस्तमुपगतः?

सूतः– अथ किम्?

अश्वत्थामा– हा तात! हा तात!

(इति मोहमुपगम्य पतितः)

सूतः– कुमार, समाश्वसिहि, समाश्वसिहि।

अश्वत्थामा– (लब्धसंज्ञः उत्थाय, सास्रम्) हा तात, सुतवत्सल! हा लोकत्रयैकधनुर्धर! हा जामदग्न्याऽस्त्रसर्वस्वप्रतिग्रहप्रणियन्! क्वासि? प्रयच्छ मे प्रतिवचनम्।

अश्वत्थामा– **(सुनकर)** क्या कर रहे हो? 'तुम्हारे पिताजी अब कहाँ हैं?' **(आक्रोशपूर्वक)** अरे! निकृष्ट, युद्धकातरों! इसप्रकार प्रलाप करने वाले तुम लोगों की, इस जीभ के हजारों टुकड़े क्यों नहीं हो गए?

बारह सूर्य अपनी जला डालने वाली, किरणों से विश्व को भस्म करने के लिए उदित क्यों नहीं हो गए? सात भागों में विभाजित, सात प्रकार की वायु चारों ओर प्रवाहित क्यों नहीं होने लगी? आकाशतल, पुष्पकरावर्तक आदि प्रलयंकारी बादलों से आच्छादित तो नहीं हो गया? अरे! पापियों, शौर्य की राशि, मेरे पिताश्री के विषय में तुम लोग, इस प्रकार की पापपूर्ण बात भला कैसे कह रहे हो?।।8।।

(प्रवेश करके, भयभीत हुआ तथा चोट खाया हुआ)

सूत– रक्षा कीजिए, कुमार! रक्षा कीजिए।

(यह कहकर पैरों में गिर पड़ता है)

अश्वत्थामा– **(देखकर)** अरे! क्या पिताश्री का सारथि अश्वसेन है? आर्य! आर्य! आप तो तीनों लोकों की रक्षा करने में समर्थ, पिताजी के सारथी हैं? मुझ बालक से आप क्या रक्षा चाह रहे हैं?

सूत– **(उठकर दुःखी होकर)** हे कुमार! अब आपके पिताश्री कहाँ हैं?

अश्वत्थामा– **(आवेगपूर्वक)** क्या पिताश्री नहीं रहे?

सूत– और क्या?

अश्वत्थामा– हा तात! हा तात!

(यह कहकर मूर्च्छित होकर गिर पड़ता है)

सूत– कुमार! धैर्य धारण कीजिए, धैर्य धारण कीजिए।

अश्वत्थामा– (होश में आकर, उठकर, अश्रुपूर्वक) हा तात! हा पुत्र वत्सल! हाय तीनों लोकों के एकमात्र धनुर्धर! हाय परशुराम की समस्त अस्त्रविद्या को ग्रहण करने के प्रेमी! आप कहाँ हैं? मुझे प्रत्युत्तर दीजिए।

सूतः– आयुष्मन्! अलमत्यन्तशोकावेगेन। वीरपुरुषोचितां विपत्तिमुपगते पितरि त्वमपि तदनुरूपेणैव वीर्येण शोकसागरमुत्तीर्य सुखी भव।

अश्वत्थामा– (अश्रूणि प्रमृज्य) आर्य, कथय कथय, कथं तादृग्भुजवीर्यसागरस्तातोऽपि नामास्तमुपगतः ?

किं शिष्यात् गुरुदक्षिणां गुरुगदां भीमप्रियः प्राप्तवान्।

सूतः– शान्तं पापम्, शान्तं पापम्।

अश्वत्थामा–

अन्तेवासिदयालुरुज्झितनयेनाऽऽसादितो जिष्णुना।

सूतः– कथमेवं भविष्यति।

अश्वत्थामा–

गोविन्देन सुदर्शनस्य निशितं धारापथं प्रापितः।

सूतः– एतदपि नास्ति।

अश्वत्थामा–

शंके नापदमन्यतः खलु गुरोरेभ्यश्चतुर्थादहम्।।9।।

(अन्वय– किम् भीम–प्रियः शिष्यात् गुरु–गदाम् गुरु–दक्षिणाम् प्राप्तवान्। अन्तेवासि–दयालुः उज्झित–नयेन जिष्णुना आसादितः गोविन्देन सुदर्शनस्य निशितम् धारा–पथम् प्रापितः, एभ्यः चतुर्थात् अन्यतः खलु अहम् न गुरोः आपदम् शंके।।9।।)

सूतः– कुमार,

एतेऽपि तस्य कुपितस्य महास्त्रपाणेः,
किं धूर्जटेरिव तुलामुपयान्ति संख्ये।
शोकोपरुद्धहृदयेन यदा तु शस्त्रं
त्यक्तं तदाऽस्य विहितं रिपुणाऽतिघोरम्।।10।।

(अन्वय– एते अपि कुपितस्य धूर्जटेः इव महा–अस्त्र–पाणेः तस्य संख्ये तुलाम् उपयान्ति किम्? यदा तु शोक–उपरुद्ध–हृदयेन शस्त्रम् त्यक्तम्, तदा रिपुणा अस्य अति–घोरम् विहितम्।।10।।)

अश्वत्थामा– किं पुनः कारणं शोकस्याऽस्त्रपरित्यागस्य वा।

सूत– आयुष्मन्! अत्यधिक शोक के आवेग से बस करो। पिताश्री के वीर पुरुषों के योग्य आपत्ति में पड़ने पर, आप भी उनके अनुसार ही पराक्रम प्रदर्शित करके, इस शोकरूपी सागर को पार करके सुखी हो जाइए।

अश्वत्थामा– (अश्रु पोंछकर) आर्य अश्वसेन! कहिए, कहिए, भला इसप्रकार कैसे बाहु पराक्रम के समुद्रस्वरूप पिताश्री अस्त हो गए?

क्या भीमप्रिय पिताश्री ने अपने प्रिय शिष्य भीम की भारी गदा से गुरुदक्षिणा लेकर स्वर्ग को प्राप्त कर लिया?

सूत– पाप शान्त हो, पाप शान्त हो।

अश्वत्थामा– क्या अपने शिष्यों पर दया करने वाले, पिताश्री गुरु मर्यादा का परित्याग करके, अर्जुन द्वारा मारे गए?

सूत– भला ऐसा कैसे हो सकता है?

अश्वत्थामा– क्या श्रीकृष्ण ने अपने सुदर्शन की तीक्ष्ण धार के मार्ग में पिताश्री को पहुँचा दिया?

सूत– यह भी नहीं है।

अश्वत्थामा– तब तो इन तीनों के अलावा चौथे व्यक्ति से तो पिताजी के मृत्युरूपी संकट के उत्पन्न होने में मुझे सन्देह है।।9।।

सूत– कुमार!

भीम, अर्जुनादि ये सब भी क्या क्रुद्ध शिव के समान, धनुर्धारी उस युद्ध में आचार्यप्रवर की बराबरी करने में समर्थ थे? किन्तु जिस समय शोक से व्याकुल हृदय वाले, आचार्य प्रवर ने अपने शस्त्र को त्याग दिया, तभी शत्रु ने इनके साथ अत्यधिक भयानक कृत्य कर दिया।।10।।

अश्वत्थामा– तो फिर भला शोक का या अस्त्र को त्याग करने का क्या कारण था?

सूतः– ननु कुमार एव कारणम्।

अश्वत्थामा– कथमहमेव नाम।

सूतः– (अश्रूणि विमुच्य) श्रूयताम्।

'अश्वत्थामा हत' इति पृथासूनुना स्पष्टमुक्त्वा
स्वैरं शेषे 'गज' इति किल व्याहृतं सत्यवाचा।
तच्छ्रुत्वाऽसौ दयिततनयः प्रत्ययात्तस्य राज्ञः
शस्त्राण्याजौ नयनसलिलं चापि तुल्यं मुमोच।।11।।

(**अन्वय**– 'अश्वत्थामा हत' इति सत्य–वाचा पृथा–सूनुना स्पष्ट उक्त्वा शेषे स्वैरम् 'गज' इति व्याहृतम् किल, दयित–तनयः असौ त श्रुत्वा, तस्य राज्ञः प्रत्ययात् आजौ शस्त्राणि, नयन–सलिलम् च अ तुल्यम् मुमोच।।11।।)

अश्वत्थामा– हा तात! हा सुतवत्सल! हा वृथा मदर्थपरित्यक्त-जीवित! हा शौर्यराशे! हा शिष्यप्रिय! हा युधिष्ठिरपक्षपातिन्।

(इति रोदिति)

सूतः– कुमार, अलमत्यन्तपरिदेवनकार्पण्येन।

अश्वत्थामा–

श्रुत्वा वधं मम मृषा सुतवत्सलेन,
तात! त्वया सह शरैरसवो विमुक्ताः।
जीवाम्यहं पुनरहो भवता विनाऽपि,
क्रूरेऽपि तन्मयि मुधा तव पक्षपातः।।12।।

(**अन्वय**– तात! सुत–वत्सलेन त्वया मम मृषा वधम् श्रुत्वा, शरै सह असवः (अपि) विमुक्ताः, अहो अहम् पुनः भवता विना अपि जीवामि तत् क्रूरे अपि मयि तव पक्षपातः मुधा।।12।।)

(इति मोहमुपगतः)

सूतः– समाश्वसितु, समाश्वसितु कुमारः।

(ततः प्रविशति कृपः)

कृपः– (सोद्वेगं निःश्वस्य)

सूत– निश्चय ही, कुमार ही कारण थे।

अश्वत्थामा– क्या वास्तव में, मैं ही कारण था?

सूत– (अश्रु बहाकर) सुनिए–

'अश्वत्थामा मारा गया' इसप्रकार सत्यवादी पृथापुत्र युधिष्ठिर द्वारा स्पष्टरूप से कहे जाने पर, शेष 'हाथी' वाक्य को धीरे से कह दिया गया, तब निश्चय ही, पुत्रप्रेमी वे आचार्य प्रवर यह सुनकर, उस राजा युधिष्ठिर के वचनों पर विश्वास करके, युद्ध में अस्त्र का परित्याग कर, नेत्रों से अश्रु बहाने लगे।।11।।

अश्वत्थामा– हा तात! हाय पुत्रवत्सल! हा मेरे लिए व्यर्थ ही अपना जीवन परित्याग करने वाले! (यह कहकर रोने लगता है)

सूत– कुमार! अत्यधिक विलापरूपी कायरता से बस कीजिए।

अश्वत्थामा– हे तात! पुत्रवत्सल! आपने मेरे वध की झूठी बात सुनकर, बाण छोड़ने के साथ ही, अपने प्राणों तक को छोड़ दिया, किन्तु मैं आपके बिना भी जीवित हूँ। वस्तुतः आश्चर्य है कि इतने क्रूर मुझ पर भी आप व्यर्थ ही पक्षपात (स्नेह) करते थे।।12।।

सूत– धैर्य धारण करें, कुमार! धैर्य धारण करें।

(उसके बाद कृपाचार्य प्रवेश करते हैं)

कृपाचार्य– (उद्वेगपूर्वक लम्बा श्वास लेकर)

शब्दार्थ– ननु–निश्चय ही, कथम्–कैसे, एव–ही, विमुच्य–छोड़कर, बहाकर, श्रूयताम्–सुनिए, हतः–मारा गया, इति–इसप्रकार, पृथासूनुना–युधिष्ठिर द्वारा, स्वैरम् –धीरे से, व्याहृतम्–कहा, किल–निश्चय ही, श्रुत्वा–सुनकर, आजौ–युद्ध में, नयन–सलिलम्–नेत्रों से,अश्रुओं को, तुल्यम्–समान, मुमोच–छोड़ा, वृथा–व्यर्थ, परित्यक्त–छोड़ना, रोदिति–रोता है, मृषा–झूठा, सह–साथ, विमुक्ताः–छोड़ा, तव–तेरा, उपगतः–प्राप्त हो गया, सोद्वेगम्–उद्वेगपूर्वक, निश्वस्य–लम्बा श्वास लेकर, मम–मेरा।

धिक्सानुजं कुरुपतिं धिगजातशत्रुं
धिग्भूपतीन्विफलशस्त्रभृतो धिगस्मान्।
केशग्रहः खलु तदा द्रुपदात्मजाया
द्रोणस्य चाद्य लिखितैरिव वीक्षितो यैः।।13।।

(अन्वय– स–अनुजम् कुरु–पतिम् धिक्, अजात–शत्रुम् धिक् विफल–शस्त्र–भृतः भूपतीन् धिक्, अस्मान् धिक्, यः तदा द्रुपद-आत्मजायाः द्रोणस्य च केश–ग्रहः लिखितैः इव वीक्षितः, अद्य खलु (तान् अपि) धिक्।।13।।)

तत्कथं नु खलु वत्समद्य द्रक्ष्याम्यश्वत्थामानम् । अथवा हिमवत् सारगुरुचेतसि ज्ञातलोकस्थितौ तस्मिन्न खलु शोकावेगमहमाशंके। किन्त्वसदृशं पितुः पराभवमुपश्रुत्य न जाने किं व्यवस्यतीति।

अथवा–

एकस्य तावत्पाकोऽयं दारुणो भुवि वर्तते।
केशग्रहे द्वितीयेऽस्मिन् नूनं निःशेषिताः प्रजाः।।14।।

(अन्वय– एकस्य तावत् अयम् दारुणः पाकः भुवि वर्तते, अस्मिन् द्वितीये केश–ग्रहे नूनम् प्रजाः निःशेषिताः।।14।।)

(विभाव्य) तदयं वत्सस्तिष्ठति। यावदुपसर्पामि (उपसृत्य ससम्भ्रमम्) वत्स, समाश्वसिहि समाश्वसिहि।

अश्वत्थामा– (संज्ञां लब्ध्वा, सास्रम्) हा तात, सकलभुवनैकगुरो! (आकाशे) युधिष्ठिर! युधिष्ठिर!

आजन्मनो न वितथं भवता किलोक्तं
न द्वेक्षि यज्जनमतस्त्वमजातशत्रुः।
ताते गुरौ द्विजवरे मम भाग्यदोषात्
सर्वं तदेकपद एव कथं निरस्तम्।।15।।

(अन्वय– किल भवता आजन्मनः वितथम् न उक्तम्, यत् जनम् न द्वेक्षि, अतः त्वम् अजातशत्रुः, गुरौ द्विजवरे मम ताते भाग्य–दोषात् एक–पदे एव तत् सर्वम् कथम् निरस्तम्?।।15।।)

अनुजों सहित कुरुराज दुर्योधन को धिक्कार है, अजातशत्रु युधिष्ठिर को धिक्कार है, विफल शस्त्रों वाले राजाओं को धिक्कार है, अरे! आज तो हम सभी महारथियों को भी धिक्कार है, जो उस भरी सभा में द्रौपदी का तथा युद्धभूमि में द्रोणाचार्य का केश पकड़कर खींचा जाना चित्र लिखित के समान देखते रहे, (विरोध में कुछ न कह सके)।।13।।

अब तो मैं अश्वत्थामा को भला कैसे देख पाऊँगा? अथवा हिमालय के सार के समान गम्भीर हृदय वाले एवं लोक मर्यादा के विशेषज्ञ, उस वत्स अश्वत्थामा में भी मैं शोकोद्वेग की आशंका कर रहा हूँ, किन्तु अनुचित पितृवध को सुनकर तो वह न जाने क्या कर डालेगा? अथवा,

एक केश ग्रहण का कठोर परिणाम तो यह (महाभारत) **हो रहा है, तब दूसरा केशग्रहण करने पर तो निश्चय ही, प्रजा का विनाश हो जाएगा।।14।।**

(भलीप्रकार देखकर) तो यह वत्स विराजमान है, तब तक इसके पास चलता हूँ। (पास जाकर, घबराहट के साथ) वत्स! धैर्य धारण करो, धैर्य धारण करो।

अश्वत्थामा– (होश में आकर, अश्रुपूर्वक) हा तात! सभी भुवनों के एकमात्र गुरु! (आकाश में) युधिष्ठिर, युधिष्ठिर!

आपने बाल्यकाल से कभी असत्य नहीं बोला और कभी किसी से द्वेष भी नहीं किया। इसीलिए आप हमेशा ही अजातशत्रु बने रहे, किन्तु फिर भी आचार्य, एक उत्तम ब्राह्मण, मेरे पिता के लिए आपने सत्य सम्भाषण, गुरुसम्मान एवं ब्राह्मण का अवध्य विषयक ज्ञान, ये सभी मेरे भाग्य के दोष से कैसे छोड़ दिए?।।15।।

सूतः– कुमार! एष ते मातुलः पार्श्वे शारद्वतस्तिष्ठति!

अश्वत्थामा– (पार्श्वे विलोक्य, सबाष्पम्) मातुल,

गतो येनाद्य त्वं सह रणभुवं सैन्यपतिना
य एकः शूराणां गुरुसमरकण्डूनिकषणः।
परीहासाश्चित्राः सततमभवन्येन भवतः
स्वसुः श्लाघ्यो भर्ता क्व नु खलु स ते मातुल गतः।16

(अन्वय– मातुलः! येन सैन्य–पतिना सह त्वम् अद्य रण–भुवम् गतः, यः एकः शूराणाम् गुरु–समर–कण्डू–निकषणः, येन भवतः सततम् चित्राः परीहासाः अभवन्, सः ते स्वसुः श्लाघ्यः, भर्ता क्व नु खलु गतः।16।।)

कृपः– परिगतपरिगन्तव्य एव भवान्। तदलमत्यन्तशोकावेगेन।

अश्वत्थामा– मातुल! परित्यक्तमेव मया परिदेवनम्। एषोऽहं सुतवत्सलं तातमेवाऽनुगच्छामि।

कृपः– वत्स! अनुपपन्नमीदृशं व्यवसितं भवद्विधानाम्।

सूतः– कुमार, अलमतिसाहसेन।

अश्वत्थामा– आर्य! किमुच्यते?

मद्वियोगभयात्तातः परलोकमितो गतः।
सहिष्ये विरहं तस्य वत्सलस्य कथं पितुः।।17।।

(अन्वय– मत् वियोग–भयात् तातः इतः परलोकम् गतः, वत्सलस्य तस्य पितुः विरहम् कथम् सहिष्ये?।।17।।)

कृपः– वत्स, यावदयं संसारस्तावत्प्रसिद्धैवेयं लोकयात्रा यत्पुत्रैः पितरो लोकद्वयेऽप्यनुवर्तनीया इति। पश्य–

निवापाऽजलिदानेन केतनैः श्राद्धकर्मभिः।
तस्योपकारे शक्तस्त्वं किं जीवन्किमुतान्यथा।।18।।

(अन्वय– निवाप–अंजलि–दानेन केतनैः श्राद्ध–कर्मभिः तस्य उपकारे त्वम् किम् जीवन् शक्तः किम् उत अन्यथा (शक्तः?)।।18।।)

सूतः– आयुष्मन्, यथैव मातुलस्ते शारद्वतः कथयति तत्तथा।

सूत– कुमार! ये आपके पास में मामा शारद्वत विराजमान हैं।

अश्वत्थामा– (पास में देखकर, अश्रुपूर्वक) मामा जी,

जिन सेनापति के साथ आज आप युद्धभूमि में गए थे, जो अकेले ही शूरवीरों की उत्कृष्ट युद्धरूपी खुजली को दूर करने में समर्थ थे, जिनके साथ आपके हमेशा ही विचित्र प्रकार के हासपरिहास होते रहते थे, हे मामा जी! वे आपके भगिनीपति प्रशंसनीय आचार्य आज कहाँ चले गए हैं?।। 16।।

कृपाचार्य– पीड़ा विषयक बात को तो तुम जानते ही हो। इसलिए अत्यधिक शोक के आवेग से बस करो।

अश्वत्थामा– मामा जी! मैंने विलाप करना तो छोड़ ही दिया है। इसलिए मैं तो पुत्रवत्सल पिताश्री का ही अनुगमन करता हूँ।

कृपाचार्य– पुत्र! आप जैसे वीर पुरुषों का इसप्रकार का निश्चय उचित नहीं है।

सूत– कुमार! इस दुःसाहस से बस करो।

अश्वत्थामा–आर्य! यह आप क्या कह रहे हैं?

मेरे वियोग से व्याकुल हुए पिताश्री इस संसार से परलोक को प्रस्थान कर गए हैं। इसलिए पिताजी का प्रिय मैं भला पिताजी के वियोग को कैसे सहन कर पाऊँगा?।।17।।

कृपाचार्य– पुत्र! जब तक यह संसार है, तब तक यही लोकाचार प्रसिद्ध रहेगा। 'पुत्रों द्वारा इस लोक एवं परलोक में भी पितरों का अनुवर्तन किया जाना चाहिए।' देखो,

जलांजलि प्रदान करना इत्यादि कर्मों द्वारा तथा श्राद्ध आदि के माध्यम से उनका उपकार करने में तुम जीवित रहकर अथवा फिर आत्महत्या करने में समर्थ हो।।18।।

सूत– आयुष्मन्! जैसा आपके मामा जी कह रहे हैं, तुम्हें उसी प्रकार करना चाहिए।

अश्वत्थामा– आर्य! सत्यमेवेदम्। किन्त्वतिदुर्वहत्वाच्छोकभारस्य न शक्नोमि तातविरहितः क्षणमपि प्राणान्धारयितुम्। तद्गच्छामि तमेवोद्देशं यत्र तथाविधमपि पितरं द्रक्ष्यामि। (इत्युत्तिष्ठन्खड्गमालोक्य, विचिन्त्य) कृतमद्यापि शस्त्रग्रहणविडम्बनया। (सास्रमंजलिं बद्ध्वा) भगवन् शस्त्र!

गृहीतं येनासीः परिभवभयान्नोचितमपि,
प्रभावाद्यस्याऽऽसीन्न खलु तव कश्चिन्नविषयः।
परित्यक्तं येन त्वमसि सुतशोकान्न तु भयाद्
विमोक्ष्ये शस्त्र! त्वामहमपि यतः स्वस्ति भवते।।19।।

(**अन्वय–** येन परिभव–भयात् न उचितम् अपि गृहीतम् आसीः, यस्य प्रभावात् कश्चित् तव विषयः न आसीत्, इति न खलु, येन त्वम् सुत–शोकात्, न तु भयात् परित्यक्तम् असि, हे शस्त्र! अहम् अपि त्वाम् विमोक्ष्ये, यतः भवते स्वस्ति।।19।।)

(इत्युत्सृजति)

(नेपथ्ये) **भो भो राजानः! कथमिह भवन्तः सर्वे क्षत्रियगुरो–र्भारद्वाजस्याऽसदृशं परिभवममुना नृशंसेन प्रयुक्तमुपेक्षन्ते।**

अश्वत्थामा–(आकर्ण्य, सक्रोधं शनैः शनैः शस्त्रं स्पृशन्) **किं गुरो–र्भारिद्वाजस्य परिभवः?**

(पुनर्नेपथ्ये)

आचार्यस्य त्रिभुवनगुरोर्न्यस्तशस्त्रस्य शोकाद्
द्रोणस्याऽऽजौ नयनसलिलक्षालिताऽऽर्द्राननस्य।
मौलौ पाणिं पलितधवले न्यस्य कृत्वा नृशंसं
धृष्टद्युम्नः स्वशिविरमयं याति सर्वे सहध्वम्।।20।।

(**अन्वय–** आजौ शोकात् न्यस्त–शस्त्रस्य नयन–सलिल–क्षालित–आर्द्र–आननस्य त्रिभुवन–गुरोः आचार्यस्य द्रोणस्य पलित–धवले मौलौ पाणिम् न्यस्य नृशंसम् कृत्वा, अयम् धृष्टद्युम्नः स्व–शिविरम् याति, सर्वे सहध्वम्।।20।।)

अश्वत्थामा– (सक्रोधं सकम्पं च कृपसूतौ द्रष्टा) **किं नामेदम्।**

अश्वत्थामा–आर्य, यह सत्य ही है, किन्तु शोक का भार अत्यधिक दुर्वह होने से पिताश्री से बिछुड़कर मैं क्षणभर के लिए भी जीवित रहने में असमर्थ हूँ। इसलिए उसी स्थान पर जा रहा हूँ, जहाँ उस अवस्था में पिताजी को देख सकूँ।

(इसप्रकार कहकर, उठता हुआ खड्ग देखकर, सोचकर)

अब शास्त्र धारण करने का आडम्बर व्यर्थ है।

(अश्रुपूर्वक अंजलि बाँधकर)

हे भगवन् शस्त्र!

जिन पिताश्री ने शत्रु द्वारा तिरस्कार के भय से अनुचित होते हुए भी तुम्हें धारण किया था, जिसके प्रभाव से कोई भी तुम्हारा लक्ष्य नहीं बन सका हो, ऐसा नहीं था। उन्हीं के द्वारा तुम शत्रुभय से नहीं, अपितु मेरे शोकवश छोड़ दिए गए, इसलिए हे शस्त्र! मैं भी तुम्हें त्याग रहा हूँ, तुम्हारा कल्याण होवे।।19।।

(ऐसा कहकर शस्त्र छोड़ता है)

(नेपथ्य में)

अरे, अरे राजाओं! आप लोग क्षत्रिय गुरु भारद्वाज द्रोण के प्रति इस क्रूर धृष्टद्युम्न द्वारा किए गए, इस अनुचित तिरस्कार को भला कैसे सहन कर रहे हो?

अश्वत्थामा– (सुनकर, क्रोधपूर्वक, धीरे–धीरे शस्त्र को स्पर्श करते हुए) क्या गुरु भारद्वाज का तिरस्कार?

(फिर से नेपथ्य में)

युद्ध में शोक से शस्त्र का त्याग किए हुए, अश्रुओं से भीगे हुए मुख वाले, तीनों भुवनों के गुरु आचार्य द्रोण के वृद्धावस्था से श्वेत सिर पर हाथ डालकर, क्रूरकर्म करके, यह धृष्टद्युम्न अपने शिविर को जा रहा है, तुम सब यह भला कैसे सहन कर रहे हो?।।21।।

अश्वत्थामा–(क्रोध एवं कम्पनपूर्वक कृपाचार्य तथा सारथि को देखकर) क्या यह सत्य है? कि,

प्रत्यक्षमात्तधनुषां मनुजेश्वराणां,
प्रायोपवेशसदृशं व्रतमास्थितस्य,
तातस्य मे पलितमौलिनिरस्तकाशे,
व्यापारितं शिरसि शस्त्रमशस्त्रपाणेः।।21।।

(अन्वय– आत्त–धनुषाम् मनुजेश्वराणाम् प्रत्यक्षम् प्राय–उपवेश–सदृशम् व्रतम् आस्थितस्य, अशस्त्र–पाणेः मे तातस्य पलित–मौलि–निरस्त–काशे, शिरसि शस्त्रम् व्यापारितम्।।21।।)

कृपः– वत्स! एवं किल जनः कथयति।

अश्वत्थामा– (सूतं प्रति) किं तातस्य दुरात्मना परिमृष्टमभूच्छिरः।

सूतः– (सभयम्) कुमार! आसीदयं तस्य तेजोराशेर्देवस्य नवः परिभवावतारः।

अश्वत्थामा– हा तात! हा पुत्रप्रिय! मम मन्दभागधेयस्य कृते शस्त्रपरित्यागात्तथाविधेन क्षुद्रेणाऽऽत्मा परिभावितः। (विचिन्त्य)

अथवा–

परित्यक्ते देहे रणशिरसि शोकार्तमनसा,
शिरः श्वा काको वा द्रुपदतनयो वा परिमृशेत्।
स्फुरद्दिव्याऽस्त्रौघद्रविणमदमत्तस्य च रिपो–
र्मयैवाऽयं पादः शिरसि निहितस्तस्य सहसा।।22।।

(अन्वय– रण–शिरसि शोक–आर्त–मनसा देहे परित्यक्ते श्वा काकः वा, द्रुपद–तनयः वा, शिरः परिमृशेत्, स्फुरत्–दिव्य–अस्त्र–औघ–द्रविण–मद–मत्तस्य च तस्य, रिपोः शिरसि सहसा मया एव अयम् पादः निहितः।।22।।)

आः दुरात्मन्पांचालाऽपसद!

तातं शस्त्रग्रहणविमुखं निश्चयेनोपलभ्य
त्यक्त्वा शंकां खलु विदधतः पाणिमस्योत्तमांगे।
अश्वत्थामा करधृतधनुः पाण्डुपांचालसेना
तूलोत्क्षेपप्रलयपवनः किं न यातः स्मृतिं ते।।23।।

धनुर्धारी राजाओं के सामने, व्रत धारण किए हुए प्रायः भूखे ही, अस्त्र–शस्त्र विहीन मेरे पिताश्री के श्वेत केश वाले सिर पर, शस्त्र का प्रहार किया गया?।।21।।

कृपाचार्य– पुत्र! लोग ऐसा ही कहते हैं।

अश्वत्थामा– (सारथि के प्रति) क्या उस दुष्ट ने पिताजी का स्पर्श भी किया?

सूत– कुमार! तेजोराशि उन आचार्य जी का यह प्रथम तिरस्कार था।

अश्वत्थामा– हा तात! हा पुत्रवत्सल! मुझ मन्दभाग्य के कारण शस्त्र का परित्याग करने से उस नीच ने उसप्रकार आपकी आत्मा का तिरस्कार किया। (विचार करके) अथवा,

युद्ध में शोक से व्याकुल होने से देहत्याग करने पर, कुत्ता, कौआ अथवा द्रुपद का पुत्र कोई भी सिर को छुए, दीपित होते हुए दिव्य अस्त्रसमूह रूपी धनमद में पागल बने हुए, उस शत्रु धृष्टद्युम्न ने पिताजी के सिर का ही स्पर्श नहीं किया, अपितु अकस्मात् मेरे सिर पर ही पैर रख दिया है।।22।।

आः! दुरात्मन्, नीच पांचाल!

पिताश्री को शस्त्र धारण करने से विमुख निश्चय वाला समझकर निःशंक होकर, इनके सिर पर हाथ रखते हुए, वस्तुतः तुझे, धनुष हाथ में पकड़े पाण्डवों एवं पांचाल राजाओं की सेनारूपी रुई को उड़ा देने वाला, प्रलयकालीन पवन, यह अश्वत्थामा स्मृतिपथ में नहीं आया?।।23।।

शब्दार्थ– आत्त–धारण किए हुए, मनुजेश्वर–राजा, शिरसि–सिर पर, व्यापारितम्–प्रहार किया, कथयति–कह रहा है, सभयम्–भयपूर्वक, आसीत्–था, अयम्–यह, नवः–नया, पहला, परिभवावतारः–तिरस्कार किया, हा–दुःखसूचक अव्यय, मन्दभागधेयस्य–मन्दभाग्य के, कृते–लिए, तथाविधेन–उसप्रकार से।

(अन्वय– तातम् शस्त्र–ग्रहण–विमुखम् निश्चयेन उपलभ्य, शंकाम् त्यक्त्वा, अस्य उत्तमांगे पाणिम् विदधतः खलु, ते कर–धृत–धनुः पाण्डु–पांचाल–सेना–तूला–उत्क्षेप–प्रलय–पवनः अश्वत्थामा किम् स्मृतिम् न यातः? ।।23।।)

युधिष्ठिर! युधिष्ठिर! अजातशत्रो! अमिथ्यावादिन्! धर्मपुत्र! सानुजस्य ते किमनेनापकृतम्। अथवा किमनेनाऽलीकप्रकृतिजिह्मचेतसा। अर्जुन! सात्यके! बाहुशालिन्वृकोदर! माधव! युक्तं नाम भवतां सुराऽसुरमनुजलोकैकधनुर्धरस्य द्विजन्मनः परिणतवयसः सर्वाचार्यस्य विशेषतो मम पितुरमुना द्रुपदकुलकलंकेन मनुजपशुना स्पृश्यमानमुत्तमांगमुपेक्षितुम्। अथवा सर्व एवैते पातकिनः। किमेतैः–

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना–
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम्।।24।।

(अन्वय– यैः निर्मर्यादैः मनुज–पशुभिः उत्–आयुधैः भवद्भिः इदम् गुरु–पातकम् कृतम्, अनुमतम्, दृष्टम् वा, नरक–रिपुणा सार्धम् सभीम–किरीटिनाम् तेषाम् असृङ्–मेदः–मांसैः अयम् अहम् दिशाम् बलिम् करोमि ।।24।।)

कृपः– वत्स! किं न सम्भाव्यते भारद्वाजतुल्ये बाहुशालिनि दिव्यास्त्रग्रामकोविदे भवति।

अश्वत्थामा– भो भोः! पाण्डवमत्स्यसोमकमागधाद्याः क्षत्रियापसदाः!

पितुर्मूर्ध्नि स्पृष्टे ज्वलदनलभास्वत्परशुना,
कृतं यद्रामेण श्रुतिमुपगतं तन्न भवताम्।
किमद्याऽश्वत्थामा तदरिरुधिरासारविघसं,
न कर्म क्रोधान्धः प्रभवति विधातुं रणमुखे।।25।।

(अन्वय– पितुः मूर्ध्नि स्पृष्टे, ज्वलत्–अनल–भास्वत्–परशुना, रामेण यत् कृतम्, तत् भवताम् श्रुतिम् न उपगतम्? क्रोध–अन्धः

हे युधिष्ठिर! युधिष्ठिर, हे अजातशत्रो! हे असत्य न बोलने वाले, धर्मराज के पुत्र, भाइयों सहित इन्होंने तुम्हारा क्या अपकार किया था? अथवा मिथ्या स्वभाव वाले, कुटिल चित्त सम्पन्न इस युधिष्ठिर से भी क्या कहना है? अरे अर्जुन, सात्यकि, बाहुबली भीम, माधव, देवताओं, दानवों और मनुष्यों के लोक में अद्वितीय धनुर्धर ब्राह्मण, वृद्धावस्था को प्राप्त, सभी के आचार्य एवं विशेषरूप से मेरे पिताश्री का, द्रुपद के कुल के कलंकरूप, मनुष्यरूपधारी पशु धृष्टद्युम्न द्वारा आप सभी के देखते–देखते, सिर के स्पर्श की उपेक्षा किया जाना क्या उचित था? अथवा ये सब भी तो पापी हैं, इसलिए इनसे भी क्या कहना?

अमर्यादित, मनुष्यों में नीच, शस्त्रधारी, आप जिन लोगों द्वारा यह भयंकर पाप किया गया है, इसका समर्थन किया है या फिर इसे देखा भी है, नरक के शत्रु श्रीकृष्ण सहित, भीम, अर्जुन आदि उन सभी पापियों के रक्त, मज्जा, मांस से यह मैं अश्वत्थामा दिशाओं को बलि प्रदान कर रहा हूँ।। 24।।

कृपाचार्य– वत्स! भारद्वाज के समान, बाहुबली, दिव्य अस्त्रों के समूह में निपुण आपमें सभी कुछ सम्भव है।

अश्वत्थामा– अरे! अरे! पाण्डव, मत्स्य, सोमक, मागध आदि नीच क्षत्रियों!

पिताश्री के सिर का स्पर्श करने पर, जलती हुई अग्नि के समान, दीप्त परशु वाले, जामदग्नि ने जो कर्म किया था, वह क्या आप लोगों ने नहीं सुना है? आज क्रोध से अन्धा हुआ अश्वत्थामा युद्धभूमि में शत्रुओं के रुधिर वर्षणरूप पितृतर्पण कर्म करने के लिए क्या समर्थ नहीं है?।।25।।

शब्दार्थ– उपलभ्य–प्राप्त करके, त्यक्त्वा–त्याग करके, यातः–गया, अपकृतम् –अपकार को, द्विजन्मनः–ब्राह्मण का, अमुना–इसके द्वारा, मनुजपशुना– मनुष्यों में पशु द्वारा, स्पृश्यमानम्–स्पर्श करने वाले को, उत्तमांगम्–सिर को, उपेक्षितुम्–उपेक्षा करने के लिए, एते–ये, पातकिनः–पापी, निर्मर्यादैः–मर्यादा रहितो द्वारा, अनुमतम्–अनुमति दी गयी, असृङ्–रक्त, करोमि–कर रहा हूँ।

अश्वत्थामा अद्य रणमुखे अरि–रुधिर–आसार–विघसं, तत् कर्म विधातुं प्रभवति न किम्? ।।25।।)

(सूतमुद्दिश्य) सूतः! गच्छ त्वं सर्वोपकरणैः सांग्रामिकैः सर्वायुधैरुपेतं महाहवलक्षणं नामाऽस्मत्स्यन्दनमुपनयः।

सूतः– यदाज्ञापयति कुमारः।

(इति निष्क्रान्तः)

कृपः– वत्स! अवश्यप्रतिकर्तव्येऽस्मिन्दारुणे निकाराग्नौ सर्वेषामस्माकं कोऽन्यस्त्वामन्तरेण शक्तः प्रतिकर्तुम्। किन्तु–

अश्वत्थामा– किमतः परम्।

कृपः– सेनापत्येऽभिषिच्य भवन्तमिच्छामि समरभुवमवतारयितुम्।

अश्वत्थामा– मातुल! परतन्त्रमिदमकिंचित्करं च।

कृपः– वत्स! न खलु परतन्त्रं नाकिंचित्करं च। पश्य–

भवेदभीष्ममद्रोणं धार्तराष्ट्रबलं कथम्।
यदि तत्तुल्यकक्ष्योऽत्र भवान्धुरि न युज्यते।।26।।

(अन्वय– यदि अत्र तत्–तुल्य–कक्ष्यः भवान् धुरि न युज्यते, अभीष्मम् अद्रोणम् धार्तराष्ट्र–बलम् कथम् भवेत्? ।।26।।)

कृतपरिकरस्य भवादृशस्य त्रैलोक्यमपि न क्षमं परिपन्थीभवितुं किं पुनर्युधिष्ठिरबलम्। तदेवं मन्ये परिकल्पिताभिषेकोपकरणः कौरवराजो नचिरात्त्वामेवाभ्युदीक्षमाणस्तिष्ठतीति।

अश्वत्थामा– यद्येवं त्वरते मे परिभवाऽनलदह्यमानमिदं चेतस्तत प्रतीकारजलावगाहनाय। तदहं गत्वा तातवधविषण्णमानसं कुरुपतिं सेनापत्यस्वयंग्रहणप्रणयसमाश्वासनया मन्दसन्तापं करोमि।

शब्दार्थ– अद्य–आज, विधातुम्–करने के लिए, उद्दिश्य–लक्ष्य करके, गच्छ–जाओ, स्यन्दनम्–रथ को, उपनय–लाओ, निक्रान्तः–निकल जाता है, अभिषिच्य–अभिषेक करके, अवतारयितुम्–उतारने के लिए, पश्य–देखो।

(सारथि को लक्ष्य करके) हे सारथि! जाओ और सभी प्रकार के उपकरणों एवं युद्ध सम्बन्धी सभी आयुधों से युक्त, भयंकर युद्ध के लक्षणों वाला हमारा रथ ले आओ।

सूत– कुमार की जो आज्ञा। **(यह कहकर निकल जाता है)**

कृपाचार्य–वत्स! अनिवार्यरूप से बदला लेने योग्य, इस तिरस्कार रूपी अग्नि में हम सभी लोगों में तुम्हारे अलावा प्रतिकार करने में भला दूसरा कौन समर्थ है? किन्तु,

अश्वत्थामा– तो फिर इससे अधिक क्या?

कृपाचार्य– मैं तो सेनापति पद पर अभिषिक्त करके, आपको युद्ध भूमि में उतारना चाहता हूँ।

अश्वत्थामा– मातुलश्री! यह तो पराधीन एवं व्यर्थ ही है।

कृपाचार्य– वत्स! यह न तो पराधीनता है और न ही बेकार है, देखो–

यदि भीष्म एवं द्रोणाचार्य की श्रेणी वाले आप, इस युद्ध में सेनापति पद पर अभिषिक्त नहीं किए जाते हैं, तो फिर भीष्म तथा द्रोण से विहीन कौरव सेना, वास्तविक सेना भला कैसे हो सकती है?।।26।।

इसके अलावा युद्ध करने के लिए सन्नद्ध, आप जैसे वीर के अलावा तीनों लोकों में कोई समर्थ भी नहीं है, फिर युधिष्ठिर की सेना का तो कहना ही क्या? इसलिए मैं मानता हूँ कि अभिषेक करने की सामग्री तैयार किए हुए, कौरवराज अविलम्ब तुम्हारी ही प्रतीक्षा कर रहे हैं।

अश्वत्थामा– यदि ऐसा है तो तिरस्काररूपी अग्नि से व्याकुल मेरा हृदय, उससे बदला लेने की शीघ्रता कर रहा है। इसलिए पिताश्री के वध से दुःखी हृदय कुरुपति के सेनापति पद को स्वयं ग्रहण करने का आग्रह करने की प्रणय सान्त्वना द्वारा, मैं अपने सन्ताप को कम करना चाहता हूँ।

कृपः– वत्स! एवमिदम्! अतस्तमेवोद्देशं गच्छावः।

(इति परिक्रामतः)

(ततः प्रविशतः कर्णदुर्योधनौ)

दुर्योधनः– अंगराज!

तेजस्वी रिपुहतबन्धुदुःखपारं,
बाहुभ्यां व्रजति धृतायुधप्लवाभ्याम्।
आचार्यः सुतनिधनं निशम्य संख्ये
किं शस्त्रग्रहणसमये विशस्त्र आसीत्।।27।।

(अन्वय– तेजस्वी धृत–आयुध–प्लवाभ्याम् बाहुभ्याम् रिपु–हत–बन्धु–दुःख–पारम् व्रजति आचार्यः संख्ये सुत–निधनम् निशम्य शस्त्र–ग्रहण–समये, विशस्त्रः किम् आसीत्।।27।।)

अथवा सूक्तमिदमभियुक्तैः 'प्रकृतिर्दुस्त्यजेति'। यतः शोकान्धमनसा तेन विमुच्य क्षत्रधर्मकार्कश्यं द्विजातिधर्मसुलभो दैन्यपरिग्रहः कृतः।

कर्णः– राजन्! कौरवेश्वर! न खल्विदमेवम्।

दुर्योधनः– कथं तर्हि।

कर्णः– एवं किल द्रोणस्याऽभिप्राय आसीत्–यथाऽश्वत्थामा मया पृथिवीराज्येऽभिषेक्तव्य इति। तस्याभावाद वृद्धस्य मे ब्राह्मणस्य वृथा शस्त्रग्रहणमिति तथा कृतवान्।

दुर्योधनः– (सशिरः कम्पम्) एवमिदम्।

कर्णः– एतदर्थं च कौरवपाण्डवपक्षपातप्रवृत्तमहासंग्रामस्य राजकस्य परस्परक्षयमपेक्षमाणेन तेन प्रधानपुरुषवध उपेक्षा कृता।

दुर्योधनः– उपपन्नमिदम्।

कृपाचार्य– वत्स! यह ऐसा ही है। इसलिए हम दोनों उसी स्थान पर चलते हैं।

(ऐसा कहकर दोनों घूमते हैं)

(उसके बाद कर्ण और दुर्योधन दोनों प्रवेश करते हैं)

दुर्योधन– अंगराज!

तेजस्वी आचार्य आयुधरूपी प्लव हाथ में लेकर, शत्रु द्वारा मारे गए, यह कथन बन्धुओं को शोक के तट पर पहुँचाने वाला है, किन्तु आचार्य जी पुत्र के निधन को सुनकर, युद्धभूमि में शस्त्र धारण करने की अपेक्षा शस्त्रविहीन क्यों हो गए?।।27।।

अथवा नीतिज्ञ विद्वानों ने ठीक ही कहा है कि व्यक्ति अपने स्वभाव को अत्यधिक कठिनता से छोड़ पाता है। यही कारण है कि शोक से अन्धे हृदय वाले, आचार्य ने भी क्षत्रियधर्म के लिए उचित कर्कशता का परित्याग करके, ब्राह्मण–सुलभ दीनता को स्वीकार कर लिया।

कर्ण– हे राजन्! कौरवपति! वास्तव में यह ऐसा नहीं है।

दुर्योधन– तो फिर क्या है?

कर्ण– निश्चय ही, द्रोण का यह अभिप्राय था कि–'अश्वत्थामा को मुझे महाराज पद पर अभिषिक्त करना था।' इसलिए उसके न रहने से मुझ ब्राह्मण का शस्त्र धारण करना व्यर्थ है। इसीलिए उन्होंने शस्त्र का परित्याग कर दिया।

दुर्योधन– (सिर हिलाते हुए) यह ऐसा ही है।

कर्ण– और इसीलिए कौरव–पाण्डवों के पक्षपात में लगे हुए, राजसमूह के महासंग्राम में आपस में विनाश की अपेक्षा करते हुए, उन्होंने प्रमुख वीरों के वध के प्रति उपेक्षा की।

दुर्योधन– यही उचित है।

कर्णः— अन्यच्च राजन्! द्रुपदेनाऽप्यस्य बाल्यात्प्रभृत्यभिप्रायवेदि न स्वराष्ट्रे वासो दत्तः।

दुर्योधनः— साधु, अंगराज! साधु! निपुणमभिहितम्।

कर्णः— न चाऽयं ममैकस्याऽभिप्रायः। अन्येऽभियुक्ता अपि नैवेदन्यथा मन्यन्ते।

दुर्योधनः— एवमेतत्। कः सन्देहः?

दत्त्वाऽभयं सोऽतिरथो बध्यमानं किरीटिना।
सिन्धुराजमुपेक्षेत नैवं चेत्कथमन्यथा।।28।।

(अन्वय— एवम् न चेत् अन्यथा कथम् अति–रथः सः अभयं दत्त्वा किरीटिना बध्यमानम् सिन्धुराजम् उपेक्षेत।।28।।)

कृपः— (विलोक्य) वत्स! एष दुर्योधनः सूतपुत्रेण सहास्य न्यग्रोधच्छायायामुपविष्टस्तिष्ठति। तदुपसर्पावः। (तथा कृत्वा)

उभौ— विजयतां विजयतां कौरवेश्वरः।

दुर्योधनः— (दृष्ट्वा) अये! कथं कृपोऽश्वत्थामा च।

(आसनादवतीर्य कृपं प्रति)

गुरो अभिवादये। (अश्वत्थानममुद्दिश्य)

आचार्य पुत्र!

एह्यस्मदर्थंहततात! परिष्वजस्व,
क्लान्तैरिदं मम निरन्तरमंगमंगैः।
स्पर्शस्तवैष भुजयोः सदृशः पितुस्ते,
शोकेऽपि यो महति निवृत्तिमादधाति।।29।।

(अन्वय— अस्मद अर्थम् हततात! एहि, क्लान्तैः अंगैः इदम् मम अंगम् निरन्तरम् परिष्वजस्व, तव भुजयोः एषः स्पर्शः ते पितुः सदृशः यः महति शोके अपि निवृत्तिम् आदधाति।।29।।)

(आलिङ्ग्य पार्श्वं उपवेशयति)

(अश्वत्थामा बाष्पमुत्सृजति)

कर्ण– हे राजन्! इसके अलावा बाल्यकाल से ही इनके अभिप्राय को समझने वाले, द्रुपद ने भी इसीलिए इन्हें अपने राज्य में निवास प्रदान नहीं किया।

दुर्योधन– साधु, अंगराज! साधु। तुमने बिल्कुल ठीक कहा।

कर्ण– यह मुझ अकेले का ही विचार नहीं है, अपितु दूसरे नीतिज्ञ लोग भी इस विचार को अन्यथा नहीं मानते हैं।

दुर्योधन– यह ऐसा ही है, इसमें क्या सन्देह है?

यदि ऐसा न होता तो अतिरथी द्रोण, जयद्रथ को निर्भय बनाकर, अर्जुन द्वारा मारे जाते हुए, उसकी उपेक्षा भला क्यों करते?।।28।।

कृपाचार्य– (देखकर) वत्स! सूतपुत्र कर्ण के साथ यह दुर्योधन, इस बरगद की छाया में विराजमान हैं। इसलिए हम दोनों पास चलते हैं। **(वैसा करके)**

दोनों– महाराज कौरवेश्वर की जय हो, विजय हो।

दुर्योधन– (देखकर) अरे! क्या कृपाचार्य और अश्वत्थामा हैं? (आसन से उतरकर, कृपाचार्य के प्रति) हे गुरो! मैं आपको प्रणाम करता हूँ (अश्वत्थामा को लक्ष्य करके)

हमारे लिए पितृवध को सहन करने वाले, आचार्यपुत्र! आओ और क्लेशयुक्त अंगों से इस मेरे शरीर का निरन्तर आलिंगन करो, क्योंकि तुम्हारी भुजाओं का यह स्पर्श तुम्हारे पिता के समान ही है, जो महान् लोक में भी शान्ति प्रदान करने वाला है।।29।।

(आलिंगन करके पास में बैठा देता है)

(अश्वत्थामा आँसू छोड़ता है)

शब्दार्थ– अन्यत् च–और भी, प्रभृति–लेकर, दत्तः–प्रदान किया, अभिहितम्–कहा, दत्वा–देकर, चेत्–यदि, उपविष्टः–बैठा हुआ, उपसर्पावः–पास जाते हैं, अवतीर्य–उतरकर, परिष्वजस्व–आलिंगन करो।

कर्णः– द्रौणायने! अलमत्यर्थमात्मानं शोकानले प्रक्षेप्तुम्।

दुर्योधनः– आचार्यपुत्र! को विशेष आवयोरस्मिन्व्यसनमहार्णवे। पश्य–

तातस्तव प्रणयवान्स पितुः सखा मे,
शस्त्रे यथा तव गुरुः स तथा ममापि।
किं तस्य देहनिधने कथयामि दुःखं
जानीहि तद् गुरुशुचा मनसा त्वमेव।।30।।

(अन्वय– सः तव तातः मे पितुः प्रणयवान् सखा, सः यथा शस्त्रे तव गुरुः तथा मम अपि, तस्य देह–निधने किम् दुःखम् कथयामि गुरु–शुचा मनसा तत् त्वम् एव जानीहि ।।30।।)

कृपः– वत्स! यथाह कुरुपतिस्तथैवेतत्।

अश्वत्थामा– राजन्! एवं पक्षपातिनि त्वयि युक्तमेव शोकभारं लघूकर्तुम्। किन्तु–

मयि जीवति मत्तातः केशग्रहमवाप्तवान्।
कथमन्ये करिष्यन्ति पुत्रेभ्योऽपुत्रिणः स्पृहाम्।।31।।

(अन्वय– मयि जीवति मत् तातः! केश–ग्रहम् अवाप्तवान्, अन्ये अपुत्रिणः पुत्रेभ्यः स्पृहाम् कथम् करिष्यन्ति? ।।31।।)

कर्णः– द्रौणायने! किमत्र क्रियते यदनेनैव सर्वपरिभवपरित्राणहेतुना शस्त्रमुत्सृजता तादृशीमवस्थामात्मा नीतः।

अश्वत्थामा– अंगराज! किमाह भवान्किमत्र क्रियत इति। श्रूयतां यत्क्रियते।

यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो यः पांचालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्यान्तकोऽहम्।

(अन्वय– पाण्डवीनाम् चमूनाम् स्व–भुज–गुरु–मदः यः यः शस्त्रम् बिभर्ति, पांचाल–गोत्रे यः यः शिशुः, अधिक–वयाः गर्भ–शय्याम् गतः वा,

कर्ण– हे द्रोणपुत्र! स्वयं को अत्यधिक शोक की अग्नि में डालने से बस करो।

दुर्योधन– आचार्यपुत्र! इस महान् विपत्ति के सागर में हम दोनों एक समान ही हैं, देखो–

वे तुम्हारे पिताश्री हमारे पिताजी के प्रणयवान् मित्र थे तथा वे शस्त्र विद्या में जिसप्रकार तुम्हारे गुरु थे, उसीप्रकार मेरे भी थे, उनके निधन पर मुझे कितना दुःख है, यह मैं क्या कहूँ? आप स्वयं अपने दुःखी मन से ही समझ लें।।30।।

कृपाचार्य– वत्स! जैसा कुरुपति कह रहे हैं, यह वैसा ही है।

अश्वत्थामा– राजन्! इसप्रकार के पक्षपाती आपमें, शोक के भार को कम करना उचित ही है, किन्तु–

मेरे जीवित रहते हुए, मेरे पिताजी ने केशग्रहण को प्राप्त किया, तो फिर दूसरे पुत्रहीन व्यक्ति, पुत्रवान् होने की कामना भला क्यों करेंगे?।।31।।

कर्ण– हे द्रोणपुत्र! इस विषय में क्या किया जाए? क्योंकि सभी को परिभव से बचाने के कारणरूप तुम्हारे पिताजी ने स्वयं ही अस्त्र को छोड़ते हुए, स्वयं को उस प्रकार की इस दशा में पहुँचा दिया।

अश्वत्थामा– अंगराज! आपने क्या कहा? 'इस विषय में क्या किया जाए?' सुनिए, मेरे द्वारा जो किया जा सकता है–

पाण्डव पक्ष की सेनाओं के बीच में, अपनी भुजाओं के भारी मद वाले, जो–जो वीर शस्त्र धारण करने वाले हैं, पांचाल गोत्र में जो–जो बालक, युवक अथवा गर्भ में स्थित हैं और जिस–जिसने पिताजी के इस वधकर्म को देखा है, रणभूमि में मेरे पराक्रम करने पर, जो जो विपरीत युद्ध करने वाले हैं, अधिक क्या? क्रोध से अन्धा हुआ मैं इस युद्ध में यमराज का भी अन्त करने वाला हूँ।।32।।

यः यः तत् कर्म साक्षी, मयि रणे चरति, यः च यः च प्रतीपः, क्रोध–अन्धः अहम् जगताम् अन्तकस्य अपि तस्य तस्य स्वयम् अन्तकः (अस्मि)।।32।।)

अपि च। भो जामदग्न्यशिष्य कर्ण!

देशः सोऽयमरातिशोणितजलैर्यस्मिन्ह्रदाः पूरिताः
क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः।
तान्येवाऽहितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वन्ति मे,
यद्रामेण कृतं तदेव कुरुते द्रौणायनिः क्रोधनः।।33।।

(अन्वय– यस्मिन् ह्रदाः अराति–शोणित–जलैः पूरिताः, सः अयम् देशः, तथा–विधः तातस्य केशग्रहः परिभवः क्षत्रात् एव, तानि एव अहित–शस्त्र–घस्मर–गुरूणि भास्वन्ति मे अस्त्राणि, यत् रामेण कृतम् तत् एव क्रोधनः द्रौणायनिः कुरुते ।।33।।)

दुर्योधनः– आचार्यपुत्र! तस्य तथाविधस्याऽनन्यसाधारणस्य ते वीरभावस्य किमन्यत्सदृशम्।

कृपः– राजन्! सुमहान्खलु द्रोणपुत्रेण वोढुमध्यवसितः समरभरः। तदहमेवं मन्ये भवता कृतपरिकरोऽयमुच्छेत्तुं लोकत्रयमपि समर्थः। किं पुनर्यौधिष्ठिरबलम्। अतोऽभिषिच्यतां सेनापत्ये।

दुर्योधनः– सुष्ठु, युज्यमानभिहितं युष्माभिः, किन्तु प्राक्प्रतिपन्नोऽयमर्थोऽङ्गराजस्य।

कृपः– राजन्! असदृशपरिभवशोकसागरे निमज्जन्तमेनमंगराज–स्याऽर्थे नैवोपेक्षितुं युक्तम्। अस्याऽपि तदेवाऽरिकुलमनुशासनीयम्। अतः किमस्य पीडा न भविष्यति।

अश्वत्थामा– राजन् कौरवेश्वर! किमद्यापि युक्ताऽयुक्तविचारणया।

प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा–
मकेशवमपाण्डवं भुवनमद्य निःसोमकम्।
इयं परिसमाप्यते रणकथाऽद्य दोःशालिना–
मपैतु नृपकाननातिगुरुरद्य भारो भुवः।।34।।

और भी, हे परशुराम के शिष्य कर्ण!

यह वही देश है, जिसमें शत्रुओं के रुधिररूपी जल से जलाशयों को भरा गया था, जमदग्नि के समान ही मेरे पिताश्री का केश ग्रहण क्षत्रिय द्वारा ही किया गया है, मेरे अस्त्र भी परशुराम के अस्त्रों के समान ही, शत्रुओं के शस्त्रों को खा जाने वाले, भयंकर एवं देदीप्यमान हैं। (अधिक कहने से क्या?) **पिता के वध के प्रतिकार में जो कर्म जामदग्न्य परशुराम ने किया था, वैसा ही क्रूरकर्म द्रोणपुत्र अश्वत्थामा भी क्रोध से करने जा रहा है।।33।।**

दुर्योधन– आचार्य पुत्र! उसप्रकार के अनन्य साधारण वीर तुम्हारे लिए, दूसरा क्या करने योग्य हो सकता है?

कृपाचार्य– राजन्! द्रोणपुत्र द्वारा निश्चय किया गया, यह समर भार वस्तुतः अत्यधिक महान् है, इसलिए मैं ऐसा मानता हूँ, कि आपके द्वारा सन्नद्ध किया गया यह, युधिष्ठिर सम्बन्धी सैन्यबल की तो बात ही क्या? अपितु यह तो त्रिभुवन को भी नष्ट करने में समर्थ है। इसलिए आप इन्हें **सेनापति पद** पर अभिषिक्त कर दें।

दुर्योधन– अच्छा है, आपने ठीक ही कहा है, किन्तु यह पद अंगराज कर्ण के लिए पहले ही निश्चित किया जा चुका है।

कृपाचार्य– राजन्! अनुचित शोकरूपी सागर में डूबे हुए, इन अश्वत्थामा की, अंगराज के कारण उपेक्षा करना उचित नहीं है, क्योंकि इनके द्वारा भी तो विनाश उन्हीं शत्रुओं का होगा। इसलिए क्या इससे इन्हें पीड़ा नहीं होगी?

अश्वत्थामा– हे राजन्, हे कौरवेश्वर! क्या आज भी उचित–अनुचित पर विचार करना है?

आज ही आप सूत एवं मागधों द्वारा स्तुतिगान कर जगाए जाने के लिए सोएँगे। आज ही संसार केशवहीन, पाण्डवशून्य तथा चन्द्रवंश से विहीन हो जाएगा। आज ही बाहुवीरों की कथा समाप्त हो जाएगी। आज ही नृपरूपी वन का पृथ्वी का अत्यन्त दुर्वह भार दूर हो जाएगा।।34।।

(अन्वय– अद्य स्तुतिभिः प्रयत्न–परिबोधितः, निशाम् शेषे, अद्य भुवनम् अकेशवम्, अपाण्डवम् निःसोमकम् च, अद्य दोःशालिनाम् इयम् रण–कथा परि–समाप्यते, अद्य नृप–कानन–अति–गुरुः भुवः भारः अपैतु।।34।।)

कर्णः– (विहस्य) द्रौणात्मज! वक्तुं सुकरमिदं दुष्करमध्यवसितुम्। बहवः कौरवबलेऽस्य कर्मणः शक्ताः।

अश्वत्थामा– अंगराज! एवमिदम्। बहवः कौरवबलेऽत्र शक्ताः, किन्तु दुःखोपहतः शोकावेगवशाद् ब्रवीमि न पुनर्वीरजनाधिक्षेपेण।

कर्णः– मूढ़! दुःखितस्याऽश्रुपातः कुपितस्य चाऽऽयुधद्वितीयस्य संग्रामाऽवतरणमुचितं नैवविधां प्रलापाः।

अश्वत्थामा– (सक्रोधम्) अरे रे राधागर्भभारभूत! सूतापसद! ममापि नामाश्वत्थाम्नो दुःखितस्याश्रुभिः प्रतिक्रियामुपदिशसि न शस्त्रेण। पश्य–

निर्वीर्यं गुरुशापभाषितवशात्किं मे तवेवाऽऽयुधं,
सम्प्रत्येव भयाद्विहाय समरं प्राप्तोऽस्मि किं त्वं यथा।
जातोऽहं स्तुतिवंशकीर्तनविदां किं सारथीनां कुले
क्षुद्राऽरातिकृताऽप्रियं प्रतिकरोम्यस्रेण नास्त्रेण यत्।।35।

(अन्वय– मे आयुधम् तव इव गुरु–शाप–भाषित–वशात् किम् निर्वीर्यम्? यथा त्वम् सम्प्रति एव भयात् समरम् विहाय प्राप्तः, (तथा) किम् (प्राप्तः) अस्मि? स्तुति–वंश–कीर्तन–विदाम् सारथीनाम् कुले अहम् जातः किम्? यत् क्षुद्र–आराति–कृत–अप्रियम् अस्रेण करोमि, अस्त्रेण न प्रति (करोमि)।।35।।)

कर्णः– (सक्रोधम्) अरे रे वाचाट! वृथाशस्त्रग्रहणदुर्विदग्ध! वटो!

निर्वीर्यं वा सवीर्यं वा मया नोत्सृष्टमायुधम्।
यथा पांचालभीतेन पित्रा ते बाहुशालिना।।36।।

(अन्वय– निर्वीर्यम् वा, स–वीर्यम् वा, मया आयुधम् न उत्सृष्टम्, यथा पांचाल–भीतेन बाहु–शालिना ते पित्रा (उत्सृष्टम्)।।36।।)

अपि च –

कर्ण– (हँसकर) हे द्रोणपुत्र! कहना आसान है, किन्तु कर पाना अत्यन्त मुश्किल है। कौरव सेना में बहुत से लोग इस काम को करने में समर्थ हैं।

अश्वत्थामा– अंगराज! यह ऐसा ही है कि कौरव सेना में बहुत से लोग शक्तिशाली हैं, किन्तु दुःख से पीड़ित शोक के आवेग के कारण ही मैं ऐसा कह रहा हूँ, वीरों पर आक्षेप नहीं कर रहा हूँ।

कर्ण– मूर्ख! दुःखी व्यक्ति का आँसू बहाना, क्रुद्ध एवं शस्त्रधारी का युद्ध में उतरना ठीक होता है, इसप्रकार का प्रलाप करना नहीं।

अश्वत्थामा– (क्रोधपूर्वक) अरे, रे, राधा के गर्भ के भारस्वरूप! नीच सूत! मुझ दुःखी अश्वत्थामा को आँसू बहाकर, प्रतिक्रिया करने की शिक्षा दे रहा है, शस्त्र से नहीं। देख,

मेरा शस्त्र क्या तुम्हारे आयुध के समान गुरु के शाप के कारण शक्तिहीन हो गया है?, जिसप्रकार तुम अभी भयभीत होकर युद्ध छोड़कर भाग आए हो, क्या मैं भी वैसा ही कायर हूँ? क्या मैं तुम्हारे समान वंशजों के स्तुतिगान करने वाले, सूत–मागधों के वंश में उत्पन्न हुआ हूँ? जो नीच शत्रुओं द्वारा किए गए, अप्रिय कर्म के लिए, इसका प्रतिकार अस्त्र से न करके, आँसुओं से करूँ?।।35।।

कर्ण– (क्रोधपूर्वक) अरे, रे व्यर्थ बकवाद करने वाले! व्यर्थ ही शस्त्र ग्रहण करने के कारण मूर्ख बालक!

बलहीन या बल से युक्त मैंने, धृष्टद्युम्न से भयभीत, बाहुशाली तुम्हारे पिता के समान शस्त्र का परित्याग नहीं किया है।।36।।

और भी,

शब्दार्थ– प्रयत्नपरिबोधितः–प्रयत्नपूर्वक जगाया गया, अपैतु–दूर होवे, विहस्य–हँसकर, वक्तुम्–कहने के लिए, बहवः–बहुत से, ब्रवीमि–कहता हूँ, मूढ–मूर्ख, जातः–उत्पन्न हुआ, अस्रेण–आँसुओं से, उत्सृष्टम्–छोड़ा।

सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम्।
दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्।।37।।

(अन्वय– सूतः वा, सूत–पुत्रः वा, यः वा कः वा अहम् भवामि, कुले जन्म तु दैवायत्तम्, पौरुषम् मदायत्तम्।।37।।)

अश्वत्थामा– (सक्रोधम्) अरे रे रथकारकुलकलंक! अरे राधा–गर्भभारभूत! आयुधानभिज्ञ! तातमप्यधिक्षिपसि। अथवा–

स भीरुः शूरो वा प्रथितभुजसारस्त्रिभुवने
कृतं यत्तेनाऽऽजौ प्रतिदिनमियं वेत्ति वसुधा।
परित्यक्तं शस्त्रं कथमिति स शस्त्रवृतधरः
पृथासूनुः साक्षी त्वमसि रणभीरो! क्व नु तदा।।38।।

(अन्वय– सः भीरुः, शूरः वा, त्रिभुवने प्रथित–भुज–सारः, तेन आजौ प्रतिदिनम् यत् कृतम्, इयम् वसुधा वेत्ति, शस्त्रम् कथम् परित्यक्तम्, इति सः शस्त्र–वृत–धरः पृथा–सूनुः साक्षी, रणभीरो! तदा त्वम् क्व नु असि?।।38।।)

कर्णः– (विहस्य) एवं भीरुरहम्। त्वं पुनर्विक्रमैकरसः स्वपितरम–नुस्मृत्य न जाने किं करिष्यसीति महान्मे संशयो जातः। अपि च रे मूढ!

यदि शस्त्रमुज्झितमशस्त्रपाणयो
न निवारयन्ति किमरीनुदायुधान्।
यदनेन मौलिदलनेऽप्युदासितं
सुचिरं स्त्रियेव नृपचक्रसन्निधौ।।39।।

(अन्वय– यदि शस्त्रम् उज्झितम् (तेन किम्) अशस्त्र–पाणयः, उत् आयुधान् अरीन् न निवारयन्ति किम्? यत् अनेन नृप–चक्र–सन्निधौ मौलि–दलने अपि स्त्रिया इव सुचिरम् उदासितम्।।39।।)

अश्वत्थामा– (सक्रोधं सकम्पं च) दुरात्मन्! राजवल्लभप्रगल्भ! सूतापसद! असम्बद्धप्रलापिन्!

कथमपि न निषिद्धो दुःखिना भीरुणा वा
द्रुपदतनयपाणिस्तेन पित्रा ममाऽद्य।

मैं सूत हूँ या सूतपुत्र हूँ, जो कुछ भी हूँ। कुल में जन्म ग्रहण करना तो भाग्य के अधीन है, जबकि पौरुष करना ही मुझ पर निर्भर है।।37।।

अश्वत्थामा– (क्रोधपूर्वक) अरे, रे! सारथियों के वंश के कलंक! राधा के गर्भ के भाररूप! शस्त्रों से अनभिज्ञ! पिताजी पर भी आक्षेप कर रहे हो? ? अथवा–

वे डरपोक थे या वीर थे, किन्तु तीनों लोकों में उनका भुजबल प्रसिद्ध था, युद्ध में उन्होंने रोज़ाना ही जो पराक्रम प्रदर्शित किया, इसे सारी वसुधा जानती है, उन्होंने शस्त्र का परित्याग क्यों किया? इस बात के साक्षी शस्त्रव्रती युधिष्ठिर हैं। हे युद्धभीरु! जब पिताश्री ने शस्त्र त्याग किया, उस समय तुम कहाँ पर थे?।। 38।।

कर्ण– (हँसकर) ऐसा ही है, मैं तो डरपोक हूँ और तुम पराक्रम से अनुराग करने वाले हो एवं अपने पिता को याद करके न जाने तुम क्या कर डालोगे? यह महान् संशय भी मेरे मन में उत्पन्न हो गया है और भी हे मूर्ख!

यदि उन्होंने शस्त्र त्याग भी दिया था, तो भी क्या निःशस्त्र व्यक्ति, शस्त्र उठाने वाले, शत्रुओं के आक्रमण को क्या रोकते नहीं है? जैसी कि इन्होंने राजाओं के समूह के समक्ष सिर के काटे जाने पर भी स्त्री के समान बड़ी देर तक उदासीनता ही दिखायी।।39।।

अश्वत्थामा– (क्रोध एवं कम्पनपूर्वक) हे दुरात्मन्! राजाओं के मुँह लगे चाटुकार! नीच सूत! व्यर्थ बकवाद करने वाले!

मेरे उन पिताश्री ने दुःखी होकर अथवा डरकर किसी भी कारण द्रुपद पुत्र का हाथ नहीं रोका, आज बाहुबल के अभिमान से फूले हुए, तेरे सिर पर मैं अपना बायाँ पैर मार रहा हूँ, तू इसे रोक ले।।40।।

शब्दार्थ– वा–अथवा, दैवायत्तम्–भाग्य के अधीन, अधिक्षिपसि–आक्षेप लगा रहे हैं, आजौ–युद्ध में, वेत्ति–जानती है, तदा–तब, क्व–कहाँ, अनुस्मृत्य–याद करके, मे–मुझे, नृपचक्र–राजाओं का समूह।

तव भुजबलदर्पाध्मायमानस्य वामः
शिरसि चरण एष न्यस्यते वारयैनम्।।40।।

(अन्वय– तेन मम पित्रा दुःखिना भीरुणा वा कथम् अपि द्रुपद–तनय–पाणिः न निषिद्धः, अद्य भुज–बल–दर्प–अध्मायमानस्य तव शिरसि एषः वामः चरणः न्यस्यते, एनम् वारय।।40।।)

(इति तथा कर्तुमुत्तिष्ठति)

कृपदुर्योधनौ– वत्स! मर्षय, मर्षय। (इति निवारयतः)

(अश्वत्थामा चरणप्रहारं नाटयति)

कर्णः– (सक्रोधमुत्थाय, खड्गाकृष्य) **अरे दुरात्मन्! वाचाट! ब्रह्म-बन्धो! आत्मश्लाघिन्!**

जात्या काममवध्योऽसि चरणं त्विममुद्धृतम्।
अनेन लूनं खड्गेन पतितं द्रक्ष्यसि क्षितौ।।41।।

(अन्वय– जात्या कामम् अवध्यः असि, इमम् उद्धृतम् चरणम् तु अनेन खड्गेन लूनम् क्षितौ पतितम् द्रक्ष्यसि ।।41।।)

अश्वत्थामा– अरे मूढ! किं नाम 'जात्या काममवध्योऽहम्'। इयं सा जातिः परित्यक्ता।

(इति यज्ञोपवीतं छिनत्ति। पुनश्च सक्रोधम्)

अद्य मिथ्याप्रतिज्ञोऽसौ किरीटी क्रियते मया।
शस्त्रं गृहाण वा त्यक्त्वा मौलौ वा रचयांजलिम्।।42।।

(अन्वय– अद्य असौ किरीटी मया मिथ्या–प्रतिज्ञः क्रियते, शस्त्रम् गृहाण वा, त्यक्त्वा वा, मौलौ अंजलिम् रचय ।।42।।)

(उभावपि खड्गमाकृष्याऽन्योन्यं प्रहर्तुमुद्यतौ।
कृपदुर्योधनो निवारयतः)

दुर्योधनः– सखे! आचार्यपुत्र! शस्त्रग्रहणेनाऽलम्।

कृपः– वत्स! सूतपुत्र! शस्त्रग्रहणेनाऽलम्।

अश्वत्थामा– मातुल, मातुल! किं निवारयसि? अयमपि तात–निन्दाप्रगल्भः सूतापसदो धृष्टद्युम्नपक्षपात्येव।

(ऐसा कहकर वैसा करने के लिए उठता है)

कृपाचार्य एवं दुर्योधन– वत्स! क्षमा करो, क्षमा करो।

(ऐसा कहकर दोनों रोकते हैं)

(अश्वत्थामा चरण प्रहार का अभिनय करता है)

कर्ण– (क्रोधपूर्वक उठकर, तलवार खींचकर) अरे दुरात्मन्! वाचाल! ब्रह्मबन्धु! आत्मप्रशंसक!

जाति से तो तू नितान्त अवध्य है, किन्तु उठाए गए इस पैर को तो तू इस तलवार से कटा हुआ, भूमि पर गिरा हुआ देखेगा।।41।।

अश्वत्थामा– अरे, मूर्ख! क्या कहते हो, 'मैं जाति के कारण अवध्य हूँ?' यह लो मैंने वह जाति त्याग दी।

(ऐसा कहकर यज्ञोपवीत को तोड़ देता है, फिर से क्रोधपूर्वक)

आज उस अर्जुन की प्रतिज्ञा को मेरे द्वारा मिथ्या किया जा रहा है, इसलिए तू शस्त्र ग्रहण कर या फिर उसे छोड़कर सिर पर अंजलि बना (हाथ जोड़)।।42।।

(दोनों ही तलवार खींचकर परस्पर प्रहार करने के लिए उद्यत होते हैं, कृपाचार्य एवं दुर्योधन दोनों ही रोकते हैं)

दुर्योधन– हे मित्र! हे आचार्यपुत्र! शस्त्रग्रहण करने से बस करो।

कृपाचार्य– पुत्र! सूतपुत्र! शस्त्रग्रहण करने से बस करो।

अश्वत्थामा– मामा, मामा! आप क्यों रोक रहे हैं? पिताजी की निन्दा करने में निपुण, यह नीचसूत भी धृष्टद्युम्न का ही पक्षपाती है।

शब्दार्थ– निषिद्धः–रोका गया, न्यस्यते–रखा जा रहा है, वारय–रोको, उत्तिष्ठति–उठता है, कर्तुम्–करने के लिए, मर्षय–क्षमा कीजिए, निवारयतः–रोकते हैं, नाटयति–अभिनय करता है, उत्थाय–उठकर, आकृष्य–खींचकर, वाचाट–वाचाल, बकवादी, अवध्यः–न मारने योग्य, परित्यक्ता–छोड़ दी गयी, छिनत्ति–तोड़ता है, असौ–वह, मया–मेरे द्वारा, गृहाण–ग्रहण करो, त्यक्त्वा–त्यागकर, रचय–बनाओ।

कर्णः— राजन्! न खल्वहं निवारयितव्यः।

उपेक्षितानां मन्दानां धीरसत्त्वैरवज्ञया।
अत्रासितानां क्रोधान्धैर्भवत्येषा विकत्थना।।43।।

(अन्वय— धीर–सत्त्वैः, क्रोध–अन्धैः, अत्र असितानाम् अवज्ञ उपेक्षितानाम्, मन्दानाम्, एषा विकत्थना भवति ।।43।।)

अश्वत्थामा— राजन्! मुंच, मुंचैनम्। आसादयतु मद्भुजान्तरनिष्पे सुलभमसूनामवसादनम्। अन्यच्च राजन्! स्नेहेन वा कार्येण वा यत्त्व ताताधिक्षेपकारिणं दुरात्मानं मत्तः परिरक्षितुमिच्छसि तदुभयमपि व्यर्थि ते। पश्य—

पापप्रियस्तव कथं गुणिनः सखाऽयं
सूतान्वयः शशधराऽन्वयसम्भवस्य।
हन्ता किरीटिनमहं नृप! मुंच कुर्यां
क्रोधादकर्णमपृथात्मजमद्य लोकम्।।44।।

(अन्वय— नृप! गुणिनः शशधर–अन्वय–सम्भवस्य, तव पापप्रि सूत–अन्वयः, अयम् कथम् सखा? अहम् किरीटिनम् हन्ता, मुंच, अ क्रोधात् लोकम् अकर्णम् अपृथा–आत्मजम् कुर्याम् ।।44।।)

(इति प्रहर्तुमिच्छति)

कर्णः— (खड्गमुद्यम्य) अरे वाचाट! ब्राह्मणाधम! अयं न भवति राजन् मुंच, मुंच। न खल्वहं वारयितव्यः। (इति हन्तुमिच्छति)

(दुर्योधनकृपौ निवारयतः)

दुर्योधनः— कर्ण! गुरुपुत्र! कोऽप्यमद्य युवयोर्व्यामोहः।

कृपः— वत्स! अन्यदेव प्रस्तुतमन्यत्राऽऽवेग इति कोऽयं व्यामोहः स्वबलव्यसनं चेदमस्मिन्काले राजकुलस्याऽस्य युष्मत्त एव भवतीति वाम पन्थाः।

अश्वत्थामा— मातुल! न लभ्यतेऽस्य कटुप्रलापिनो रथकारकुल-कलंकस्य दर्पः शान्तयितुम्।

कृपः— वत्स! अकालः खलु स्वबलप्रधानविरोधस्य।

कर्ण– राजन्! निश्चय ही, आपको मुझे रोकना नहीं चाहिए।

धैर्यशाली एवं क्रोध से अन्धे हुए लोगों द्वारा, यदि शत्रु को उपेक्षा से या शस्त्र से भयभीत नहीं किया जाता है, तो वह तिरस्कृत एवं नीच लोगों को बढ़ावा देने वाला होता है।।43।।

अश्वत्थामा– राजन्! इसे छोड़ दीजिए, जिससे यह मेरी भुजाओं के बीच में पिसकर सरलतापूर्वक प्राणों के अन्त को प्राप्त कर सके। यदि आप स्नेहवश या फिर स्वार्थवश, पिताजी के निन्दक, इस दुष्ट को मुझसे बचाना चाहते हैं, तो ये दोनों ही बातें आपके लिए व्यर्थ हैं, देखिए–

हे राजन्! अनेक गुणों से युक्त चन्द्रवंश में उत्पन्न हुए आपका, सूतवंश में उत्पन्न यह पापी कर्ण भला मित्र कैसे हो सकता है? मैं ही अर्जुन का वध करने में समर्थ हूँ। इसलिए आप मुझे छोड़ दीजिए, क्योंकि क्रुद्ध हुआ मैं आज इस संसार को कर्ण एवं अर्जुन दोनों से ही रहित कर दूँगा।।44।।

(यह कहकर प्रहार करना चाहता है)

कर्ण– (तलवार उठाकर) अरे वाचाल! नीच ब्राह्मण! यह नहीं होगा, राजन्! आप इसे छोड़ दीजिए, छोड़ दीजिए। मुझे भी आपको नहीं रोकना चाहिए। **(ऐसा कहकर मारना चाहता है)**

दुर्योधन– कर्ण! गुरुपुत्र! आज यह तुम दोनों का कैसा व्यामोह है?

कृपाचार्य– वत्स! शत्रुओं पर किया जाने योग्य यह आवेश, अपने पक्ष पर ही किया जाने का तुम्हारा यह कैसा पागलपन है? यदि तुम्हें अपनी शक्ति के विनाश की ही व्यसन है तो आज तुम दोनों से कुरु कुल का भाग्य ही विपरीत हो गया है।

अश्वत्थामा–मामा! कटुप्रलापी और सूतकुल के कलंक, इस कर्ण के अहंकार को चकनाचूर करने का तो अवसर फिर प्राप्त नहीं होगा।

कृपाचार्य– हे पुत्र! वस्तुतः अपनी सेना के प्रमुख वीरों से विरोध करने का यह समय नहीं है।

अश्वत्थामा– मातुल, यद्येवम्।

अयं पापो यावन्न निधनमुपेयादरिशरैः
परित्यक्तं तावत्प्रियमपि मयाऽस्त्रं रणमुखे।
बलानां नाथेऽस्मिन्परिकुपितभीमार्जुनभये
समुत्पन्ने राजा प्रियसखाबलं वेत्तु समरे।।45।।

(अन्वय– यावत् अयम् पापः, अरि–शरैः निधनम् न उपेयात् तावत् रण–मुखे मया प्रियम् अपि अस्त्रम् परित्यक्तम्, अस्मिन् बलानाम् नाथे समरे परिकुपित–भीम–अर्जुन–भये समुत्पन्ने राजा प्रिय–सखा-बलम् वेत्तु।।45।।)

(इति खड्गमुत्सृजति)

कर्णः– (विहस्य) कुलक्रमागतमेवैतद्भवादृशां यदस्त्रपरित्यागो नाम।

अश्वत्थामा– ननु रे अपरित्यक्तमपि भवादृशैरायुधं चिरपरित्यक्तमेव निष्फलत्वात्।

कर्णः– अरे मूढ!

धृतायुधो यावदहं तावदन्यैः किमायुधैः।
यद्वा न सिद्धमस्त्रेण मम तत्केन सेत्स्यति।।46।।

(अन्वय– अहम् यावत् धृत–आयुधः, तावत् अन्यैः आयुधैः किम्? वा यत् मम अस्त्रेण न सिद्धम्, तत् केन सेत्स्यति।।46।।)

(नेपथ्ये)

आः दुरात्मन्, द्रौपदीकेशाम्बराकर्षणमहापातकिम्, धार्तराष्ट्रापसद, चिरस्य खलु कालस्य मत्सम्मुखीनमागतोऽसि। क्षुद्रपशो! क्वेदानीं गम्यते। अपि च। भो भो ! राधेयदुर्योधनसौबलप्रभृतयः पाण्डवविद्वेषिणश्चापपाणयो मानधनाः! श्रृण्वन्तु भवन्तः।

कृष्टा येन शिरोरुहे नृपशुना पांचालराजात्मजा
येनाऽस्याः परिधानमप्यपहृतं राज्ञां गुरूणां पुरः।
यस्योरःस्थलशोणितासवमहं पातुं प्रतिज्ञातवान्,
सोऽयं मद्भुजपंजरे निपतितः संरक्ष्यतां कौरवाः।।47।।

अश्वत्थामा– मामा जी! यदि ऐसा है तो,

जब तक यह पापी शत्रुओं के बाणों द्वारा नहीं मार दिया जाता है, तब तक मैंने युद्ध में अपने प्रिय अस्त्र का भी परित्याग कर दिया। इस कर्ण के नेतृत्व वाले संग्राम में क्रुद्ध भीम एवं अर्जुन द्वारा भय उत्पन्न किए जाने के अवसर पर राजा, अपने प्रियमित्र कर्ण को ही अपनी सामर्थ्य समझ लें।।45।।

(ऐसा कहकर तलवार छोड़ता है)

कर्ण– (हँसकर) यह अस्त्र का त्याग तो आपके कुलक्रम से ही चला आ रहा है।

अश्वत्थामा– अरे, नीच! तेरे जैसे लोगों का हमेशा शस्त्र धारण करना भी तो गुरुशाप से निष्फल होने से, पूर्णरूप से शस्त्र के परित्याग जैसा ही है।

कर्ण– अरे मूर्ख!

जब तब मैं शस्त्र को धारण किए हुए हूँ, तब तक किसी दूसरे शूरवीर की कोई आवश्यकता नहीं है अथवा जो कार्य मेरे शस्त्र से सिद्ध नहीं हो सकता है, वह भला किससे सिद्ध होगा?।।46।।

(नेपथ्य में)

आः दुरात्मन्! द्रौपदी के केश एवं वस्त्र खींचने का महापाप करने वाले! नीच धृतराष्ट्र पुत्र! निःसन्देह तू बहुत समय के बाद मेरे सामने आया है। अरे नीच पशु! अब कहाँ जा रहा है? और भी, अरे कर्ण, दुर्योधन, शकुनि आदि पाण्डव द्रोहियों! तथा स्वाभिमानी धनुर्धारियों! आप सभी लोग सुन लीजिए–

पशु के समान नीच, जिसके द्वारा पांचालराज की पुत्री केश पकड़कर खींची गयी थी, जिसने इस द्रौपदी का वस्त्र भी राजाओं एवं गुरुजनों के सामने खींचा था, जिसके वक्षःस्थल की रुधिररूपी मदिरा को पीने की मैंने प्रतिज्ञा की थी, वही यह दुःशासन मेरी भुजारूपी पिंजरे में पड़ा हुआ है। हे कौरवों! इसे बचा लो।।47।।

(अन्वय– नृ–पशुना येन पांचालराज–आत्मजा शिरोरुहे कृष्टा, येन अस्याः परिधानम् अपि राज्ञाम् गुरूणाम् पुरः अपहृतम्, यस्य उरः-स्थल–शोणित–आसवम् पातुम् अहम् प्रतिज्ञातवान्, सः अयम् मद्-भुज–पंजरे निपतितः, कौरवाः संरक्ष्यताम् ।।47।।)

(सर्वे आकर्णयन्ति)

अश्वत्थामा– (सोत्प्रासम्) अंगराज! सेनापते! जामदग्न्यशिष्य! द्रोणोपहासिन्! भुजबलपरिरक्षितसकललोक! (धृतायुधः (3/46) इति पठित्वा) इदं तदासन्नतरमेव संवृत्तम्। रक्षैनं साम्प्रतं भीमाद् दुःशासनम्।

कर्णः– आः का शक्तिर्वृकोदरस्य मयि जीवति दुःशासनस्य छायामप्याक्रमितुम्। युवराज! न भेतव्यं, न भेतव्यम्। अयमहमागतोऽस्मि।

(इति निष्क्रान्तः)

अश्वत्थामा– राजन् कौरवनाथ! अभीष्ममद्रोणं सम्प्रति कौरवबलमालोडयन्तौ भीमार्जुनौ राधेयेनैवं विधेनान्येन वा न शक्यते निवारयितुम्। अतः स्वयमेव भ्रातुः प्रतीकारपरो भव।

दुर्योधनः– आः! का शक्तिरस्ति दुरात्मनः पवनतनयस्याऽन्यस्य वा मयि जीवति शस्त्रपाणौ वत्सस्य छायामप्याक्रमितुम्। वत्स! न भेतव्यं न भेतव्यम्। कः कोऽत्र भोः! रथमुपनय।

(इति निष्क्रान्तः)

(नेपथ्ये कलकलः)

अश्वत्थामा– (अग्रतो विलोक्य, ससम्भ्रमम्) मातुल! हा धिक्, कष्टं कष्टम्। एष भ्रातुः प्रतिज्ञाभंगभीरुः किरीटी समं दुर्योधनराधेयौ शरवर्षैर्दुर्वारैरभिद्रवति। हा कष्टं कष्टम्। सर्वथा पीतं दुःशासनशोणितं भीमसेनेन। न खलु विषहे दुर्योधनाऽनुजस्यैनां विपत्तिमवलोकयितुम्। अनृतमनुमतं नाम। मातुल! शस्त्रं शस्त्रम्।

सत्यादप्यनृतं श्रेयो धिक्स्वर्गं नरकोऽस्तु मे।
भीमाद् दुःशासनं त्रातुं त्यक्तमत्यक्तमायुधम् ।।48।।

(सभी सुनते हैं)

अश्वत्थामा– (उपहासपूर्वक) अंगराज! हे सेनापते! परशुराम शिष्य! द्रोण का उपहास करने वाले! भुजबल से सम्पूर्ण संसार की रक्षा करने वाले! **(धृतायुधः 3/46 इत्यादि को पढ़कर)** यह वही अवसर आ गया है, अब भीम से इस दुःशासन को बचाओ।

कर्ण– अरे! मेरे जीवित रहते हुए वृकोदर की क्या सामर्थ्य है कि वह युवराज की छाया को भी छू सके। हे युवराज! मत डरो, मत डरो। यह मैं आ ही गया हूँ। **(यह कहकर निकल जाता है)**

अश्वत्थामा– राजन्! कौरवनाथ! भीष्म एवं द्रोण से रहित कौरव सेना को मथते हुए भीम, अर्जुन, अब राधेय कर्ण अथवा इसीप्रकार के किसी दूसरे द्वारा रोके नहीं जा सकते हैं, इसलिए आप ही अपने भाई को बचाने का प्रयास करो।

दुर्योधन– आः! दुष्टात्मा वायुपुत्र भीम की क्या हिम्मत है, जो शस्त्र धारण किए हुए, मेरे जीवित रहते, मेरे भाई की छाया को भी छू सके। वत्स! डरो मत, डरो मत। अरे! यहाँ कौन है, रथ ले आओ।

(यह कहकर निकल जाता है)

(नेपथ्य में कलकल होता है)

अश्वत्थामा– (आगे देखकर, वेगपूर्वक) मामाजी! धिक्कार है, हाय कष्ट है। यह भाई की प्रतिज्ञा के भंग होने से डरा हुआ अर्जुन, इस दुर्योधन एवं कर्ण को भयंकर बाणों की वर्षा से रोक रहा है। हाय, कष्ट है, कष्ट है। भीम ने तो दुःशासन का रक्त पी ही लिया। निःसन्देह दुर्योधन के छोटे भाई दुःशासन की इस विपत्ति को देखना भी मैं सहन नहीं कर पा रहा हूँ। मेरी प्रतिज्ञा भले ही झूठी हो जाए। हे मामा! शस्त्र दीजिए, शस्त्र लाइए।

सत्य से असत्य ही श्रेयष्कर है, स्वर्ग को भी धिक्कार है, मुझे भले ही नरक की प्राप्ति हो जाए, त्यागा हुआ भी शस्त्र, वस्तुतः भीम से दुःशासन को बचाने के लिए बिना त्यागा हुआ ही है।।48।।

(अन्वय– सत्यात् अपि अनृतम् श्रेयः, स्वर्गम् धिक्, मे नरक अस्तु, त्यक्तम् (अपि) आयुधम् भीमात् दुःशासनम् त्रातुम् अत्यक्त ।।48।।)

(इति खड्गं ग्रहीतुमिच्छति)

(नेपथ्ये)

महात्मन्! भारद्वाजसूनो! न खलु सत्यवचनमुल्लंघितपूर्वमु ल्लंघयितुमर्हसि।

कृपः– वत्स! अशरीरिणी भारती भवन्तमनृतादभिरक्षति।

अश्वत्थामा– कथमियममानुषी वाङ् नानुमनुते संग्रामावतरणं मम। आः, सर्वथा पाण्डवपक्षपातिनो देवाः। सर्वथा पीतं दुःशासनशोणितं भीमेन। भोः कष्टं कष्टम्।

दुःशासनस्य रुधिरे पीयमानेऽप्युदासितम्।
दुर्योधनस्य कर्ताऽस्मि किमन्यत्प्रियमाहवे।।49।।

(अन्वय– दुःशासनस्य रुधिरे पीयमाने अपि, (मया) उदासितम्, आहवे दुर्योधनस्य किम् अन्यत् प्रियम् कर्ता अस्मि।।49।।)

मातुल! राधेयक्रोधवशादनार्यमस्माभिराचरितम्। अतस्त्वमपि तावदस्य राज्ञः पार्श्ववर्ती भव।

कृपः– गच्छाम्यहमत्र प्रतिविधातुम्। भवानपि शिविरसन्निवेशमेव प्रतिष्ठताम्।

(उभौ परिक्रम्य निष्क्रान्तौ)

॥ इति तृतीयोऽङ्कः ॥

(यह कहकर तलवार को ग्रहण करना चाहता है)

(नेपथ्य में)

हे महात्मन्! भारद्वाजपुत्र! वस्तुतः इससे पहले आपने अपनी प्रतिज्ञा का उल्लंघन नहीं किया है। इसलिए तुम्हें अब भी उसका अतिक्रमण नहीं करना चाहिए।

कृपाचार्य– वत्स! यह अशरीरिणी वाणी आपको असत्य आचरण करने से रोक रही है।

अश्वत्थामा– यह दिव्य वाणी मुझे युद्ध में जाने की अनुमति क्यों नहीं दे रही है? आः! देवता भी सबप्रकार से पाण्डवों के पक्षपाती हो गए हैं और भीम ने दुःशासन का रक्त पी ही लिया है। अरे! अत्यधिक कष्ट है, कष्ट है–

दुःशासन का रक्त पिए जाने पर भी जब मैं उदासीन बना रहा, तो युद्ध में दुर्योधन का दूसरा क्या प्रिय करूँगा?।।49।।

मामा जी, राधेय कर्ण पर क्रुद्ध होने के कारण हमने अनुचित ही कर दिया है। इसलिए अब आप ही इन राजा दुर्योधन के पास चले जाइए।

कृपाचार्य– ठीक है, मैं ही प्रतिकार करने के लिए जाता हूँ। आप भी शिविर के पास में ही बने रहें।

(दोनों घूमकर निकल जाते हैं)

॥ इसप्रकार महाकवि भट्टनारायण विरचित वेणीसंहार के तृतीय अङ्क का डॉ. राकेश शास्त्री, बाँसवाड़ा **द्वारा किया हुआ हिन्दी अनुवाद पूर्ण हुआ॥**

।। श्रीः ।।

चतुर्थोऽङ्कः

(ततः प्रविशति प्रहारमूर्छितं रथस्थं दुर्योधनमपहरन्सूतः)

(सूतः ससम्भ्रमं परिक्रामति)

(नेपथ्ये)

भो भो! बाहुबलाऽवलेपप्रवर्त्तितमहासमरदोहदाः कौरवपक्षपातापणी कृतप्राणद्रविणसंचया नरपतयः! संस्तभ्यन्तां संस्तभ्यन्ताम्, निहत-दुःशासनपीतावशेषशोणितस्नपितबीभत्सवेषवृकोदरदर्शनभयपरिस्खलत् प्रहरणानि रणात्प्रद्रवन्ति बलानि।

सूतः– (विलोक्य) कथमेष धवलचपलचारुचामरचुम्बितकनक-कमण्डलुना शिखरावबद्धवैजयन्तीसूचितेन हतगजवाजिनरकलेवरसहस्र-संमर्दविषमोद्घातकृतकलकलकिंकिणीजालमालिना रथेन शरवर्षस्तम्भित-परचक्रपराक्रमप्रसरः प्रद्रुतमात्मबलमाश्वासयन्कृपः किरीटिनाऽभियुक्त-मंगराजमनुसरति हन्त! जातमस्मद्‌बलानामवलम्बनम्।

(नेपथ्ये कलकलानन्तरम्)

शब्दार्थ– प्रहारमूर्च्छितम्–प्रहार से मूर्च्छित, अपहरन्–ले जाते हुए, ससम्भ्रमम् –घबराहटपूर्वक, परिक्रामति–घूमता है, अवलेप–अहंकार, समरदोहदाः–युद्ध के अभिलाषी, संस्तभ्यन्ताम्–रोकिए, शोणित–रक्त, खून, बीभत्स–भयंकर, प्रहरणानि–शस्त्रों को, प्रद्रवन्ति–भाग रहे हैं, विलोक्य–देखकर, गज–हाथी, वाजिन–घोड़े, सम्मर्द–भीड़, समूह, अनुसरति–अनुसरण करता है।

।। श्रीः ।।

चतुर्थ अङ्क

(उसके बाद प्रहार से मूर्च्छित, रथ में विद्यमान दुर्योधन को लिए हुए सूत प्रवेश करता है)

(सूत घबराहटपूर्वक घूमता है)

(नेपथ्य में) अरे! रे, बाहुबल के अहंकार से आरम्भ किए गए, महान् संग्राम के अभिलाषी कौरवों के पक्षपात के कारण, अपनी प्राणरूपी धनराशि को दाँव पर लगा देने वाले, राजाओं! मारे गए, दुःशासन के पीने से बचे हुए, रुधिर से आप्लावित भयंकर वेश को धारण करने वाले, भीम को देखने से उत्पन्न भय के कारण, परिस्खलित आयुधों वाली, रथ से भाग रही सेनाओं को रोकिए, रोकिए।

सूत– (देखकर) धवल, चंचल, सुन्दर चामरों से युक्त, स्वर्ण कमण्डलु वाले, शिखर पर फहराती हुई विजय–पताका से सूचित हजारों हाथी, घोड़े तथा मनुष्यों के शरीरों से रगड़ने के कारण, ऊँचे–नीचे गड्ढ़े पड़ जाने से बजती हुई, छोटी–छोटी घण्टिकाओं के समूह से सुशोभित रथ में बैठे हुए, बाणों की वर्षा से शत्रुओं की सेना के वेग को रोकने वाले, भाग रही अपनी सेना को ढाढ़स बँधाते हुए, कृपाचार्य, अर्जुन द्वारा घेरे गए अंगराज कर्ण का अनुसरण कर रहे हैं। प्रसन्नता का विषय है कि हमारी सेनाओं के लिए एक सहारा हो गया है।

(नेपथ्य में कलकल ध्वनि के बाद)

भो भोः! अस्मद्दर्शनभयस्खलितकार्मुककृपाणतोमरशक्तयः कौरव-चमूभटाः! पाण्डवपक्षपातिनश्च योधाः! न भेतव्यं न भेतव्यम्। अयमहं निहतदुःशासनपीवरोरःस्थलक्षतजासवपानमदोद्धतो रभसगामी स्तोकावशिष्टप्रतिज्ञामहोत्सवः कौरवराजस्य द्यूतनिर्जितो दासः पार्थमध्यमो भीमसेनः सर्वान्भवतः साक्षीकरोमि। श्रूयताम्–

राज्ञो मानधनस्य कार्मुकभृतो दुर्योधनस्याऽग्रतः
प्रत्यक्षं कुरुबान्धवस्य मिषतः कर्णस्य शल्यस्य च।
पीतं तस्य मयाऽद्य पाण्डववधूकेशाम्बराकर्षिणः
कोष्णं जीवत एव तीक्ष्णकरजक्षुण्णादसृग्वक्षसः ।।1।।

(अन्वय– मानधनस्य कार्मुक–भृतः राज्ञः , दुर्योधनस्य अग्रतः कुरु–बान्धवस्य प्रत्यक्षम्, कर्णस्य शल्यस्य च मिषतः, पाण्डव–वधूकेश-अम्बर–आकर्षिणः तस्य जीवतः एव, मया अद्य तीक्ष्ण–करज–क्षुण्णात् वक्षसः कोष्णम् असृक् पीतम् ।।1।।)

सूतः– (श्रुत्वा सभयम्) अये! कथमासन्न एवाऽसौ दुरात्मा कौरवराजपुत्रमहावनोत्पातमारुतो मारुतिः। अनुपलब्धसंज्ञश्च महाराजः। भवतु। सुदूरमपहरामि स्यन्दनम्। कदाचिद् दुःशासन इवाऽस्मिन्नप्ययमनार्योऽनार्यमाचरिष्यति। (त्वरितं परिक्रम्यावलोक्य च) अये! अयमसौ सरसीसरोज– विलोलनसुरभिशीतलमातरिश्वसंवाहितसान्द्रकिसलयो न्यग्रोधपादपः। उचिता विश्रामभूरियं समरव्यापारखिन्नस्य वीरजनस्य अत्रस्थश्चायम– यत्नापवीजिततालवन्तेन हरिचन्दनच्छटाशीतलेनाऽप्रयत्नसुरभिणा दशा– परिणामयोग्येन सरसीसमीरणेनामुना च गतक्लमो भविष्यति महाराजः। (ऊर्ध्वमवलोक्य) लूनकेतुश्चायं रथोऽनिवारित एव प्रवेक्ष्यति छायाम्। (इति प्रवेशं रूपयित्वा) कः कोऽत्र भोः छत्रं व्यजनं चामरं च शीघ्रमुपनयतु।

अरे! अरे! हमें देखने से उत्पन्न हुए भय के कारण, जिनके धनुष, कृपाण, तोमर तथा शक्तियाँ गिर रही हैं, ऐसे कौरव सेना के वीरों! एवं पाण्डवों के पक्षपाती योद्धाओं! आपको डरना नहीं चाहिए, डरना नहीं चाहिए। दुःशासन के पुष्ट वक्षःस्थल के रुधिररूपी आसव का पान करने से मतवाला, शीघ्रगामी, कुछ शेष प्रतिज्ञारूपी महोत्सव वाला, कौरवराज का जुए में जीता हुआ सेवक, पार्थ से मध्यम पाण्डव मैं भीमसेन आप सभी को साक्षी बना रहा हूँ, सुनिए–

मान ही है धन जिसका, ऐसे धनुर्धारी राजा दुर्योधन के समक्ष, कौरव पक्षपाती कर्ण तथा शल्य के सामने, देखते हुए, पाण्डव वधू द्रौपदी के केश एवं वस्त्रों को खींचने वाले, दुःशासन का उसके जीवित रहते हुए ही, आज मैंने अपने तीक्ष्ण नाखूनों से फाड़े गए, वक्षःस्थल से कुछ–कुछ गर्म खून पी लिया है।।1।।

सूत– (सुनकर, भयपूर्वक) अरे! क्या यह दुष्ट कौरवराजपुत्र रूपी महान् वन में उपद्रव उत्पन्न करने वाले, पवन के समान पवनपुत्र भीम पास ही आ गया है? जबकि यहाँ पर महाराज अभी तक बेहोश हैं। अस्तु, रथ को दूर ले जाता हूँ। कहीं ऐसा न हो कि दुःशासन के समान, इनके प्रति भी यह अनार्य दुष्टतापूर्ण व्यावहार कर बैठे।

(अत्यन्त शीघ्रतापूर्वक घूमकर और देखकर) अहो! यह तो तालाब पर हिल रहे कमलों से सुगन्धित एवं शीतल पवन द्वारा हिलाए गए, घने किसलय दलों वाला वटवृक्ष है। इसलिए यह युद्धकर्म से थके हुए, वीर पुरुष के विश्राम के योग्य स्थान है। यहाँ रहने पर पंखे के डुलाए बिना ही श्वेत चन्दन की छटा से शीतलरस के बिना प्रयत्न के ही सुगन्धित, चैतन्य प्रदान करने योग्य, इस तालाब की ओर चलने वाली वायु द्वारा महाराज की थकावट दूर हो जाएगी। **(ऊपर देखकर)**

साथ ही, कटी हुई ध्वजा वाला यह रथ, बिना किसी रुकावट के इसकी छाया में प्रविष्ट हो जाएगा। **(प्रविष्ट होने का अभिनय करके)** अरे यहाँ कौन है? छत्र, पंखा और चामर तो शीघ्र ले आओ।

(समन्तादवलोक्य) कथं न कश्चिदत्र परिजनः। नूनं तथाविधस्य वृकोदरस्य दर्शनादेवं विधस्य च स्वामिनस्त्रासेन शिविरसन्निवेशमेव प्रविष्टः। कष्ट भोः! कष्टम्।

दत्त्वा द्रोणेन पार्थादभयमपि न संरक्षितः सिन्धुराजः,
क्रूरं दुःशासनेऽस्मिन्हरिण इव कृतं भीमसेनेन कर्म।
दुःसाध्यामप्यरीणां लघुमिव समरे पूरयित्वा प्रतिज्ञां
नाहं मन्ये सकामं कुरुकुलविमुखं दैवमेतावताऽपि।।2।।

(अन्वय– पार्थात् अभयम् दत्त्वा अपि, द्रोणेन सिन्धुराजः न संरक्षितः, भीमसेनेन हरिणे इव अस्मिन् दुःशासने क्रूरम् कर्म कृतम्, समरे अरीणाम् दुःसाध्याम् अपि प्रतिज्ञाम् लघुम् इव पूरयित्वा, कुरु–कुल–विमुखम् दैवम् एतावता अपि सकामम् न अहम् मन्ये ।।2।।)

(राजानमवलोक्य) कथमद्याऽपि चेतनां न लभते महाराजः? भो कष्टम्। (निश्वस्य च)

मदकलितकरेणु भज्यमाने
विपिन इव प्रकटैकशालशेषे।
हतसकलकुमारके कुलेऽस्मिंस्त्व–
मपि विधेरवलोकितः कटाक्षैः।।3।।

(अन्वय– मद–कलित–करेणु भज्यमाने, प्रकट–एक–शाल–शेषे, विपिने इव हत–सकल–कुमारके अस्मिन् कुले, त्वम् अपि विधेः कटाक्षैः अवलोकितः ।।3।।)

(आकाशे लक्ष्यं बद्ध्वा) ननु भो हतविधे! भरतकुलविमुख!

अक्षतस्य गदापाणेरनारूढस्य संशयम्।
एषाऽपि भीमसेनस्य प्रतिज्ञा पूर्यते त्वया!।।4।।

(अन्वय– गदा–पाणेः अक्षतस्य संशयम् अनारूढस्य भीमसेनस्य एषा अपि प्रतिज्ञा त्वया पूर्यते।।4।।)

दुर्योधनः– (शनैरुपलब्धसंज्ञः) आः ! का शक्तिरस्ति पवनतनयस्य दुरात्मनो वृकोदरहतकस्य मयि जीवति दुर्योधने प्रतिज्ञां पूरयितुम्?।

(चारों ओर देखकर) क्या यहाँ कोई भी परिजन नहीं है? निश्चय ही, उसप्रकार के भीमसेन को देखने मात्र से एवं इसप्रकार के महाराज के त्रास से सभी शिविर के पास चले गए हैं। अरे! कष्ट है, महान् कष्ट है।

पार्थ से बचाने के लिए कहकर भी, आचार्य द्रोण, सिन्धुराज जयद्रथ को बचा नहीं सके तथा भीमसेन ने हरिण के समान इस दुःशासन पर क्रूरकर्म कर दिया। युद्ध में शत्रुओं की भी दुःसाध्य प्रतिज्ञा को तिनके के समान पूरा करके, कुरुवंश के विमुख बना हुआ भाग्य, मेरे विचार से तो इतना अनिष्ट करके भी अभी तक पूर्णमनोरथ वाला नहीं हुआ है।।2।।

(राजा को देखकर) क्या अब भी महाराज होश में नहीं आए हैं? अरे! कष्ट है (लम्बी श्वास लेकर)–

मतवाले हाथियों द्वारा नष्ट किए गए वन में बचे हुए एकमात्र शाल के वृक्ष के समान, पाण्डवों द्वारा सभी कुमारों को नष्ट किए जाने से एकमात्र बचे हुए, कौरवकुल में तुम भी प्रतीत होता है कि दुर्भाग्य की कुदृष्टि से देखे गए हो।।3।।

(आकाश की ओर देखकर) अरे! हतभाग्य! भरतकुल विमुख! ऐसा प्रतीत हो रहा है कि **गदा हाथ में लिए हुए, पात्र के अभाव में ही निश्चितरूप से भीमसेन की यह दूसरी प्रतिज्ञा भी तुम्हारे द्वारा पूरी की जा रही है।।4।।**

दुर्योधन– (धीरे–धीरे होश में आकर) आः! पवनपुत्र दुष्ट वृकोदर की क्या सामर्थ्य है, जो मुझ दुर्योधन के जीवित रहते हुए, अपनी प्रतिज्ञा पूरी कर सके?

शब्दार्थ–कश्चित्–कोई, परिजनः–सेवक, त्रासेन–डर से, दत्वा–देकर, पूरयित्वा–पूरा करके, एतावता–इतने, मन्ये–मानता हूँ, विपिने–वन में, सकल–सभी, अवलोकितः–देखा गया, बद्ध्वा–बाँधकर, हतविधे–दुर्भाग्य।

वत्स दुःशासन! न भेतव्यं न भेतव्यम्। अयमहमागतोऽस्मि। ननु, सूत! प्रापय रथं तमेवोद्देशं यत्र वत्सो मे दुःशासनः।

सूतः– आयुष्मन्! अक्षमाः सम्प्रति वाहास्ते रथमेनमुद्वोढुम्। (अपवार्य) मनोरथं च।

दुर्योधनः– (रथादवतीर्य सगर्वं साकूतं च) कृतं स्यन्दनगमन-कालातिपातेन ।

सूतः– (सवैलक्ष्यं सकरुणं च) मर्षयतु मर्षयत्वायुष्मन्।

दुर्योधनः– धिक्सूत! किं रथेन? केवलमरातिविमर्दसंघट्टसंचारी दुर्योधनः खल्वहम्। तदगदामात्रसहायः समरभुवमवतरामि।

सूतः– आयुष्मन् एवमेतत्, कः सन्देहः?

दुर्योधन– यद्येवं किमेवं भाषसे? पश्य–

बालस्य मे प्रकृतिदुर्ललितस्य पापः,
पापं व्यवस्यति समक्षमुदायुधोऽसौ।
अस्मिन्निवारयसि किं व्यवसायिनं मां ?
क्रोधो न नापि करुणा न च तेऽस्ति लज्जा!।।5।।

(अन्वय– उत्–आयुधः असौ पापः मे समक्षम्, प्रकृति–दुर्ललितस्य बालस्य पापम् व्यवस्यति, अस्मिन् व्यवसायिनम् माम् किम् निवारयसि? ते क्रोधः न, न अपि करुणा, न च लज्जा अस्ति।।5।।)

सूतः–(सकरुणः पादयोर्निपत्य) एतद्विज्ञापयामि आयुष्मन्! सम्पूर्ण-प्रतिज्ञेन निवृत्तेन भवितव्यमिदानीं दुरात्मना वृकोदरहतकेन। अत एवं ब्रवीमि।

दुर्योधनः– (सहसा भूमौ पतन्) हा वत्स दुः शासन! हा मदाज्ञा विरोधितपाण्डव! हा विक्रमैकरस! हा मदंकदुर्ललित! हा अरातिकुल–गजघटामृगेन्द्र! हा युवराज! क्वासि ? प्रयच्छ मे प्रतिवचनम् ।

वत्स! दुःशासन, डरो मत, डरो मत। मैं आ गया हूँ। अरे सूत! रथ को उसी स्थान पर पहुँचाओ, जहाँ पर मेरा प्रिय अनुज दुःशासन है।

सूत– हे आयुष्मन्! आपके घोड़े अब इस रथ को वहन करने एवं **(एक ओर मुख करके)** आपका मनोरथ पूरा करने में समर्थ नहीं हैं।

दुर्योधन– (रथ से उतरकर गर्व एवं अभिमानपूर्वक) रथ से जाने के लिए विलम्ब करना व्यर्थ है।

सूत– **(लज्जित होकर, करुणापूर्वक)** आयुष्मन्! क्षमा कीजिए, क्षमा कीजिए।

दुर्योधन– हे सूत! तुम्हें धिक्कार है। अब रथ से क्या लाभ? शत्रुओं का मर्दन करके, युद्धक्षेत्र में भ्रमण करने वाला, मैं अकेला दुर्योधन हूँ। इसलिए गदामात्र हाथ में लेकर मैं युद्धभूमि में उतर रहा हूँ।

सूत– आयुष्मन्! यह ऐसा ही है।

दुर्योधन– यदि ऐसा है तो फिर इसप्रकार क्यों कह रहे हो? देखो,

शस्त्र उठाए हुए वह पापी मेरे समक्ष, स्वभाव से कोमल बालक दुःशासन पर अत्याचार करे और उससे बदला लेने का उद्यम करने से तुम मुझे रोक रहे हो? इस पर तुम्हें क्रोध, करुणा एवं लज्जा नहीं आती है?।।5।।

सूत– (करुणापूर्वक चरणों में गिरकर) आयुष्मन्! मैं यह निवेदन कर रहा हूँ कि उस दुरात्मा नीच वृकोदर द्वारा अब प्रतिज्ञा को पूरा किया जा चुका है, इसीलिए मैं ऐसा कह रहा हूँ।

दुर्योधन– **(अकस्मात् भूमि पर गिरते हुए)** हाय! वत्स, दुःशासन! हाय मेरी आज्ञा से पाण्डवों का विरोध करने वाले, हा एकमात्र पराक्रमी! हाय मेरी गोद में कठिनता से पाले गए, हा शत्रुदल रूपी गजसमूह में सिंह के समान, युवराज! तुम कहाँ हो? मुझे प्रत्युत्तर दो।

(इति निःश्वस्य मोहमुपगतः)

सूतः– राजन्! समाश्वसिहि समाश्वसिहि।

दुर्योधनः– (संज्ञां लब्ध्वा । निःश्वस्य)

युक्तो यथेष्टमुपभोगसुखेषु नैव
त्वं लालितोऽपि हि मया न वृथाऽग्रजेन।
अस्यास्तु वत्स! तव हेतुरहं विपत्ते–
र्यत्कारितोऽविनयं न च रक्षितोऽसि।।6।।

(**अन्वय–** वत्स! त्वम् वृथा अग्रजेन मया यथेष्टम्, उपभोग-सुखे न एव युक्तः, न हि लालितः अपि, अस्याः तव विपत्तेः तु अहम् हेतु यत् अविनयम् कारितः असि, अस्य न च रक्षितः (असि) ।।6।।)

(इति पुनः पतति)

सूतः– आयुष्मन्! समाश्वसिहि समाश्वसिहि।

दुर्योधनः– धिक्सूत! किमनुष्ठितं भवता?

रक्षणीयेन सततं बालेनाऽऽज्ञानुवर्तिना।
दुःशासनेन भ्रात्राऽहमुपहारेण रक्षितः।।7।।

(**अन्वय–** सततम् रक्षणीयेन आज्ञा–अनुवर्तिना बालेन उपहारेण भ्रात्रा दुःशासनेन अहम् रक्षितः।।7।।)

सूतः– महाराज! मर्मभेदिभिरिषुतोमरशक्ति प्रासवर्षैर्महारथानाम- पहतचेतनत्वान्निश्चेतनः कृतो महाराज इत्यपहृतो मया रथः।

दुर्योधनः– सूत! विरूपं कृतवानसि–

तस्यैव पाण्डवपशोरनुजद्विषो मे
क्षोदैर्गदाऽशनिकृतैर्न विबोधितोऽस्मि।
तामेव नाधिशयितो रुधिरार्द्रशय्यां
दौःशासनीं यदहमाशु वृकोदरो वा।।8।।

(**अन्वय–** यत् तस्य एव मे अनुज–द्विषः पाण्डव–पशोः गदा- अशनि–कृतैः क्षोदैः न विबोधितः अस्मि, ताम् एव दौःशासनीम् रुधिर- आर्द्र–शय्याम् अहम् वृकोदरः वा आशु न अधिशयितः ।।8।।)

(ऐसा कहकर लम्बी श्वास छोड़ता हुआ मूर्च्छित हो जाता है)

सूत– राजन्! धैर्य धारण कीजिए, धैर्य धारण कीजिए।

दुर्योधन– (होश में आकर, लम्बी श्वास लेकर)

हे वत्स! निष्फलरूप से अग्रज कहलाने वाले, मुझ दुर्योधन ने तुम्हें उपभोग सुखों को भोगने का अवसर ही प्रदान नहीं किया एवं न ही उचितरूप से तुम्हारा लालन पालन ही किया, अपितु तुम्हारी इस विपत्ति का तो कारण भी मैं ही हूँ, जो तुम्हारे द्वारा द्रौपदी को निर्वसना करवाया, किन्तु तुम्हारी रक्षा न कर सका।।6।।

(ऐसा कहकर फिर से गिर जाता है)

सूत– आयुष्मन्! धैर्य धारण कीजिए, धैर्य धारण कीजिए।

दुर्योधन– सूत! तुम्हें धिक्कार है। तुम्हारे द्वारा यह क्या कर दिया गया?

निरन्तर रक्षा करने योग्य, आज्ञा का पालन करने वाले, भ्राता दुःशासन ने अपने प्राणों की भेंट देकर मेरी रक्षा की है।।7।।

सूत– महाराज! शत्रुओं द्वारा मर्मभेदी बाण, तोमर, शक्ति एवं भालों की वर्षा करके, महारथियों के बेहोश कर दिए जाने से और महाराज के मूर्च्छित होने से रथ को मैं यहाँ ले आया था।

दुर्योधन– हे सूत! तुमने यही तो अनुचित किया है–

जो मेरे अनुज के शत्रु उस पाण्डवरूपी पशु के गदारूपी वज्र से किए गए, प्रहारों द्वारा मैं यदि होश में नहीं आ सका अथवा दुःशासन की उसी रुधिर से भीगी शय्या पर मैं या वृकोदर शीघ्र ही सुलाया नहीं जा सका।।8।।

शब्दार्थ– लब्ध्वा–प्राप्त करके, लालितः–पाला गया, पतति–गिरता है, धिक्–धिक्कार है, सततम्–निरन्तर, अपहृतः–अपहरण किया गया, विरूपम्–अनुचित।

(निःश्वस्य नभो विलोक्य)

ननु भो हतविधे! कृपाविरहित! भरतकुलविमुख!

अपि नाम भवेन्मृत्युर्न च हन्ता वृकोदरः।

सूतः– शान्तं पापं, शान्तं पापम्। महाराज! किमिदम्?

दुर्योधनः–

घातिताऽशेषबन्धोर्मे किं राज्येन जयेन वा।।9।।

(अन्वय– अपि नाम मृत्युः भवेत् न च हन्ता वृकोदरः (स्यात्) अशेष–बन्धोः घातिताः, किम् राज्येन, जयेन वा।।9।।)

(ततः प्रविशति शरप्रहारव्रणबद्धपट्टिकालङ्कृतकायः सुन्दरकः)

सुन्दरकः– आर्याः! अपि नामास्मिन्नुद्देशे सारथिद्वितीयो दृष्टो युष्माभिर्महाराजदुर्योधनो न वेति ?। (निरूप्य) कथं न कोऽपि मन्त्रयते? भवतु। एतेषां बद्धपरिकराणां पुरुषाणां समूहो दृश्यते। अत्र गत्वा प्रक्ष्यामि।[1] (परिक्रम्य विलोक्य च) कथमेते खलु स्वस्वामिनो गाढप्रहाराऽऽहतस्य घनसन्नाहजालदुर्भेद्यमुखैः कंकवदनैर्हृदयाच्छल्यान्युद्धरन्ति। तन्न खल्वेते जानन्ति। भवतु। अन्यतो विचेष्यामि। (अग्रतोऽवलोक्य किंचित्परिक्रम्य) इमे खल्वपरे प्रभूततराः संगता वीरमनुष्या दृश्यन्ते। तदत्र गत्वा प्रक्ष्यामि। (उपगम्य) हंहो! जानीथ यूयं कस्मिन्नुद्देशे कुरुनाथो वर्तत इति?। कथमेतेऽपि मां प्रेक्ष्याधिकतरं रुदन्ति। तन्न खल्वेतेऽपि जानन्ति। हा! अतिकरुणं खल्वत्र वर्तते।[2]

---

[1]. अज्जा! अवि णाम इमस्सिं उद्देसे सारहिदुइओ दिट्ठो तुम्मेहि महाराजदुज्जोहणो ण वेत्ति?। कहं ण कोवि मन्तेदि!। होदु। एदाणं बद्धपरिअराणं पुरिसाणं समूहो दीसइ एत्थ गुदअ पुच्छिस्सम्।

[2]. कहं एदे क्खु ससामिणो गाढप्पहारादस्स घणसण्णाहजालदुब्भे– ज्जमुहेहिं कंकवदनेहिं हिअआदो सल्लाइं उद्धरन्ति। ता ण क्खु एदे जाणन्ति। होदु। अण्णदो विचिणइस्सम्। इमे क्खु अवरेप्प हूददरा संगदा वीरमणुस्सा दीसन्ति। ता एत्थ गदुअ पुच्छिस्सम्। हंहो! जाणह तुम्हे कस्सिं उद्देसे कुरुणाहो वट्टइ त्ति? कहं एदे वि मं पेक्खिअ अहिअदरं रोअन्दि। ता ण क्खु एदे वि जाणन्ति। (दृष्ट्वा) हा! अदिकरुणं क्खु एत्थ वट्टइ।

(लम्बी श्वास लेकर, आकाश में देखकर) कृपा से रहित, भरतकुल के विमुख, अरे! दुष्ट विधाता!

मेरी मृत्यु भले ही हो जाए, किन्तु मेरा हन्ता वृकोदर न होवे।

सूत– पाप शान्त हो, पाप शान्त हो, महाराज! यह क्या है?

दुर्योधन– अपने सभी भाइयों के मरवा डालने वाले, मुझे अब राज्य अथवा विजय प्राप्त करने से क्या लाभ?।।9।।

(उसके बाद बाणों के आघात से घावों पर पट्टियाँ बाँधे हुए सुन्दरक प्रवेश करता है)

सुन्दरक– हे आर्यो! क्या आपने इस स्थान पर सारथि के साथ महाराज दुर्योधन को देखा है अथवा नहीं। **(देखकर)** क्या कोई नहीं बता रहा है? ठीक है, यह युद्ध करने के लिए सन्नद्ध लोगों का समूह दिखायी दे रहा है, यहाँ जाकर पूछता हूँ। **(घूमकर और देखकर)** गहरी चोट खाए हुए, अपने स्वामी के बने कवचरूपी जाल के कारण दुर्भेद्य बाण निकालने वाले यन्त्रों से, ये लोग तो वक्षःस्थल से बाण निकाल रहे हैं, इसलिए ये तो नहीं जानते होंगे।

ठीक है, दूसरी जगह ढूँढ़ता हूँ **(सामने देखकर कुछ घूमकर)** ये दूसरे इकट्ठे हुए वीर लोग दिखायी दे रहे हैं, तो यहाँ पर चलकर पूछता हूँ। **(पास जाकर)** अरे! क्या आप लोग जानते हैं कि कुरुपति कहाँ हैं? क्या ये भी मुझे देखकर अत्यधिक रो रहे हैं, तब तो ये भी नहीं जानते हैं **(देखकर)** हाय! निश्चय ही, यह तो अत्यन्त कारुणिक दृश्य है।

शब्दार्थ– हन्ता–मारने वाला, घातिताः–मारने वाला, उद्देशे–प्रदेश में, दृष्टः– देखा गया, वा–अथवा, मन्त्रयते–मन्त्रणा कर रहा है, भवतु–ठीक है, प्रक्ष्यामि–पूछूँगा, परिक्रम्य–घूमकर, शल्याणि–बाणों को, जानन्ति–जानते हैं, विचेष्यामि–ढूँढ़ता हूँ, गत्वा–जाकर, इति–इसप्रकार, ऐसा, माम्–मुझको, रुदन्ति–रोते हैं, जानन्ति–जानते हैं।

एषा वीरमाता समरविनिहतं पुत्रकं श्रुत्वा रक्तांशुकनिवसनया समग्रभूषणया वध्वा सहाऽनुम्रियते। (सश्लाघम्) साधु वीरमातः! साधु अन्यस्मिन्नपि जन्मनि जन्मान्तरेऽनिहतपुत्रका भविष्यसि। भवतु, अन्यतः प्रक्ष्यामि। (अन्यतो विलोक्य) अयमपरो बहुप्रहारनिहतकायोऽकृतव्रणबन्ध एव योधसमूह इमं शून्यासनं तुरंगममुपालभ्य रोदिति। नूनमेतेषामत्रैव स्वामी व्यापादितः। तन्न खल्वेतेऽपि जानन्ति। भवतु। अन्यतो गत्वा प्रेक्ष्यामि।[1] (सर्वतो विलोक्य)

कथं सर्व एवाऽवस्थानुरूपं व्यसनमनुभवन्भागधेयविषमशीलतया पर्याकुलो जनः। तत्किमिदानीमत्र प्रेक्ष्यामि। कं वोपालप्स्ये? भवतु स्वमेवात्र विचेष्यामि। (परिक्रम्य) भवतु। दैवमिदानीमुपालप्स्ये। हंहो दैव! एकादशानामक्षौहिणीनां नाथो, ज्येष्ठो भ्रातृशतस्य, भर्ता गांगेय-जयद्रथद्रोणाऽङगराजशल्यकृपकृतवर्माऽश्वत्थामाप्रमुखस्य राजचक्रस्य सकलपृथ्वीमण्डलैकनाथो महाराजदुर्योधनोऽप्यन्विष्यते, अन्विष्यमाणोऽपि न ज्ञायते, कस्मिन्नुद्देशे वर्तत इति।[2]

---

[1]. एसा वीलमादा समलविणिहदं पुत्तअं सुणिअ रत्तं सुअणिवसणाए समग्गभूसणाए बहुए सह अणुमरेदि। साहु वीरमादे! साहु। अण्णस्सिं वि जम्मन्तरे अणिहदपुत्तआ हुविस्ससि। होदु। अण्णदो पुच्छिस्सम्। अअं अवरो बहुप्पहारणिहदकाओ अकिदव्वणबन्धो एव्व जोहसमूहो इमं सुण्णासणं तुलंगमं उवालहिअ रोइदि। णूणं एदाणं एत्थ एव्व सामी वावादिदो। ता ण क्खु एदे वि जाणन्दि । होदु । अण्णदो गदुअ पुच्छिस्सम्, कहं सव्वो एव्व अवत्थाणुरूवं व्वसणं अणुभवन्तो भाअधेअविसमसीलदाए पज्जाउलो जणो। ता कं दाणीं एत्थ पुच्छिस्सम्? कं वा उवालहिस्सम्। होदु। सअं एव्व एत्थ विचिणइस्सम्। होदु। देव्वं दाणीं उवालहिस्सम्। हंहो देव्व! एआदसाणं अक्खोहिणीणं णाहो, जेट्ठो भादुसदस्स, भत्ता गांगेअजयद्दथ-द्दोणअंगराअसल्लकिवकिदवम्मअस्सत्था मप्पहुस्स राअचक्कस्स सअलप्पुहवीमण्डले-कक्णाहो महाराअ दुज्जोहणो वि अण्णेसीअदि। अण्णेसीअन्तो वि ण जाणीअदि करिंस उद्देसे वट्टइ त्ति, (विचिन्त्य निःश्वस्य च) अहवा किं एत्थ देव्वं उवालहामि।

[2]. जदो तस्स क्खु एदं णिब्भच्छिअविउरवअणवीअस्स, अवधीरिदपि दामह हिदो वदेसंकुरस्स, सउणिहद अप्पोच्छाणादिविरूढमूलस्स, जदुगेह जूदविससाहिणो सम्भूदचिर आलसम्बद्धावेरालवालस्स पांचाली केसग्गह णकुसुमस्स फलं परिणमदि।

यह वीरमाता युद्ध में पुत्रों का मारा जाना सुनकर, रक्तांशुक धारण किए हुए, सभी प्रकार के आभूषणों से युक्त वधू के साथ मरने के लिए जा रही है। **(प्रशंसा करते हुए)** धन्य हो, वीरमाता! धन्य हो। दूसरे जन्म में निश्चय ही, तुम्हें पुत्रवध का शोक भोगना नहीं पड़ेगा। ठीक है, दूसरे स्थान पर पूछता हूँ। **(दूसरी ओर देखकर)** अनेक प्रहारों से घायल शरीर वाला, घावों पर पट्टी बाँधे बिना ही योद्धाओं का दूसरा यह समूह, शून्य आसन वाले, घोड़े को उपालम्भ देकर रो रहा है। निश्चय ही, इसका स्वामी यहाँ मारा गया है, तो निश्चय ही, ये भी नहीं जानते हैं। ठीक है, दूसरी जगह जाकर खोजूँगा।

(चारों ओर देखकर) क्या सभी लोग अपनी अवस्था के अनुरूप दुःखों का अनुभव करते हुए, प्रतिकूल दैव के कारण भयभीत हैं, इसलिए यहाँ भला किससे पूछूँ? या फिर किसे उलाहना दूँ? ठीक है, स्वयं ही चलकर यहाँ देखता हूँ। **(घूमकर)** अच्छा तो अब भाग्य को ही कोसता हूँ। हा दैव! ग्यारह अक्षौहिणी सेना के सेनाध्यक्ष, सौ भाइयों के बड़े भाई, भीष्म, जयद्रथ, द्रोण, कर्ण, शल्य, कृपाचार्य, कृतवर्मा, अश्वत्थामा आदि राजाओं के समूह के स्वामी, सम्पूर्ण भूमण्डल के एकमात्र भर्ता, महाराज दुर्योधन भी खोजे जा रहे हैं। ढूँढ़े जाने पर भी न जाने किस स्थान पर हैं? यह पता नहीं चल पा रहा है।

शब्दार्थ– समरविनिहतम्–युद्ध में मारे गए, श्रुत्वा–सुनकर, रक्त–लाल, अंशुक–रेशमी वस्त्र, अनुम्रियते–पीछे मरा जा रहा है, जन्मनि–जन्म में, भविष्यसि–होओगी, प्रक्ष्यामि–पूछूँगा, उपालभ्य–उलाहना, रोदिति–रो रहा है, व्यापादितः–मारा गया, विचेष्यामि–खोजूँगा, एकादश–ग्यारह, अक्षौहिणी–विशिष्ट संख्यायुक्त हाथी, घोड़े, रथी तथा पैदल सेना।

(अन्यतोऽवलोक्य) अम्मो! जहा एत्थं एसो विविहरदिणप्पहा ससंबलिदसूरकिरणप्पसूद सक्कचावसहस्ससं पूरिदपूदिसामुहो लूणकेदुवंसो रहो दीसइ।

(अन्यतो विलोक्य)

अथवा किमत्र दैवमुपालभे। यतस्तस्य खल्विदं निर्भत्सितविदुर-वचनबीजस्याऽवधीरितपितामहहितोपदेशांकुरस्य, शकुनिहतकप्रोत्साहनादि–विरूढमूलस्य जतुगृहद्यूतविषशाखिनः संभूतचिरकाल सम्बद्धवैराल-वालस्य पांचालीकेशग्रहणकुसुमस्य फलं परिणमिति।

अम्मो! यथाऽत्रैष विविधरत्नप्रभासंवलितसूर्यकिरणप्रसूतशक्रचाप-सहस्रसंपूरितदिङ्मुखो लूनकेतुवंशो रथो दृश्यते, तदहं तर्कयाम्य-वश्यमेतेन महाराजदुर्योधनस्य विश्रामोद्देशेन भवितव्यम्। यावन्नि-रूपयामि। (उपगम्य दृष्ट्वा निःश्वस्य च) कथमेकादशानामक्षौहिणीनां नायको भूत्वा महाराजो दुर्योधनः प्राकृतपुरुष इवाऽश्लाघनीयायां भूमावुपविष्टस्तिष्ठति। अथ वा तस्य खल्विदं पांचालीकेशग्रहकुसुमस्य फलं परिणमति। (उपगम्य दृष्ट्वा च) जयतु जयतु महाराजः।[1]

सूतः– (विलोक्य) आयुष्मन्! समरात्सुन्दरकः प्राप्तः।

दुर्योधनः– (विलोक्य) अये सुन्दरक! कच्चित्कुशलमंगराजस्य?

सुन्दरकः– देव! कुशलं शरीरमात्रेण।[2]

दुर्योधनः– (ससम्भ्रमम्) सुन्दरक! किं किरीटिनाऽस्य निहता धौरेयकाः, हतः सारथिर्भग्नो वा रथः ?

सुन्दरकः– देव! न भग्नो रथः। अस्य मनोरथोऽपि।[3]

दुर्योधनः– (सरोषम्) अरे! किमेवमस्पष्टकथितैराकुलमपि मे मनः पर्याकुलयसि। तदलं सम्भ्रमेण। अशेषतो विस्पष्टं कथ्यताम्।

---

[1]. ता अहं तकेमि अवस्सं एदिणा महाराअ दुज्जोहणस्स विस्सामुद्दे सेण होदव्वम्। याव निरूपेमि। (उपगम्य दृष्ट्वा निःश्वस्य च) कधं एआदहणं अक्खोहिणीणं णअको भविअ महाराओ दुज्जोहणो पइदपुरिसो विअ असलाहणीए भूमीए उवविट्ठो चिट्ठदि। अधवा तस्स क्खु एदं पंचालीकेसग्गहकुसुममस्स फलं परिणमदि। (उपसृत्य दृष्ट्वा च) जअदु जअदु महाराओ।

[2]. देव कुसलं सरीरमेत्तेण।

[3]. देव! ण भग्गो रहो। से मणोरहो वि।

(दूसरी ओर देखकर)

अथवा अब भाग्य को उलाहना देने से क्या लाभ? यह तो विदुर के वचनों के **तिरस्काररूप बीज** का, पितामह के हितकारी उपदेश पर ध्यान न देने रूपी **अंकुर का**, दुष्ट शकुनि के प्रोत्साहन रूपी वृद्धि को प्राप्त होने वाली **जड़** का, लाक्षागृह एवं जुए रूपी **विषवृक्ष** का, उत्पन्न हुए लम्बे समय से जुड़े हुए वैररूपी **आलवाल** (थाँवले) का एवं द्रौपदी के केश ग्रहणरूपी **फूल का फल** है। अरे! जो यहाँ अनेक रत्नों की कान्ति से युक्त, सूर्य की किरणों से उत्पन्न, हजारों इन्द्रधनुषों से दिशाओं को व्याप्त किए हुए, टूटे हुए ध्वज–दण्ड वाला, रथ दिखायी दे रहा है। इसलिए अनुमान करता हूँ कि अवश्य ही, यह महाराज का विश्रामस्थल होगा। तो देखूँ, **(पास जाकर, देखते हुए लम्बा श्वास लेकर)** भला कैसे ग्यारह अक्षौहिणी सेना के स्वामी होकर, महाराज दुर्योधन सामान्य व्यक्ति के समान, उबड़–खाबड़ (अप्रशस्त) भूमि पर बैठे हुए हैं अथवा यह उसी द्रौपदी के केश पकड़ने के **फूल का फल** प्रदर्शित हो रहा है। (पास जाकर, देखकर) जय हो, महाराज की जय हो।

सूत– (देखकर) आयुष्मन्! युद्धभूमि से सुन्दरक आया है।

दुर्योधन– (देखकर) अरे! सुन्दरक। अंगराज कुशल तो हैं?

सुन्दरक– महाराज! शरीरमात्र से कुशल हैं।

दुर्योधन– (घबराकर) सुन्दरक! क्या अर्जुन ने इसके घोड़े मार दिए हैं? सारथि को मार दिया अथवा रथ को नष्ट कर डाला है?

सुन्दरक– महाराज! रथ ही नहीं, अपितु उनका तो मनोरथ भी नष्ट कर डाला।

दुर्योधन– (क्रोधपूर्वक) अरे! इसप्रकार अस्पष्ट कहकर, व्याकुल हुए मेरे मन को अधिक व्याकुल क्यों कर रहा है? इसलिए घबराहट से बस करो, सभी कुछ स्पष्टरूप से कहो।

सुन्दरकः– यद्देव आज्ञापयति। अये! दिष्ट्या देवस्य मुकुटमणिप्रभावेणापनीता मे रणप्रहारवेदना। शृणोतु देवः। अस्तीदानीं कुमारदुःशासनवध[1] (इत्यर्धोक्ते मुखमाच्छाद्य शंकां नाटयति)

सूतः– सुन्दरक! कथय। कथितमेव दैवेन।

दुर्योधनः– कथ्यताम् । श्रुतमस्माभिः।

सुन्दरकः– (स्वगतम्) कथं दुःशासनवधः श्रुतो देवेन। शृणोतु देवः। अद्य तावत्कुमारदुःशासनवधामर्षितेन स्वामिनांगराजेन कृतकुटिलभृकुटीभंगभीषणललाटपट्टेनाऽविज्ञातसन्धानमोक्षेण शिलीमुखसंघातवर्षिणाऽभियुक्तः स दुराचरो दुःशासनवैरीमध्यमपाण्डवो भीमसेनहतकः।[2]

उभौ– ततस्ततः?

सुन्दरकः– ततो देव! उभयबलमिलद्दीप्यमानकरितुरगपदातिसमुद्भूतधूलिनिकरेण पर्यस्तगजघटासंघातेन च विस्तीर्यमाणेनान्धकारेणान्धीकृतमुभयबलम्। न खलु गगनतलं लक्ष्यते।[3]

उभौ– ततस्ततः?

सुन्दरकः– ततो देव! दूराकृष्टधनुर्गुणाच्छोटनटंकारगम्भीरभीषणेनाऽन्धकारेण ज्ञायते 'गर्जितं प्रलयजलधरेणेति।[4]

---

1. जं देवो आणवेदि। अए दिट्ठिआ देवस्स मउडमणिप्पहावेण अव णीदा मे रणप्पहारवेअणा। (इति साटोपं परिक्रम्य) सुणादु देवो। अज्ज दाव कुमालदुस्साणवह

2. कधं दुस्सासणबहो सुदो देवेण। (प्रकाशम्) सुणादु देवो। अत्थि दाणीं कुमालदुस्सासणवहामरिसिदेण सामिणा अंगराएण किदकुडिलभि उडीभंगभीसण ललाडवट्टेण अविण्णद संधाणमोक्खेण सिलीमुह संघाद वरिसिणा अभिजुत्तो सो दुराआरो दुस्सासणबैरिओ मज्झमपण्डवो भीमसेणहदओ।

3. तदो देव! उहअबलमिलन्तदीप्पन्तकरितुरअपदादिसमुद्धूदधूलिणि अरेण पज्जथगअधडा संघादेण अ वित्थरन्तेण अन्धआरेण अन्धीकिदं उहअबलम्। ण खु गगणतलं लक्खीअदि।

4. तदो देव! दूराकट्टि अधणु ग्गुणाच्छोडणटंकारगम्भीरभीसणेण अन्धआरेण जाणाअति–गज्जिदं पलअ जलहरेण त्ति।

सुन्दरक– जैसी महाराज की आज्ञा। सौभाग्य से महाराज की मुकुट की मणियों के प्रताप से मेरी युद्ध में किए गए प्रहारों की पीड़ा दूर हो गयी है। **(यह कहकर तेजी से घूमकर)** महाराज! सुनिए। आज कुमार दुःशासन के वध....

(आधा कहकर, मुँह को ढ़ककर शंका का अभिनय करता है)

सूत– सुन्दरक! कहो, यह तो विधाता ने ही कह दिया है।

दुर्योधन– कहो, हमने सुन लिया है।

सुन्दरक– **(अपने मन में)** क्या दुःशासन के वध का समाचार महाराज ने सुन लिया है? (प्रकट में) महाराज सुनिए। इसके बाद, कुमार दुःशासन के वध से क्रुद्ध, टेढ़ी भौंहों के कारण भयंकर ललाट वाले, महाराज अंगराज कर्ण ने इसप्रकार बाणों के समूह की वर्षा करके, उस दुःशासन के शत्रु, दुराचारी, दुष्ट मध्यम पाण्डव भीमसेन पर आक्रमण कर दिया, जिनका धनुष चढ़ाना एवं छोड़ा जाना तक दिखायी नहीं दे रहा था।

दोनों– उसके बाद, उसके बाद।

सुन्दरक– तत्पश्चात् हे देव! दोनों सेनाओं के मिल जाने से, दीप्यमान हाथी, घोड़े तथा पैदल सैनिकों द्वारा उठाए गए धूलि–समूह से फैले हुए, गजघटा समूह द्वारा फैलाए गए, अन्धकार से अन्धा बनाया गया गगनतल, वास्तव में दिखायी तक नहीं दे रहा था।

दोनों– उसके बाद, उसके बाद।

सुन्दरक– हे देव! उसके बाद, कान तक खींचे हुए, धनुष की डोरी को छोड़ने से उत्पन्न टंकार के गम्भीर एवं भयंकर घोष एवं अन्धकार से मानो प्रलयकालीन मेघ का गर्जन हो रहा था।

शब्दार्थ– यत्–जो, दिष्ट्या–सौभाग्य से, अपनीता–दूर हो गयी, रणप्रहार–वेदना–युद्ध में प्रहारों की पीड़ा। शृणोतु–सुनिए, देवः–महाराज, अस्ति–है, कथय–कहो, दैवेन–भाग्य द्वारा, श्रुतम्–सुन लिया, निकरेण–समूह द्वारा, हतक–नीच, लक्ष्यते–दिखायी दे रहा था, ज्ञायते–पता चल रहा था।

दुर्योधनः– ततस्ततः?

सुन्दरकः– ततो देव! द्वयोरपि तयोरन्योऽन्यसिंहनादगर्जितपिशुनं विविधपरिमुक्तप्रहरणाहतकवचसंगलितज्वलनविद्युल्लतं, बहलरुधिर-बिन्दुखद्योतभासुरगम्भीरस्तनितचापजलधरप्रसरच्छरधारासहस्रवर्षदुर्दर्शं जातं समरदुर्दिनम्।[1]

दुर्योधनः– ततस्ततः?

सुन्दरकः–ततो देव! एतस्मिन्नन्तरे ज्येष्ठस्य भ्रातुः परिभवशंकिना धनंजयेन वज्रनिर्घातनिर्घोषविषमरसितध्वजाग्रस्थितमहावानरस्तुरंगम-संवाहनव्यापृतवासुदेवशंखचक्रासिगदालांछितचटुलचतुर्बाहुदण्डदुर्दर्शन-आपूरितपांचजन्यदेवदत्ततारररसितप्रतिरवभरितदशदिशामुखकुहरो धावित-स्तमुद्देशं रथवरः।[2]

दुर्योधनः– ततस्ततः?।

सुन्दरकः– ततो भीमसेनधनंजयाभ्यामभियुक्तं पितरं प्रेक्ष्य ससम्भ्रमं विगलितमवधूय रत्नशीर्षकमाकर्णाकृष्टकठिनकोदण्डजीवो दक्षिणहस्तो-त्क्षिप्तशरपुंखविघट्टनत्वरायितसारथिकस्तं देशमुपगतः कुमारवृषसेनः।[3]

दुर्योधनः– (सावष्टम्भम्) ततस्ततः?।

सुन्दरकः– ततश्च देव! तेनाऽऽगच्छतैव कुमार वृषसेनेन विदलिताऽसिलताश्यामलस्निग्धपुंखैः कठिनकंकपत्रैः कृष्णवर्णैः शाण-

---

[1]. तदो देव! दोहिणं वि ताणं अण्णोण्णसिंहणादगज्जिदपिसुणं विविह परिमुक्क प्पहरणाहद कवअ संगलिदज्जलण विज्जुल्लअं बहललुहिल बिन्दुखज्जो अभासुर गम्भीर त्थणि अचापजलहरप्पसरन्तरसरधारासहस्स वरिसदुदंस्सं जादं समरदुद्दिणं।

[2]. तदो देव! एदस्सिं अन्तरे जेट्ठस्स भादुणो परिभअ संकिणा धणंज एण वज्जणिग्घादणिग्घोसविसमरसिदधअअग्गट्ठिदमहावाणरो, तुरंग मसंबाहणवापिदवासुदेव संखचक्कासिगदालंच्छिदचटुलचउब्बाहुदण्डदुद्द सणो, आपूरिअपंचजण्णदेअअत्त ताररसिदप्पदिरवभरिद्दसदिसामुहकुहरो धाविदो तं उद्देसं रहवरो।

[3]. तदो भीमसेणधणंजएहिं अभिजुत्तं पिदरं पेक्खिअ ससम्भमं विअलिअं अवधूणिअ रअणसीसअं आकण्णाकड्ढिदकठिणकोदण्डजीओ दाहिणह त्तुक्खित्तसरपुंखविघट्टण तुवराइ दसारहीओ तं देसं उवगदो कुमाल विससेणो।

दुर्योधन– उसके बाद, उसके बाद।

सुन्दरक– उसके पश्चात् हे देव! वहाँ पर उन दोनों में परस्पर सिंहनाद के समान भयंकर गर्जन करने वाला, विविध प्रकार से छोड़े गए, शस्त्रों के प्रहार से निकलने वाली अग्निरूपी विद्युल्लता वाला, अत्यधिक रुधिररूपी जुगनुओं से प्रकाशित, गम्भीर ध्वनि से युक्त धनुषरूपी बादलों से निकलने वाली, हजारों बाणोंरूपी धाराओं की वर्षा के कारण, दिखायी पड़ने में भी मुश्किल युद्धरूपी दुर्दिन हो गया।

दुर्योधन– उसके बाद, उसके बाद।

सुन्दरक– उसके बाद हे देव! इसी बीच ज्येष्ठ भ्राता भीमसेन की पराजय की आशंका से, धनंजय ने बिना बादलों के ही वज्रपात की ध्वनि के समान, विषम ध्वनि वाला, ध्वज के अग्रभाग पर विशाल वानर से युक्त, शंख, चक्र, गदा एवं तलवार से सुशोभित, चंचल, चार भुज–दण्डों से युक्त, भगवान् वासुदेव द्वारा पांचजन्य तथा देवदत्त शंखों की उच्च ध्वनि की प्रतिध्वनि से दशों दिशाओं के मुखरूपी गुफाओं को आपूरित करते हुए, अश्वों को हाँके जाने वाले, उत्तम रथ को उसी स्थान को लक्ष्य करके दौड़ा दिया।

दुर्योधन– उसके बाद, उसके बाद।

सुन्दरक– उसके पश्चात् भीमसेन और धनंजय से पिता को घिरा हुआ देखकर, वेग के कारण सिर से खिसके हुए, रत्नों से जड़े हुए मुकुट का भी तिरस्कार करके, कान तक कठोर धनुष की प्रत्यंचा को खींचकर, दाहिने हाथ से उठाए गए, बाणों की पूँछ को कुरेद कर, सारथि को शीघ्रता के लिए प्रेरित करके, **कुमार वृषसेन** उसी स्थान पर आ गए।

दुर्योधन– (गर्वपूर्वक) उसके बाद, उसके बाद।

सुन्दरक– और उसके बाद हे देव! आते ही कुमार वृषसेन ने टूटी हुई असिलता के समान, श्यामल और स्निग्ध पंखों से कठोर कंक पत्र वाले, काले रंग की कसौटी के पत्थर पर घिसे हुए बाण के

शिलानिशितश्यामलशल्यबन्धैः कुसुमित इव तरुर्मुहूर्तेन शिलीमुखैः प्रच्छादितो धनंजयस्य रथवरः।[1]

उभौ– (सहर्षम्) ततस्ततः?

सुन्दरकः– ततो देव! तीक्ष्णनिक्षिप्तनिशितभल्लबाणवर्षिणा धनंजयेनेषद्विहस्य भणितम्– 'अरे रे वृषसेन! पितुरपि तावत्ते न युक्तं मम कुपितस्याभिमुखं स्थातुम्, किं पुनर्भवतो बालस्य! तद् गच्छ। अपरैः कुमारैः सह गत्वा युध्यस्व। एवं वाचं निशम्य गुरुजनाधिक्षेपेणोद्दीपित–कोपोपरक्तमुखमण्डलविजृम्भितभृकुटीभंगभीषणेन चापधारिणा कुमार–वृषसेनेन मर्मभेदकैः परुषविषमैः श्रुतिपथकृतप्रणयैर्निर्भर्त्सितो गाण्डीवी बाणैर्न पुनर्दुष्टवचनैः।[2]

दुर्योधनः– साधु वृषसेन! साधु। सुन्दरक! ततस्ततः।

सुन्दरकः– ततश्च देव! निशितशराभिघातवेदनोपजातमन्युना किरीटिना चण्डगाण्डीवजीवाशब्दनिर्जितवज्रनिर्घातघोषेण बाणनिपतन–प्रतिषिद्धदर्शनप्रसरेण प्रस्तुतं शिक्षाबलानुरूपं किमप्याश्चर्यम्।[3]

दुर्योधनः– (साकूतम्) ततस्ततः?

---

1 . तदो अ देव! तेण आअच्छन्तेण एव्व कुमालविससेसेण विदलिदा सिलदासामल सिणिद्धपुंखेहि कठिणकंकवत्तेहिं किसणवणणेहिं साण सिलाणिसिदसामलसल्लबन्धेहिं कुसुमिदो विअ तरु मुहुत्तएण सिली मुहेहिं पच्छादिदो धणंजअस्स रहबरो।

2 . तदो देव! तीक्खविक्खित्तणिसिदभल्लबाणवरिसिणा धणंजएण ईसि विहसिअ भणिदम्– 'अरे रे विससेण! पिदुणो वि दाव दे ण जुत्तं मह कुविदस्स अभिमुहं ठादुं। किं उण भवदो वालस्स ता गच्छ। अवरेहिं कुमारेहिं सह गदुअ आओधेहि। एव्वं वाअं णिसमिअ गुरुअणाहिक्खेवेण उद्दीविअकोवोवरत्तमुहमण्डलविअम्भि अभिउडिभंगभीसणेण चावधारिणा कुमालविससेणेण मम्मभेदएहिं परुसविसमेहिं सुदिवहकिदप्पणएहिं णिब्भच्छिो गण्डीवी बाणेहिं ण उण दुट्ठवअणेहिं।

3 . तदो अ देव! णिसिदसराभिघादवेअणोपजादमण्णुणा किरीटिणा चण्डगणडीव जीआसद्दणिज्जिदवज्जणिग्घादघोसेण बाणणिपडणपडिसि द्धदंसणप्पसरेण पत्थुदं सिक्खाबलाणुरूबं किं वि अच्चरिअम्।

फलकों से क्षण भर में ही धनंजय का रथ उसीप्रकार आच्छादित कर दिया, **जैसे–** पुष्पों से लदा हुआ वृक्ष भौंरों के कारण काला दिखायी देने लगता है।[1]

दोनों– (प्रसन्नतापूर्वक) उसके बाद, उसके बाद।

सुन्दरक– उसके पश्चात् हे महाराज! तेजी से फैंके गए, तीक्ष्ण भालों एवं बाणों की वर्षा करने वाले, धनंजय ने किंचित् मुस्कुराकर कहा कि– अरे! ओ, वृषसेन! तुम्हारे तो कुपित हुए पिता भी मेरे समक्ष ठहरने में समर्थ नहीं हैं, फिर तुम जैसे बालक का तो कहना ही क्या? इसलिए जाओ, दूसरे कुमारों के साथ जाकर युद्ध करो। इस बात को सुनकर गुरुजनों की निन्दा से उद्दीप्त क्रोध के कारण, पूरी तरह लाल मुखमण्डल एवं भृकुटि के भंग से भयंकर प्रतीत होने वाले, धनुर्धारी कुमार वृषसेन ने मर्मभेदी कठोर तथा विषम बाणों को कानों तक खींच कर, जोरदार वर्षा करते हुए गाण्डीवी अर्जुन की भर्त्सना की, बस अपशब्दों द्वारा निन्दा नहीं की।

दुर्योधन– साधु, वृषसेन! साधु। सुन्दरक! उसके बाद क्या हुआ?

सुन्दरक– और उसके बाद महाराज! वहाँ पर तीक्ष्ण बाणों के प्रहार से हो रही पीड़ा से उत्पन्न क्रोध वाले, किरीटी अर्जुन ने, भयंकर गाण्डीव की प्रत्यंचा के शब्द से वज्रपात शब्द को भी तिरस्कृत करने वाले, बाणों की निरन्तर वृष्टि से, कुछ भी दिखायी न पड़ने वाला, धनुर्विद्या एवं पराक्रम के अनुरूप आश्चर्यजनक युद्धकर्म प्रारम्भ कर दिया।

दुर्योधन– **(घबराकर)** उसके बाद, उसके बाद।

---

[1]. महाकवि की उपमाओं की मौलिकता दर्शनीय है।

सुन्दरकः– ततश्च देव! तत्तादृशं प्रेक्ष्य शत्रोः समरव्यापार-चतुरत्वमविभाविततूणीरमुखधनुर्गुणगमनाऽऽगमनशरसन्धानमोक्षचटुलकर-तलेन कुमारवृषसेनेनापि सविशेषं प्रस्तुतं समरकर्म।[1]

दुर्योधनः– ततस्ततः?

सुन्दरकः– ततश्च देव! अत्रान्तरे विमुक्तसमरव्यापारो मुहूर्त-विश्रामितवैरानुबन्धो द्वयोरपि कुरुराजपाण्डवबलयोः 'साधु कुमारवृषसेन! साधु' इति कृतकलकलो वीरलोकोऽवलोकयितुं प्रवृत्तः।[2]

दुर्योधनः– (सविस्मयम्) ततस्ततः?

सुन्दरकः–ततश्च देव! अवधीरितसकलधानुष्कचक्रपराक्रमशालिनः सुतस्य तथाविधेन समरकर्मारम्भेण हर्षरोषकरुणाशंकासंकटे वर्तमानस्य स्वामिनोऽंगराजस्य निपतिता शरपद्धतिर्भीमसेने बाष्पपर्याकुलादृष्टिः कुमारवृषसेने।[3]

दुर्योधनः– (सभयम्) ततस्ततः?

सुन्दरकः– ततश्च देव! उभय बलप्रवृत्त साधुकारमर्षितेन शरवर्ष प्रज्वलितेन गाण्डविना तुरगेषु सारथावपि रथवरे धनुष्यपि जीवायामपि नरेन्द्र लांछने सितात पत्रे च व्यापारितः समं शिलीमुखासारः।[4]

दुर्योधनः– (सभयम्) ततस्ततः?

---

1. तदो अ देव! तं तारिसं पेक्खिअ सत्तुणो समरव्वावारचउरत्तणं अविभाविअतूणीर मुहधणुग्गुणगमणागमणसरसंधाणमोक्खचडुलकरअलेण कुमाल विससेणेण वि सविसेसं पत्थुदं समलकम्म।

2. तदो अ देव! एत्थन्तरे विमुक्कसमरव्वावारो मुहुत्तविस्सामिद वेराणुबन्धो दोणं वि कुरुराअपण्डवबलाणं साहु कुमाल विससेण ! साहु! त्ति किदकलअलो वीरलोओ अवलोइदुं वउत्तो।

3. तदो अ देव! अवहीरिदसअलधाणुक्कचक्कपराक्कमसालिणो सुदस्स तहाविहेण समलकम्मालम्भेण हरिसरोसकरुणासंकासंकडे वट्टमाणस्स सामिणो अंगराअस्स णिवडिआ सरपद्धइ भीमसेणो, बाष्पपज्जाउला दिट्ठी कुमालविससेणो।

4. तदो अ देव! उभअबलप्पउत्तसाहुकारामरिसिदेण सरवरिसज्जलिदेण गाण्डी विणा तुरगेसु सारहि वि रहवरे धणुं वि जीआइं वि णालिन्द लांछणे सिदादवत्ते अ व्वावारिदो समं सिलीमुहासारो।

सुन्दरक– और उसके पश्चात् हे देव! शत्रु के इसप्रकार युद्धकर्म को देखकर, युद्ध व्यापार के चातुर्य को, जिसमें धनुष पर कब बाण चढ़ाया गया और कब उसे छोड़ दिया गया? यह दिखायी न पड़ने वाले, बाण को चढ़ाने तथा छोड़ने में चंचल हाथों वाले, कुमार वृषसेन ने भी विशेष युद्धकौशल को प्रदर्शित करना आरम्भ कर दिया।

दुर्योधन – उसके बाद, उसके बाद।

सुन्दरक– और उसके बाद हे देव! युद्ध–व्यापार को बीच में ही छोड़कर, क्षणभर के लिए वैरभाव को भुलाकर, कौरव एवं पाण्डव दोनों सेनाओं के शूरवीर, 'धन्य है, कुमार वृषसेन! धन्य है,' इसप्रकार कोलाहल करते हुए युद्ध को देखने में प्रवृत्त हो गए।

दुर्योधन– (विस्मयपूर्वक) उसके बाद, उसके बाद।

सुन्दरक– और उसके बाद हे देव! सम्पूर्ण धनुर्धारी वर्ग को तिरस्कृत करने वाले, पराक्रमी पुत्र के इसप्रकार के युद्धकौशल को देखकर, हर्ष, क्रोध, करुणा एवं शंका के संकट में पड़े हुए स्वामी अंगराज के बाणों की वर्षा भीमसेन पर और अश्रुपूर्ण, व्याकुल दृष्टि कुमार वृषसेन पर पड़ी।

दुर्योधन– (भयपूर्वक) और उसके बाद।

सुन्दरक– और उसके बाद हे देव! दोनों सेनाओं द्वारा दिए गए, साधुवाद से क्रुद्ध, बाणों की वृष्टि से प्रज्वलित, गाण्डीवी अर्जुन ने अश्व, सारथी, रथ, धनुष, राजचिह्न, एवं श्वेत छत्र पर शीघ्र ही बाणों की वृष्टि आरम्भ कर दी।

दुर्योधन– (भयपूर्वक) उसके बाद, उसके बाद।

शब्दार्थ– शिलीमुखैः–बाणों द्वारा, भौंरों द्वारा, आच्छादितः–ढ़का हुआ, तीक्ष्ण–तीखे, निशित–बाण, निक्षिप्त–गिराए गए, भल्ल–भाले, भणितम्–कहा गया, स्थातुम्–ठहरने के लिए, युध्यस्व–युद्ध करो, निशम्य–सुनकर, अधिक्षेपेण–तिरस्कार से, चाप–धनुष, निर्भर्त्सितः–भर्त्सना की, शर–बाणों के, अभिघात–आघात से, वेदना –पीड़ा के, उपजात–उत्पन्न होने वाले, मन्युना–क्रोध से।

सुन्दरकः– ततश्च देव! विरथो लूनगुणकोदण्डः परिभ्रमण-व्यापारमात्रप्रतिषिद्धशरसम्पातो मण्डलाग्रेण विचरितुं प्रवृत्तः कुमार-वृषसेनः।[1]

दुर्योधनः– (साशंकम्) ततस्ततः?

सुन्दरकः–ततश्च देव! सुतरथविध्वंसेनामर्षितेन स्वामिनाऽङ्ग-राजेनाऽगणितभीमसेनाभियोगेन परिमुक्तो धनंजयस्योपरि शिलीमुख-सारः। कुमारवृषसेनोऽपि परिजनोपनीतमन्यं रथमारुह्य पुनरपि प्रवृत्तो धनंजयेन सहाऽऽयोधितुम्।[2]

उभौ– साधु वृषसेन! साधु। ततस्ततः?

सुन्दरकः– ततो देव! भणितं च कुमारेण– 'रे रे ताताधिक्षेपमुखर! मध्यमपाण्डव! मम शरास्तव शरीरमुज्झित्वाऽन्यस्मिन्न निपतन्ति' इति भणित्वा शरसहस्रैः पाण्डवशरीरं प्रच्छाद्य सिंहनादेन गर्जितुं प्रवृत्तः।[3]

दुर्योधनः– (सविस्मयम्) अहो! बालस्य पराक्रमो मुग्धस्वभावस्या-ऽपि ततस्ततः ?।

सुन्दरकः– ततश्च देव! तं शरसम्पातं समवधूय, निशितशराभि-घातजातमन्युना किरीटिना गृहीता रथोत्संगात् क्वणत्कनककिंकिणी-जालझंकारविराविणी मेघोपरोधविमुक्तनभस्तलनिर्मलानिशितश्यामल-स्निग्धमुखी विविधरत्नप्रभाभासुरभीषणरमणीयदर्शना शक्तिर्विमुक्ता कुमाराभिमुखी।[1]

---

1 . तदो अ देव! विरहो लूणगुणकोदण्डो परिब्भमणव्वावारमेत्त पडिसिद्धसरसम्पादो मण्डलाग्गेण विअरिदुं पउत्तो कुमालविससेणो।

2 . तदो अ देव! सुदरहबिद्धं सेणामरिसिदेण सामिणा अंगराएण अगणि अभीमसेणाभिजोएण पडिमुक्को धणंजअस्स उवरि सिलीमुहा सारो। कुमाल विससेणो वि परिजणोवणदं अण्णं रहं आरुहिअ पुणो वि पउत्तो धणंजएण सह आओधेदुम्।

3 . तदो देव। भणिदं च कुमालेण– 'रे रे तादाहिक्खेवमुहल मज्डमपण्डव ! मह सरा तुह सरीरं उज्झिअ अणणरिसं ण णिवडन्ति' त्ति, भणिअ सरसहस्सेहिं पण्डवसरीरं पच्छादिअ सिंहणादेण गज्जिदुं पउत्तो।

सुन्दरक– और उसके पश्चात् हे देव! रथविहीन, धनुष की प्रत्यंचा कटा हुआ, कुमार वृषसेन केवल पैंतरे बदले हुए ही युद्ध में बाण–वृष्टि से बचता हुआ, मण्डल बनाकर, घूमने लगा।

दुर्योधन– (शंकित होकर) उसके बाद, उसके बाद।

सुन्दरक– और उसके बाद हे महाराज! पुत्र के रथ के विनष्ट होने से क्रुद्ध, स्वामी अंगराज कर्ण, भीमसेन के आक्रमण की परवाह किए बिना ही, धनंजय के ऊपर बाणों की वर्षा करने में जुट गए और कुमार वृषसेन भी सेवक द्वारा लाए गए, दूसरे रथ पर आरूढ़ होकर, फिर से धनंजय के साथ युद्ध करने में प्रवृत्त हो गए।

दुर्योधन– साधु, वृषसेन! साधु, उसके बाद क्या हुआ?

सुन्दरक– उसके बाद महाराज! कुमार ने कहा कि– 'पिताजी पर आक्षेप करने में मुखर! मध्यम पाण्डव! मेरे बाण तुम्हारे शरीर को छोड़कर अन्यत्र नहीं गिरेंगे।' यह कहकर हजारों बाणों से अर्जुन के शरीर को आच्छादित करके, सिंहनाद के समान गर्जन करने में प्रवृत्त हो गया।

दुर्योधन– (विस्मयपूर्वक) अहो! भोले–भाले स्वभाव वाले, बालक का पराक्रम धन्य है। उसके पश्चात् क्या हुआ?

सुन्दरक– और उसके बाद हे राजन्! उन बाणों की वर्षा की परवाह न करके, तीक्ष्ण बाणों के प्रहार से कुपित हुए, अर्जुन ने रथ के अन्दर बजती हुई, सोने की घण्टियों के जाल से छन–छन करती हुई, बादलों के आवरण से रहित, नभोमण्डल के समान निर्मल, तीक्ष्ण, श्यामल, स्निग्ध, फलक वाली, अनेक प्रकार के रत्नों की कान्ति से दीपित, भयंकर एवं मनोरम प्रतीत होने वाली, **शक्ति** को उठाया और कुमार वृषसेन की ओर छोड़ दिया।

---

[1]. तदो अ देव! तं समलसम्पादं समवधूणिअ णिसिदसराभिघादजा दमण्णुणा किरीटिणा गहिदा रहुच्छंगादो कणन्तकणअकिंकिणीजालझंकार विराहइणी मेहोबरोह विमुक्कणहत्थलणिम्मला णिसिदसामलसिणिद्ध मुही विविहरअणप्पहाभासुर भीसणरणि ज्जदंसणा सत्ती विमुक्का कुमालाहिमुही।

दुर्योधनः– (सविषादम्) अहह! ततस्ततः?

सुन्दरकः– ततो देव! प्रज्वलन्तीं शक्तिं प्रेक्ष्य विगलितमंगराजस्य हस्तात्सशरं धनुर्हृदयाद्वीरसुलभ उत्साहो, नयनाद्बाष्पसलिलमपि। रसितं च सिंहनादं वृकोदरेण। 'दुष्करं दुष्करं' मित्याक्रन्दितं कुरुबलेन।[1]

दुर्योधनः– (सविषादम्) ततस्ततः।

सुन्दरकः– ततो देव! कुमारवृषसेनेनाकर्णपूरितैर्निशितक्षुर प्रबाणैः सुचिरं निघ्यायार्धपथ एव भागीरथीवाऽऽगच्छन्ती यथा भगवता विषमलोचनेन तथा त्रिधा कृता शक्तिः।[2]

दुर्योधनः– साधु वृषसेन! साधु, ततस्ततः।

सुन्दरकः– ततश्च देव! एतस्मिन्नन्तरे कृतकलकलमुखरेण वीरलोकसाधुवादेनाऽन्तरितः समरतूर्यनिर्घोषः। सिद्धचारणगणविमुक्त-कुसुमप्रकरेण प्रच्छादितं समरांगणम्।[3]

दुर्योधनः– अहो! बालस्य पराक्रमः। ततस्ततः?

सुन्दरकः– ततश्च देव! भणितं च स्वामिनाऽंगराजेन– 'भो वीर वृकोदर! असमाप्तस्तव ममापि समरव्यापारः। तदनुमन्यस्व मां मुहूर्तम्। प्रेक्षावहे तावत्क्षणमात्रं मम वत्सस्य तव भ्रातुश्च धनुर्वेदशिक्षाचतुरत्वम्। तवाप्येतत्प्रेक्षणीयम्' इति।[4]

---

[1]. तदो देव! पज्जलन्तीं सत्तिं पेक्खिअ विअलिअं अंगराअस्स हत्थादो ससरं धणु हिअआदो बीरसुलहो उच्छाहो, णअणादो बाप्पसलिलं पि। रसिदं अ सिंहणादं विओदलेण। 'दुक्कलं दुक्कलं' त्ति आकन्दिदं कुरुबलेण।

[2]. तदो देव! कुमालविससेणेण आकण्णपूरिदेहिं णिसिदक्खुर प्पबाणेहिं सुचिरं णिज्झइअ अद्धपहे एव्व भाईरहि विअ आअच्छन्ती जधा भअवदा विसमलोअणेण तधा तिधा किदा सत्ती।

[3]. तदो अ देव! एदस्सिं अन्तले किदकलकलमुहरेण बीरलो असाहुबादेण अन्त-रिदो समरतूरणिग्घोसो। सिद्धचालणगणबिमुक्क कुसुमप्पअरेण पच्छादिदं समलं-गणम्।

[4]. तदो अ देव! भणिअं सामिणा अंगराएण– 'भो वीर विकोदल! असमत्तो तुह मह वि समलव्वावारो । ता अणुमण्णा मं मुहुत्तअम्। पेक्खामहे दाव खणामत्तं मह वस्सस्स तुह भादुणो अ धणुव्वेदविद्दाचउरत्तणम्। तुह वि एदं पेक्खणिज्जं त्ति।

दुर्योधन– (विषादपूर्वक) अत्यन्त दुःख है, उसके बाद क्या हुआ?

सुन्दरक– तत्पश्चात् देव! चमचमाती हुई उस शक्ति को देख कर, अंगराज के हाथों से बाणों समेत धनुष और हृदय से वीर सुलभ उत्साह एवं नेत्रों से अश्रुजल सभी एक साथ गिर पड़े तथा वृकोदर सिंह के समान गरजने लगा और कौरव सेना 'बुरा हुआ', 'बुरा हुआ' चिल्लाने लगी।

दुर्योधन–(दुःख के साथ) उसके बाद, उसके बाद क्या हुआ?

सुन्दरक– उसके बाद, महाराज! कुमार वृषसेन ने थोड़ी देर तक ध्यान करके, अपने कान तक प्रत्यंचा को खींचकर, तीक्ष्ण अग्रभाग से युक्त फल वाले बाणों से बीच में ही उस शक्ति के तीन टुकड़े, उसी प्रकार कर दिए, जैसे– तीन नेत्रों वाले भगवान् शिव ने बीच में ही भागीरथी गंगा को तीन भागों में विभाजित कर दिया था।

दुर्योधन– साधु, वृषसेन, साधु। तत्पश्चात् क्या हुआ?

सुन्दरक– उसके बाद, हे राजन्! इसी बीच वीरसमूह द्वारा प्रदान किए गए, साधुवाद के कोलाहल से युद्ध की वाद्यध्वनि छिप गयी। सिद्ध एवं चारणों के समूह द्वारा बरसाए गए पुष्पों के ढेर से समरांगण पूर्णरूप से ढ़क गया।

दुर्योधन– आश्चर्य है, बालक का पराक्रम। फिर क्या हुआ?

सुन्दरक– और उसके बाद, हे देव! स्वामी अंगराज ने कहा कि– हे वीर! वृकोदर! तुम्हारा और हमारा युद्ध तो अभी समाप्त नहीं हुआ है। इसलिए तुम क्षणभर के लिए युद्ध को रोकने की मुझे अनुमति प्रदान करो, क्योंकि थोड़ी देर तक अपने पुत्र वृषसेन तथा तुम्हारे भाई अर्जुन के धनुर्विद्या विषयक कौशल को हम दोनों ही देख लेवें और तुम्हें भी इसे देखना चाहिए।

शब्दार्थ– अहह–दुःखसूचक अव्यय, ततः–उसके बाद, प्रेक्ष्य–देखकर, आक्रन्दितम्–चिल्लाना, रुदन, विषमलोचनेन–त्रिनेत्र भगवान् शिव, कृता–कर दी, अनन्तरे–बीच में, अन्तरितः–छिप गयी, निर्घोषः–ध्वनि।

दुर्योधनः— ततस्ततः?

सुन्दरकः— ततो देव! विश्रमितायोधनव्यापारौ मुहूर्तविश्रमितनिज वैरानुबन्धौ द्वावपि प्रेक्षकौ जातौ भीमसेनाऽंगराजौ।[1]

दुर्योधनः— (साभिप्रायम्) ततस्ततः?

सुन्दरकः— ततश्च देव! एतस्मिन्नन्तरे शक्तिखण्डनामर्षितेन गाण्डीविना एवं भणितम्— 'अरे रे दुर्योधनप्रमुखाः!'[2]

(इत्यर्धोक्तौ लज्जां नाटयति।)

दुर्योधनः— सुन्दरक! कथ्यताम्। परवचनमेतत्।

सुन्दरकः— शृणोतु देवः! 'अरे दुर्योधनप्रमुखाः कुरुबलसेनाप्रभवः! अविनयनौकर्णधारकर्ण! युष्माभिर्मम परोक्षं बहुभिर्महारथैः परिवृत्यैकाकी मम पुत्रकोऽभिमन्युर्व्यापादितः। अहं पुनर्युष्माकं प्रेक्षमाणानामेवैतं कुमार वृषसेनं स्मर्तव्यशेषं करोमि'। इति भणित्वा सगर्वमास्फालितमनेन वज्र-निर्घातघोषभीषणजीवारवं गाण्डीवम्। स्वामिनाऽपि सज्जीकृतं काल-पृष्ठम्।[3]

दुर्योधनः— (सावहित्थम्) ततस्ततः?

सुन्दरकः—ततश्च देव! प्रतिषिद्धभीमसेनसमरकर्मारम्भेण गाण्डीविना विरचिते अंगराजवृषसेनरथकूलंकषे द्वे बाणनद्यौ। ताभ्यामपि

---

[1]. तदो देव! विस्समिदाओधनव्वावारा मुहुत्तविस्समिदणिअवेराणुबन्धा दुवे वि पेक्खआ जादा भीमसेणांगराआ।

[2]. तदो अ देव! एदस्सिं अन्तरे सत्तिखण्डणामरिसिदेण गण्डीविणा एवं भणिअम्- 'अरे रे दुज्जोहणप्पमुहा–।

[3]. सुणादु देवो। 'अरे दुज्जोहणप्पमुहा कुरुवलसेणापहुवो! अविणअणोकण्णाधार कण्ण! तुह्मेहिं मह परोक्खं बहुहिं महारहेहिं पडिवारिअ एआई मह पुत्तओ अहिमण्णु व्वावादिदो अहं उण तुह्माणं पेक्खन्ताणं एव्व एदं कुमालविससेणं सुमरिदव्वसेसं करोमि' त्ति भणिअ सगव्वं आप्फालिदं णेण वज्जणिग्घादघोसभीसणजीआरवं गण्डीवम्। सामिणा वि सज्जीकिदं कालपुट्ठम्।

दुर्योधन– उसके बाद, उसके बाद।

सुन्दरक– हे देव! उसके बाद, क्षणभर के लिए वैर भाव को भुला कर युद्ध कार्य बन्द करके, भीमसेन एवं अंगराज दोनों ही तमाशबीन बन गए।

दुर्योधन– (उत्सुकतापूर्वक) उसके बाद क्या हुआ?

सुन्दरक– राजन्! उसके पश्चात् शक्ति के टुकड़े हो जाने के कारण क्रुद्ध अर्जुन ने इसप्रकार कहा कि–'हे दुर्योधन आदि प्रमुखों!..

(इसी अपूर्ण बात में लज्जा का अभिनय करके)

दुर्योधन– सुन्दरक! कहो, कहो, यह तो दूसरे का कथन है।

सुन्दरक– राजन्! सुनिए। 'अरे दुर्योधन प्रमुख कौरव सेनाध्यक्षों! अविनयरूपी नाव के कर्णधार कर्ण! आप सभी अनेक महारथियों ने मेरे पीछे अकेले घेरकर मेरे पुत्र अभिमन्यु को मार डाला था, किन्तु मैं आप सभी लोगों के देखते–देखते हुए, कुमार वृषसेन को स्मृतिमात्र शेष कर रहा हूँ।' ऐसा कहकर अभिमानपूर्वक उन्होंने वज्रपात शब्द के समान, भयंकर शब्द करने वाले, गाण्डीव धनुष से 'टंकार' शब्द किया तथा स्वामी अंगराज ने भी अपना **कालपृष्ठ नामक धनुष** तैयार कर लिया।

दुर्योधन–(घबराहट के साथ) उसके बाद, उसके बाद।

सुन्दरक– और उसके पश्चात् हे देव! भीमसेन के युद्ध कर्म को रोक देने वाले, अर्जुन ने अंगराज कर्ण तथा वृषसेन के रथरूपी तटों पर प्रवाहित होने वाली दो बाणरूपी नदियों को प्रवाहित कर दिया तथा उन दोनों कर्ण एवं वृषसेन ने भी परस्पर स्नेह के कारण, अपने धनुर्विद्या कौशल के साथ, मध्यम पाण्डव व दुष्ट अर्जुन पर आक्रमण कर दिया।

शब्दार्थ– विश्रमितयोधनव्यापार–युद्ध व्यापार को विश्राम देकर, मुहूर्तम्–क्षणभर के लिए, एतस्मिन्–इसी, अन्तरे–बीच में, परवचनम्–दूसरे के वचन, एतत्–यह, कथ्यताम्–कहो, नाटयति–अभिनय करता है, एकाकीम्–अकेले को, व्यापादितः –मार दिया था, भणित्वा–कहकर, **कालपृष्ठम्–अर्जुन के धनुष का नाम।**

द्वाभ्यामन्योन्यस्नेहदर्शितशिक्षाविशेषाभ्यामभियुक्तः स दुराचारो मध्यम-पाण्डवः।[1]

दुर्योधनः– ततस्ततः ?

सुन्दरकः– ततश्च देव! गाण्डीविना तारस्सितज्यानिर्घोषमात्र-विज्ञातबाणवर्षेण तथाऽऽचरितं पत्रिभिर्यथा न नभस्तलं, न स्वामी, न रथो, न धरणी, न कुमारी, न केतुवंशो, न बलानि, न सारथिर्न तुरंगमा, न दिशो, न वीरलोकश्च लक्ष्यते।[2]

दुर्योधनः– (सविस्मयम्) ततस्ततः?

सुन्दरकः– ततश्च देव! क्षणमात्रमेवातिक्रान्ते शरवर्षे सहर्षसिंहनादे पाण्डवबले, सविषादविमुक्ताक्रन्दे कौरवबले, समुत्थितो महान्कलकलो 'हा हतः कुमारवृषसेनो हा हत' इति।[3]

दुर्योधनः– (सबाष्परोधम्) ततस्ततः?

सुन्दरकः– ततश्च देव! महत्या वेलया प्रेक्ष्य हतसारथितुरंगं लूनातपत्रचापचामरकेतुवंशं स्वर्गप्रभ्रष्टमिव सुरकुमारमेकेनैव हृदय-मर्मभेदिना शिलीमुखेन भिन्नदेहं रथमध्ये पर्यस्तं कुमारं प्रेक्षे।[4]

---

[1]. तदो अ देव! पडिंसिद्धभीमसेणसमलकम्मालम्भेण गण्डीविणा विरइदा अंगरा अविससेणरहकूलंकसाओ दुवे बाणणदीओ। तेहिं वि दुवेहिं अण्णोण्णदत्ति दसिक्खाविसेसेहिं अभिजुत्तो सो दुराआरो मज्झमपण्डवो।

[2]. तदो अ देव! गण्डीविणा तारस्सिदजीआणिग्घो समेत्तविण्णादबाण वरिसेण तह आअरिदं पत्तिहिं जह ण णहत्तलं, ण सामी, ण रहो, ण धरणी, ण कुमालो, ण केदु वंसो, ण बलाइं, ण सारही, ण तुलंगमा, ण दिसाओ, ण वीरलोओ, अ लक्खी अदि।

[3]. तदो अ देव! क्खणमेत्तं एव्व अदिक्कन्ते सरवरिसे सहरिस सिंहणादे पण्डवबले सविसादमुक्काकन्दे कौरवबले समुत्थिदो महन्तो कलअलो हा हदो कुमालविससेणो हा हदो' त्ति।

[4]. तदो अ देव! महन्तीए बेलाए पेक्खिअ हदसारहितुलंगं लूणाद वत्तचाव चामरकेदुवंसं सग्गप्पब्भट्टं विअ सुलकुमालं एक्केण ज्जेव हिअअमम्मभेदिणा सिली मुहेण भिण्णदेहं रहमज्झे पल्लत्थं कुमालं प्पेक्खे।

दुर्योधन– उसके बाद, उसके बाद।

सुन्दरक– और उसके बाद हे राजन्! भयंकर शब्द करने वाली, प्रत्यंचा के निर्घोषमात्र से बाण–वृष्टि करने वाले, गाण्डीवधारी अर्जुन ने ऐसा घमासान युद्ध किया कि बाणों से ढ़क जाने के कारण, न आकाश, न अंगराज, न रथ, न पृथ्वी, न कुमार, न ध्वजदण्ड, न सेनाएँ, न सारथी, न घोड़े, न दिशाएँ एवं न वीरों का समूह, यह सब दिखायी ही नहीं दे रहा था।

दुर्योधन– (विस्मयपूर्वक) उसके बाद क्या हुआ?

सुन्दरक– उसके पश्चात् हे महाराज! क्षणमात्र में ही बाणों की वर्षा समाप्त होने पर, पाण्डवों की सेना में हर्षपूर्वक सिंहनाद एवं कौरवों की सेना में विषादपूर्वक महान् हाहाकार 'हाय! मारा गया, हाय, कुमार वृषसेन मारा गया' उठ खड़ा हुआ।

दुर्योधन–(नेत्रों के अश्रुओं को रोकते हुए) उसके बाद क्या हुआ?

सुन्दरक– उसके पश्चात् हे महाराज! मैंने सारथी एवं घोड़ों से रहित, छत्र, धनुष, चामर, ध्वजदण्ड विहीन, स्वर्ग से गिरे हुए देवताओं के पुत्र के समान, एक ही हृदय मर्मभेदी बाण द्वारा छिन्न शरीर युक्त, कुमार वृषसेन को रथ में पड़े हुए देखा।

शब्दार्थ– लक्ष्यते–दिखायी दे रहा था, सविस्मयम्–आश्चर्यपूर्वक, समुत्थितः –उठा, प्रेक्ष्य–देखकर, हतः–मारा गया, स्वर्गप्रभ्रष्टम्–स्वर्ग से गिरे हुए, इव–समान।

(महाकवि ने सुन्दरक द्वारा किए गए युद्ध–वर्णन में कर्ण के पुत्र वृषसेन द्वारा किए गए शौर्यपूर्ण युद्ध का उल्लेख विस्तारपूर्वक किया है, जिसमें वृषसेन का चरित्र उभरकर आया है, साथ ही, इसका नियोजन विशेषरूप से इसलिए भी किया गया है, क्योंकि महाकवि अभिमन्यु के वध का बदला भी अर्जुन के माध्यम से वे दिलाना चाहते थे, क्योंकि अनेक कौरव महारथियों ने मिलकर अकेले अभिमन्यु का वध इससे पूर्व में कर दिया था।)

राजा– सुन्दरक! अलमिदानीं कथितेन। (सास्रम्) हा वत्स वृषसेन! क्वासि? देहि मे प्रतिवचनम्। (इति मोहमुपागतः)

सूतः– समाश्वसिहि समाश्वसिहि।

राजा– (उत्थाय सकरुणम्) हा वत्स वृषसेन! हा मदंकदुर्ललित! हा मदाज्ञाकारक! हा गदायुद्धप्रिय! हा शौर्यसागर! हा राधेयकुलप्ररोह! हा प्रियदर्शन! हा दुःशासननिर्विशेष! हा सर्वगुरुवत्सल! प्रयच्छ मे प्रतिवचनम्।

पर्याप्तनेत्रमचिरोदितचन्द्रकान्त–
मुद्भिद्यमाननवयौवनरम्यशोभम्।
प्राणापहारपरिवर्तितदृष्टि दृष्टं
कर्णेन तत्कथमिवाऽऽननपंकजं ते!।।10।।

(अन्वय– कर्णेन ते पर्याप्त–नेत्रम् अचिर–उदित–चन्द्र–कान्तम् उद्भिद्यमान–नव–यौवन–रम्य–शोभम् तत् (ते) आनन–पंकजम् प्राण–अपहार–परिवर्तित–दृष्टिः (तत्) कथम् इव दृष्टम्।।10।।)

सूत– आयुष्मन्! अलमत्यन्तदुःखावेगेन।

दुर्योधनः– सूत! पुण्यवन्तो हि दुःख भाजो भवन्ति। अस्माकं पुनः–

प्रत्यक्षं हतबन्धूनामेतत्परिभवाग्निना।
हृदयं दह्यतेऽत्यर्थं कुतो दुःखं कुतो व्यथा?।।11।।

(अन्वय– प्रत्यक्षम् हत–बन्धूनाम् परिभव–अग्निना एतत् हृदयम् अति अर्थम् दह्यते, कुतः दुःखम्? कुतः व्यथा?।।11।।)

(इति मोहमुपागतः)

सूतः– समाश्वसितु, समाश्वसितु, महाराजः!

(इति पटान्तेन बीजयति)

दुर्योधनः– (लब्धसंज्ञः) भद्र सुन्दरक! ततो वयस्येन किं प्रतिपन्न–मंगराजेन?

दुर्योधन– सुन्दरक! अब कहने से बस करो। **(अश्रुपूर्वक)** हाय! वत्स, वृषसेन। तुम कहाँ हो? मुझे प्रत्युत्तर प्रदान करो।

(यह कहकर मूर्च्छित हो जाता है)

सूत– महाराज! धैर्य धारण कीजिए, धैर्य धारण कीजिए।

दुर्योधन– (उठकर करुणापूर्वक) हाय, वत्स, वृषसेन! हाय मेरी गोद में कठिनता से पले हुए, हाय! मेरी आज्ञा का पालन करने वाले, हाय गदायुद्ध प्रिय! हाय! पराक्रम के सागर! हाय! राधेय कुल के अंकुर! हाय! प्रियदर्शन! हाय! दुःशासन से भी अधिक प्रिय! हाय! सभी गुरुजनों के प्रिय! मुझे प्रत्युत्तर दो।

बड़ी–बड़ी आँखों वाले, शीघ्र उदित चन्द्रमा के समान सुन्दर, प्रस्फुटित हो रहे नवीन यौवन से रमणीय शोभा वाले तथा मृत्यु के बाद सर्वथा विपरीत दिखायी देने वाले, तुम्हारे मुख को कर्ण ने भला कैसे देखा होगा?।। 10।।

सूत– आयुष्मन्! अत्यधिक दुःख से बस कीजिए।

दुर्योधन– हे सूत! पुण्यवान् लोग ही दुःखों के भागी होते हैं। फिर हमारे तो,

नेत्रों के सामने ही मारे गए भाई–बन्धुओं वाले, पराभवरूपी अग्नि से हमारा यह हृदय अत्यधिक जल रहा है, ऐसे में दुःख और पीड़ा की तो बात ही क्या है?।।11।।

(यह कहकर मूर्च्छित हो जाता है)

सूत– महाराज! धैर्य धारण कीजिए, धैर्य धारण कीजिए।

दुर्योधन– (होश में आकर) भाई सुन्दरक! उसके बाद मित्र अंगराज कर्ण ने क्या निश्चय किया है?

शब्दार्थ– सास्रम्–अश्रुपूर्वक, देहि–दो, मे–मुझे, प्रतिवचनम्–प्रत्युत्तर, मोहम्–मूर्च्छा को, उपागतः–प्राप्त हो गया, प्रयच्छ–दो, मे, आननपंकजम्– मुखरूपी कमल को, प्राणापहारपरिवर्तितदृष्टिः–प्राणों के निकलने से उलटी हुई दृष्टि वाले।

सुन्दरकः–ततश्च देव! तथाविधस्य पुत्रस्य दर्शनेन संकलितमश्रुजातमुज्झित्वाऽनपेक्षितपरप्रहरणाभियोगेन स्वामिनाऽभियुक्तो धनंजयः। तं च सुतवधाऽमर्षोद्दीपितपराक्रमं विमुक्तजीविताशं तथा परिक्रामन्तं प्रेक्ष्य नकुलसहदेवपांचालप्रमुखैरन्तरितो धनंजयस्य रथवरः।[1]

दुर्योधनः– ततस्ततः?

सुन्दरकः– ततो देव! अर्जुनचापमहाप्रलयपयोधरनिःसृतशरधारा–सहस्रपूरितेषु दिङ्मुखेषु शल्येन भणितः स्वाम्यंगराजो यथा– 'अंगराज! हततुरंगमो मथितचक्रनेमिकूबरस्ते रथः, तन्न युक्तं भीमार्जुनाभ्यामभि–योक्तुम्'। इति भणित्वा परिवर्तितो रथोऽवतारितः स्वामी स्यन्दनाद् बहु–प्रकारं च समाश्वासितः।[2]

दुर्योधनः– ततस्ततः?

सुन्दरकः– ततश्च स्वामिना सुचिरं विलप्य परिजनोपनीतमन्यं रथं प्रेक्ष्य दीर्घनिःश्वस्य मयि दृष्टिर्विनिक्षिप्ता– 'सुन्दरक! एहीति' भणितं च। ततोऽहमुपगतः स्वामिसमीपम्। ततोऽपनीय शीर्षस्थानात्पट्टिकां शरीरसंगलितैः शोणितबिन्दुभिर्दिग्धवदनं बाणं कृत्वाऽभिलिख्य प्रेषितो देवस्य संदेशः।[3]

---

[1]. तदो अ देव! तधाविधस्स पुत्तस्स दंसणेण संगलिदं अस्सुजादं उज्झिअ अणवेक्खिदपरप्पहरणाभिओएण सामिणा अभिजुत्तो धणंजओ। तं अ सुदवहामरि–सुददीविदपरक्कमं विमुक्कजीविदासं तह परिक्कमन्तं पेक्खिअ णउलसहदेवपंचाल–प्पमुहेहिं अन्तरिदो धणंजअस्स रहवरो।

[2]. तदो देव! अज्जुण चावमहाप्पलअपओहरणिस्स रिदसरधारा सहस्सेहिं पूरिदेसु दिसामुहेसु सल्लेण भणिदो सामी अंगराओ, जहा अंगिराअ! हदतुलंगमो मथिद चक्कणेमिकूवरो दे रहो, ता ण जुत्तं भीमाज्जुणोहिं अहिजोदिअम्'। त्ति भणिअ पडिवट्टिदो रहो, ओदारिदो सामी सन्दणादो, बहुप्पआरं अ समस्सासिदो।

[3]. तदो अ सामिणा सुइरं विलपिअ परिअणोवणीदं अण्णं रहं पेक्खिअ दीहं निस्ससिअ मइ दिट्ठी विणिक्खिविदा। 'सुन्दरअ! एहि त्ति भणिदं अ। तदो अहं उवगदो सामिसमीवम्। तदो अवणीअ सीसट्ठाणादो 'पट्टिअं सरीर संगलिदेहिं सोणिअविंदुहिं दिद्धवअणं बाणं कदुअ अहिलिहिअ प्पेसिदो देवस्स सन्देसो।

सुन्दरक– उसके पश्चात् हे देव! उसप्रकार अपने सामने ही पुत्र को मारा हुआ देखकर, प्रवाहित हो रहे अश्रुओं को पोंछकर, शत्रुओं के आयुधों की परवाह किए बिना ही, महाराज कर्ण ने अर्जुन पर आक्रमण कर दिया। पुत्रवध के क्रोध के कारण वृद्धि को प्राप्त हुए, पराक्रम वाले, जीवित रहने के प्रति निराश कर्ण को उसप्रकार आक्रमण करते हुए देखकर, नकुल, सहदेव एवं पांचाल आदि अनेक वीरों ने अर्जुन के रथ को चारों ओर से घेर लिया।

दुर्योधन– उसके बाद क्या हुआ?

सुन्दरक– तत्पश्चात् हे राजन्! अर्जुन के धनुषरूपी महाप्रलय काल के मेघ से निकली हुई हजारों बाणों की धाराओं से दिशाओं के प्रपूरित हो जाने पर, शल्य ने कर्ण से कहा कि– हे अंगराज! तुम्हारे रथ के घोड़े मारे जा चुके हैं तथा रथ की धुरी एवं कूबर आदि भी विनष्ट हो गए हैं। इसलिए भीम एवं अर्जुन के साथ युद्ध करना, अभी ठीक नहीं है।' यह कहकर रथ को लौटा दिया और स्वामी अंगराज को रथ से उतार कर, अनेक प्रकार से उन्हें धैर्य बँधाया।

दुर्योधन– उसके बाद क्या हुआ?

सुन्दरक– और उसके पश्चात् स्वामी ने बहुत देर तक विलाप करके, सेवक द्वारा लाए हुए दूसरे रथ को देखकर, लम्बी श्वास खींचकर, मेरी ओर दृष्टि डाली तथा 'सुन्दरक! इधर आओ,' इसप्रकार कहा। उसके बाद मैं स्वामी के पास गया, तब उन्होंने सिर के घाव की पट्टी को हटाकर, टपक रहे खून के बिन्दुकणों में बाण को भिगोकर, आपके लिए सन्देश लिखकर भेजा है।

शब्दार्थ–उज्झित्वा–छोड़कर, प्रेक्ष्य–देखकर, दिङ्–दिशा, भणितः–कहा गया, नेमि–पहिए की परिधि, अभियोक्तुम्–युद्ध करने के लिए, स्यन्दनात्–रथ से, विलप्य–विलाप करके, मयि–मेरे ऊपर, विनिक्षिप्ता–विशेषरूप से डाली, एहि–आओ, भणितम्–कहा, उपगतः–पास गया, अपनीय–दूर करके।

(इति पट्टिकामर्पयति। दुर्योधनो गृहीत्वा वाचयति)

यथा– 'स्वस्ति, महाराजदुर्योधनं समरांगणात्कर्ण एतद् वृत्तं कण्ठे गाढमालिंग्य विज्ञापयति–

'अस्त्रग्रामविधौ कृती न समरेष्वस्यास्ति तुल्यः पुमान्
भ्रातृभ्योऽपि ममाऽधिकोऽयममुना जेयाः पृथासूनवः'।
यत्संभावित इत्यहं न च हतो दुःशासनारिर्मया,
त्वं दुःखप्रतिकारमेहि भुजयोर्वीर्येण बाष्पेण वा।।12।।

(अन्वय– अयम् 'अस्त्र–ग्राम–विधौ कृती, समरेषु अस्य तुल्यः पुमान् न अस्ति, भ्रातृभ्यः अपि अयम् मम अधिकः, अमुना पृथा–सूनवः जेयाः, इति यत् अहम् (त्वया) संभावितः, दुःशासन–अरिः च मया न हतः, (तत्) त्वम् भुजयोः वीर्येण, बाष्पेण वा दुःख–प्रतिकारम् एहि।।12।।)

दुर्योधनः– वयस्य कर्ण! किमिदं भ्रातृशतवधदुःखितं मामपरेण वावशल्येन घट्टयसि? भद्र सुन्दरक! अथेदानीं किमारम्भोऽगराजः?

सुन्दरकः– देव! अद्याप्यारम्भः पृच्छ्यते! अपनीतरशरीरावरण आत्मवधकृतनिश्चयः पुनरपि पार्थेन सह समरं मार्गयते।[1]

दुर्योधनः– (आवेगादासनादुत्तिष्ठन्) सूत! रथमुपनय। सुन्दरक! त्वमपि मद्वचनात्त्वरिततरं गत्वा वयस्यमंगराजं प्रतिबोधय। अलमति साहसेन। अभिन्न एवाऽयमावयोः संकल्पो न खलु भवानेको जीवित–परित्यागाकांक्षी। किन्तु–

हत्वा पार्थान्सलिलमशिवं बन्धुवर्गाय दत्त्वा
मुक्त्वा बाष्पं सह कतिपयैर्मन्त्रिभिश्चारिभिश्च।
कृत्वाऽन्योन्यं सुचिरमपुनर्भावि गाढोपगूढं
संत्यक्ष्यावो हततनुमिमां दुःखितौ निवृतौ च।।13।।

---

[1]. देव! अज्ज वि आरम्भो पुच्छीअदि? अवणदसरीरावरणो अप्पवहकि दणिच्चओ पुणो वि पत्थेण सह समलं मग्गदि।

(यह कहकर चिट्ठी देता है और दुर्योधन उसे लेकर बाँचता है)

जैसे– 'कल्याण हो, युद्धभूमि से कर्ण, महाराज दुर्योधन का प्रगाढ़ आलिंगन करके, यह निवेदन करता है कि–

यह कर्ण अस्त्रों के प्रहार में अत्यधिक कुशल है, युद्ध में इसके समान दूसरा कोई व्यक्ति नहीं है, भाइयों से भी यह मुझे अधिक प्रिय है, इसी के द्वारा पाण्डुपुत्रों पर विजय प्राप्त की जा सकती है। आपने इसप्रकार मुझसे अनेक सम्भावनाएँ की थीं, किन्तु मैं दुःशासन के शत्रु का वध नहीं कर सका हूँ। इसलिए आप स्वयं अपनी भुजाओं के पराक्रम से अथवा आँसू बहाकर इस दुःख का प्रतिकार कीजिए।।12।।

दुर्योधन– मित्र कर्ण! यह सौ भाइयों के वध से दुःखी, मुझे अपने वाक्–शल्य द्वारा क्यों पीड़ित कर रहे हो? भाई सुन्दरक! अब अंगराज क्या कर रहे हैं?

सुन्दरक– राजन्! आज भी आरम्भ पूछ रहे हैं, शरीर के कवच उतारकर आत्मवध का निश्चय किए हुए, वे फिर से पार्थ के साथ युद्ध करने की प्रतीक्षा कर रहे हैं।

दुर्योधन–(आवेगपूर्वक आसन से उठता हुआ) हे सूत! रथ लाओ। सुन्दरक! तुम भी जाकर मेरे वचनों से मित्र अंगराज को ढाढ़स बँधाओ कि वे अधिक साहस न करें। केवल आपका ही नहीं, अपितु हम दोनों का एक जैसा ही विचार है, केवल अकेले आप ही जीवन त्याग करने के इच्छुक नहीं हैं, किन्तु–

पाण्डवों का संहार करके तथा बन्धुवर्ग को अशिव जल की अंजलि प्रदान करके और मारे जाने से बचे हुए कुछ मन्त्रियों एवं शत्रुओं के साथ, अश्रु बहाकर आपस में पुनर्जन्म न होने विषयक लम्बे समय तक प्रगाढ़ आलिंगन करके दुःखी और शत्रु–वध से सुखी होते हुए, इस निकृष्ट शरीर का परित्याग कर देंगे।।13।।

(अन्वय– पार्थान् हत्वा, बन्धु–वर्गाय अशिवम् सलिलम् दत्त्वा, कतिपयैः मन्त्रिभिः च अरिभिः सह बाष्पम् मुक्त्वा, अन्योन्यम् अपुनः–भावि सुचिरम् गाढ–उपगूढम् च कृत्वा, दुःखितौ निवृतौ च (सन्तौ), इमाम् हत–तनुम् सन्त्यक्ष्यावः । ।13 । ।)

अथवा शोकं प्रति मया न किंचित्संदेष्टव्यम्।

वृषसेनो न ते पुत्रो, न मे दुःशासनोऽनुजः।
त्वां बोधयामि किमहं त्वं मां संस्थापयिष्यसि? । ।14 । ।

(अन्वय– वृषसेनः ते पुत्रः न, दुःशासनः मे अनुजः न, अहम् त्वाम् किम् बोधयामि? त्वम् माम् संस्थापयिष्यसि? । ।14 । ।)

सुन्दरकः– यद्देव आज्ञापयति।[1] (इति निष्क्रान्तः)

दुर्योधनः– अये नेमिध्वनिरिव!

सूतः– (कर्णं दत्त्वा) आयुष्मन्! एष सद्य एव संवर्धितो नेमिध्वनिः श्रूयते।

दुर्योधनः– तथा तर्कयामि यत् नूनं परिजनोपनीतो रथः। गच्छ त्वं रथं सज्जीकुरु।

सूतः– यदाज्ञापयति देवः। (इति निष्क्रम्य पुनः प्रविशति)

दुर्योधनः– (विलोक्य) किमिति नारूढोऽसि?

सूतः– एष खलु तातोऽम्बा च संजयाधिष्ठितं रथमारुह्य देवस्य समीपमुपगतौ।

दुर्योधनः– किं नाम तातोऽम्बा च सम्प्राप्तौ?। कष्टम्! अतिबीभ–त्समाचरितं दैवेन। सूत! गच्छ त्वं, स्यन्दनं तूर्णमुपहर। अहमपि तातदर्शनं परिहरन्नेकान्ते तिष्ठामि।

सूतः– देव! त्वमेकशेषबान्धवावेतौ कथमिव न समाश्वासयसि?

दुर्योधनः– सूत! कथमिव समाश्वासयामि विमुखभागधेयः? पश्य–

---

[1]. जं देवो आणवेदि।

अथवा शोक प्रकट करने के प्रति मुझे कोई सन्देश नहीं भेजना है।

वस्तुतः वृषसेन तुम्हारा ही पुत्र नहीं था और न ही दुःशासन मेरा अनुज था, इस सम्बन्ध में तुम्हें भला मैं क्या समझाऊँ? एवं तुम मुझे क्या धैर्य बँधा सकते हो?।।14।।

सुन्दरक– महाराज की जैसी आज्ञा।

(यह कहकर निकल जाता है)

दुर्योधन– शीघ्र ही रथ को उपस्थित करो।

सूत– (कान लगाकर) आयुष्मन्! घोड़ों की हिनहिनाहट से युक्त, रथ के पहियों की ध्वनि सुनायी दे रही है।

दुर्योधन– इससे सोचता हूँ कि निश्चय ही, किसी सेवक द्वारा रथ लाया गया है। जाओ, तुम रथ को तैयार करो।

सूत– महाराज की जैसी आज्ञा।

(ऐसा कहकर निकलकर फिर से प्रवेश करता है)

दुर्योधन– (देखकर) रथ पर आरूढ़ क्यों नहीं हुए?

सूत– निश्चय ही, ये माता जी एवं पिताजी, संजय से अधिष्ठित रथ पर आरूढ़ होकर महाराज के समीप आए हैं।

दुर्योधन– क्या माताजी तथा पिताजी आए हैं। कष्ट है, विधाता ने अत्यधिक भयंकर कर्म किया है। हे सूत! जाओ, तुम शीघ्र ही रथ यहाँ लेकर आओ। मैं भी पिता जी के दर्शन से स्वयं को बचाता हुआ, एकान्त में बैठता हूँ।

सूत– राजन्! परिवार भर में आप ही अकेले, इनके शेष रह गए हैं। इसलिए आप इन्हें धैर्य क्यों नहीं बँधाते हैं?

दुर्योधन– हे सूत! विरुद्ध भाग्य वाला मैं, भला कैसे माता–पिता को धैर्य बँधाऊँ? देखो,

अद्यैवाऽऽवां रणमुपगतौ तातमम्बां च दृष्ट्वा,
घ्रातस्ताभ्यां शिरसि विनतोऽहं च दुःशासनश्च।
तस्मिन्बाले प्रसभमरिणा प्रापिते तामवस्थां
पार्श्वं पित्रोरपगतघृणः किंनु वक्ष्यामि गत्वा?।।15।।

(अन्वय– अद्य एव रणम् उपगतौ, आवाम् तातम्, अम्बाम् च दृष्ट्वा, विनतः अहम् दुःशासनः च ताभ्याम् शिरसि घ्रातः, तस्मिन् बाले अरिणा प्रसभम् ताम् अवस्थाम् प्रापिते, अपगत–घृणः पित्रोः पार्श्वम् गत्वा किम् नु वक्ष्यामि?।।15।।)

सूतः– तथाऽप्यवश्यं वन्दनीयौ गुरू।

(इति निष्क्रान्तौ)

॥ इति चतुर्थोऽङ्कः ॥

आज ही हम दोनों ने, माता–पिता के दर्शन करके युद्ध के लिए प्रस्थान किया था, इन दोनों ने ही विनम्र मेरा और दुःशासन का सिर सूँघकर हमारे लिए मंगल कामना की थी। उस बालक दुःशासन को शत्रु द्वारा इसप्रकार बलपूर्वक इस दशा को पहुँचा दिए जाने पर, निर्लज्ज मैं माता–पिता के पास जाकर क्या कहूँगा?।।15।।

सूत– तो भी माता–पिता की वन्दना अवश्य करनी चाहिए।

(यह कहकर दोनों निकल जाते हैं)

॥ इसप्रकार महाकवि भट्टनारायण विरचित वेणीसंहार के चतुर्थ अङ्क का डॉ. राकेश शास्त्री, बाँसवाड़ा द्वारा किया हुआ हिन्दी अनुवाद पूर्ण हुआ॥

•••

।। श्रीः ।।

अथ पंचमोऽङ्कः

(ततः प्रविशति रथयानेन गान्धारी संजयो धृतराष्ट्रश्च)

धृतराष्ट्रः– वत्स संजय! कथय, कथय, कस्मिन्नुद्देशे कुरुकुल-काननैकशेषप्रवालो वत्सो मे दुर्योधनस्तिष्ठति? कच्चिज्जीवति वा न वा?

गान्धारी– जात! यदि सत्यं जीवति मे वत्सस्तत्कथय कस्मिन्देशे वर्तते?[1]

संजयः– नन्वेष महाराज एकाक्येव न्यग्रोधच्छायायामुप-विष्टस्तिष्ठति।

गान्धारी– (सकरुणम्) जात! एकाकीति भणसि। किं न खलु साम्प्रतं भ्रातृशतमस्य पार्श्वे नास्ति।[2]

संजयः– तात! अम्ब! अवतरतां स्वैरं रथात्।

(उभाववतरणं नाटयतः)

(ततः प्रविशति सव्रीडमुपविष्टो दुर्योधनः)

संजय– (उपसृत्य) विजयतां महाराजः! नन्वेष तातोऽम्बया सह प्राप्तः, किं न पश्यति महाराजः?

(दुर्योधना वैलक्ष्यं नाटयति)

धृतराष्ट्रः–

शल्यानि व्यपनीय कंकवदनैरुन्मोचिते कंकटे
बद्धेषु व्रणपट्टकेषु शनकैः कर्णे कृतापाश्रयः।
दूरान्निर्जितशात्रवान्नरपतीनालोकयँल्लीलया

---

1 . जाद! जइ सच्चं जीवदि मे वच्छो ता कधेहि कस्सिं देसे बट्टदि?
2 . जाद! एआइ त्ति भणासि । किं णु क्खु सम्पदं भादुसदं से पास्से णत्थि ।

।। श्रीः।।

अथ पंचम अङ्क

(उसके बाद रथयान से गान्धारी, संजय एवं धृतराष्ट्र प्रवेश करते हैं)

धृतराष्ट्र– वत्स! संजय, कहो, कहो, कौरववंशरूपी वन के एक मात्र बचे हुए अंकुर के समान मेरा पुत्र, दुर्योधन कहाँ बैठा हुआ है? वह जीवित भी है या नहीं?

गान्धारी– पुत्र! यदि मेरा पुत्र सचमुच जीवित है, तो कहो वह किस प्रदेश में स्थित है?

संजय– महाराज! निश्चय ही, यह वटवृक्ष की छाया में बैठा हुआ है।

गान्धारी– (करुणापूर्वक) अकेले ही, ऐसा कह रहे हो, क्या इस समय इसके पास इसके सौ भाई नहीं हैं?

संजय– तात! अम्ब! रथ से धीरे उतरिए।

(दोनों रथ से उतरने का अभिनय करते हैं)

(उसके बाद लज्जापूर्वक बैठा हुआ दुर्योधन प्रवेश करता है)

संजय– (पास जाकर) महाराज की जय हो। निश्चय ही, ये माता के साथ पिताजी आए हैं, क्या महाराज इन्हें देख नहीं रहे हैं?

(दुर्योधन लज्जा का अभिनय करता है)

धृतराष्ट्र– **बाण निकालने वाले कंकमुख यन्त्रों द्वारा, बाणरूपी फलक निकालकर, कवच को उतारकर, औषधि से सने घावों पर पट्टियों को बाँधे हुए, कर्ण का धीरे से आश्रय लिए हुए, शत्रुओं के समूह को पराजित करने वाले, राजाओं को दूर से ही लीलापूर्वक देख रहे, 'हे पुत्र! क्या पीड़ा सहन करने योग्य है?' यह भी मुझ पापी द्वारा आपसे नहीं पूछा गया है।।1।।**

'सह्या पुत्रक!वेदने'ति न मया पापेन पृष्टो भवान्।।1।।

(अन्वय– कंक–वदनैः शल्यानि व्यपनीय, कंकटे उन्मोचिते व्रण–पट्टकेषु बद्धेषु, शनकैः कर्णे कृत–अपाश्रयः, निर्जित–शात्रवान् नरपतीन् दूरात् लीलया आलोकयन् ' पुत्रक! वेदना सह्या?' इति पापेन भवान् मया न पृष्टः।।1।।)

(धृतराष्ट्रो गान्धारी च स्पर्शेनोपेत्याऽऽलिंगतः)

गान्धारी– वत्स! अतिगाढ़प्रहारवेदनापर्याकुलस्याऽस्मासु सन्निहितेष्वपि न प्रसरति ते वाणी।[1]

धृतराष्ट्र– वत्स दुर्योधन! किमकृतपूर्वः सम्प्रति मय्यप्ययं व्यवहारः?

गान्धारी– (सकरुणम्) वत्स! यदि त्वमप्यस्मान्नालपसि तत्किमिदानीं वत्सो दुःशासनो दुर्मर्षणोऽन्यो वा आलपिष्यति?[2]

(इति रोदति)

दुर्योधनः– अम्ब!

पापोऽहमप्रतिकृतानुजनाशदर्शी
तातस्य बाष्पपयसां तव चाम्ब! हेतुः।
दुर्जातमत्र विमले भरतान्वये वः
किं मां सुतक्षयकरं सुत इत्यवैषि?।।2।।

(अन्वय– अम्ब! अप्रतिकृत–अनुज–नाश–दर्शी अहम् पापः तातस्य तव च बाष्प–पयसाम् हेतुः, विमले अत्र भरत–अन्वये दुर्जातम् वः सुत–क्षय–करम् माम् सुतः इति, किम् अवैषि?।।2।।)

गान्धारी–जात! अलमलं परिदेवितेन। त्वमपि तावदेकोऽस्यान्धयुगलस्य मार्गोपदेशकः। तच्चिरंजीव। किं मे राज्येन जयेन वा।[3]

---

1. वच्छ! अदिगाढप्पहारवेअणापज्जाउलस्स अम्हेसु सण्णिहिदेसु वि ण प्पसरदि दे वाणी।

2. वच्छ! जइ तुमं वि अम्हे णालबसि ता किं दाणी सम्पदं वच्छो दुस्सासणो दुम्मरिसणो अण्णो वा आलविस्सदि?

3. जाद! अलमलं परिदेविदेण, तुमं वि दाव एक्को इमस्स अन्धजुअलस्स मग्गोवदेसओ। ता चिरं जीव। किं मे रज्जेण जएण वा ?

(धृतराष्ट्र और गान्धारी हाथों से टटोलकर दुर्योधन को पाकर आलिंगन करते हैं)

गान्धारी– पुत्र! अत्यधिक प्रबल प्रहार की पीड़ा से व्याकुल, तुम्हारी वाणी हम लोगों के पास होने पर भी कुछ कह नहीं पा रही है।

धृतराष्ट्र– पुत्र दुर्योधन! इस समय तुम मेरे साथ भी यह ऐसा व्यवहार कर रहे हो, जो पूर्व में कभी नहीं किया गया है।

गान्धारी– (करुणापूर्वक) पुत्र! यदि तुम भी हमसे बात नहीं करते हो, तो क्या दुःशासन अथवा दुर्मर्षण या फिर दूसरे बेटे बात करेंगे?

(यह कहकर रोने लगती है)

दुर्योधन– हे माता! प्रतिकार लिए बिना भाइयों का विनाश देखने वाला पापी मैं, पिताजी और आपके अश्रुजल का कारण हूँ। इस उज्ज्वल भरतकुल में दुःखों से उत्पन्न, तुम्हारे पुत्रों का विनाश करने वाले, मुझ दुर्योधन को तुम अपना पुत्र भला क्यों मान रही हो?।।2।।

गान्धारी– पुत्र! विषाद से बस करो, बस करो। तुम ही तो अकेले इस अन्धी जोड़ी के मार्गदर्शक हो, तो चिरंजीव बनो। मुझे राज्य या विजय से क्या?

कवि के अनुसार महाभारतकाल में युद्ध में लगे हुए, शरीर के बाणों को सायंकाल के समय युद्ध के रुक जाने पर, विशेष यन्त्र द्वारा शरीर से बाहर निकाला जाता था, जिसे यहाँ कंकमुख यन्त्र की संज्ञा दी गयी है, ऐसा प्रतीत होता है कि इस यन्त्र द्वारा शरीर से बाण निकालने पर सम्भवतः पीड़ा कम होती होगी, प्रथम श्लोक में कवि ने उसी ओर संकेत किया है। कंक विशेष प्रकार का मांसभक्षी पक्षी होता है, सम्भवतः यह उसी की चोंच के आकार का होता होगा, तभी इसका नाम **कंकमुख यन्त्र** रखा गया है। प्रस्तुत नाटक में कवि ने मांसभक्षी कंक एवं गृद्ध दोनों पक्षियों का भी उल्लेख किया है।

दुर्योधनः–

मातः! किमप्यसदृशं कृपणं वचस्ते
सुक्षत्रिया क्व भवती ? क्व च दीनतैषा?
निर्वत्सले! सुतशतस्य विपत्तिमेतां
त्वं नानुचिन्तयसि, रक्षसि माममयोग्यम्? ।।3।।

(अन्वय– मातः! ते असदृशम् किम् अपि कृपणम् वचः (अस्ति?) सुक्षत्रिया भवती क्व? एषा दीनता च क्व? निर्वत्सले! सुत–शतस्य एताम् विपत्तिम् त्वम् न अनुचिन्तयसि, माम् अयोग्यम् रक्षसि ?।।3।।)

नूनं विचेष्टितमिदं सुतशोकस्य।

संजयः– महाराजः! किं वाऽयं लोकवादो वितथो 'न घटस्य कूपपतने रज्जुरपि तत्रैव प्रक्षेप्तव्या' इति ?।

दुर्योधनः– अपुष्कलमिदम्। ननूपक्रियमाणाऽभावे किमुपकरणेन?।

(इति रोदिति)

धृतराष्ट्रः– (दुर्योधनं परिष्वज्य) वत्स! समाश्वसिहि। समाश्वासय चाऽस्मानिमामतिदीनां मातरं च।

दुर्योधनः– तात! दुर्लभः समाश्वास इदानीं युष्माकम्। किन्तु–

कुन्त्या सह युवामद्य मया निहतपुत्रया।
विराजमानौ शोकेऽपि तनयाननुशोचतम्।।4।।

(अन्वय– अद्य मया निहत–पुत्रया कुन्त्या सह शोके अपि विराजमानौ युवाम् तनयान् अनुशोचतम्।।4।।)

गान्धारी– जात! एतदेव साम्प्रतं प्रभूतं यत्त्वमपि तावदेको जीवसि। कमन्यमनुशोचिष्यामि। तज्जात! अकालस्ते समरस्य । प्रसीद। एष तेऽञ्जलिः। निवर्त्तस्व समरव्यापारात्। अपश्चिमं कुरुं पितुर्वचनम्।[1]

---

[1]. जाद! एदं एव्वं सम्पदं प्पभूदं जं तुमं वि दाव एक्को जीवसि। कं अण्णं अणुसोचिस्सम ता जाद! अकालो दे समरस्स। प्पसीद। एसो दे अंजली। णिवट्टहि समरव्वावारादो। अपच्छिमं करेहि पिदुणो वअणम्।

दुर्योधन– **हे माता! इसप्रकार कायरता की बातें करना, आपके अनुकूल नहीं है। कहाँ तो आप उत्तम कुल में उत्पन्न क्षत्राणी? और कहाँ यह दीनता? पुत्रस्नेह से रहित! सौ पुत्रों की इस विपत्ति को तुम नहीं सोच रही हो? और अयोग्य मेरी रक्षा कर रही हो?।।3।।**

निश्चय ही, आपकी यह चेष्टा पुत्रों के शोक से उत्पन्न हुई है।

संजय– महाराज! क्या यह कहावत असत्य है? कि 'घड़े के कुएँ में गिर जाने पर, रस्सी को भी वहीं नहीं फैंक देना चाहिए।'

दुर्योधन– यही पर्याप्त नहीं है। वास्तव में तो उपकार करने वाले बन्धुओं के अभाव में, राज्यरूप उपकरण से क्या लाभ?

(यह कहकर रोने लगता है)

धृतराष्ट्र– (दुर्योधन का आलिंगन करके) पुत्र! धैर्य धारण करो। हमें और अत्यधिक दीन इस माता को धैर्य धारण कराओ।

दुर्योधन– पिताजी! इससमय आप लोगों को समझाना अत्यन्त कठिन है, किन्तु–

आज मेरे द्वारा मारे गए पुत्रों वाली कुन्ती के साथ, शोक में विद्यमान होने पर भी, आप दोनों पुत्रों का शोक कर लीजिए।।4।।

गान्धारी– पुत्र! यदि तुम अकेले भी जीवित रहते हो, तो हमारे लिए यही पर्याप्त है। मैं भला दूसरे किसकी चिन्ता करूँगी? इसलिए हे पुत्र! यह तुम्हारे युद्ध करने का समय नहीं है। प्रसन्न होओ। यह मैं तुम्हारे समक्ष हाथ जोड़ रही हूँ। युद्ध के व्यापार से लौट आओ। पिता के वचनों का उल्लंघन नहीं करो।

शब्दार्थ– कृपणम्–कायरता, वचः–वचन, असदृशम्–अनुचित, भवती–आप, निर्वत्सले–हे पुत्र से स्नेह न करने वाली, क्व–कहाँ, अनुचिन्तयसि–बार–बार चिन्तन कर रही हो, रक्षसि–रक्षा कर रही हो, लोकवाद––कहावत, वितथः–असत्य, अयम्–यह, रज्जुः–रस्सी, प्रक्षेप्तव्या–फैंक देनी चाहिए।

धृतराष्ट्रः– वत्स! शृणु वचनं तवाऽम्बाया मम च निहताऽशेष-बन्धुवर्गस्य। पश्य–

दायादा न ययोर्बलेन गणितास्तौ द्रोणभीष्मौ हतौ,
कर्णस्यात्मजमग्रतः शमयतो भीतं जगत्फाल्गुनात्।
वत्सानां निधनेन मे त्वयि रिपुः शेषप्रतिज्ञोऽधुना
मानं वैरिषु मुंच तात! पितरावन्धाविमौ पालय।।5।।

(अन्वय– दायादा ययोः बलेन न गणिताः, तौ द्रोण–भीष्मौ हतौ, कर्णस्य आत्मजम् अग्रतः शमयतः, फाल्गुनात् जगत् भीतम्, मे वत्सानाम् निधनेन रिपुः अधुना त्वयि शेष–प्रतिज्ञः (अस्ति), तात! वैरिषु मानम् मुंच, इमौ अन्धौ पितरौ पालय।।5।।)

दुर्योधनः– तात! अम्ब! समरात्प्रतिनिवृत्त्य किं मया कर्तव्यम्?

गान्धारी– जात! यत्पिता ते विदुरो वा भणिष्यति तदनुतिष्ठ।[1]

संजयः– राजन्! एवमिदम्।

दुर्योधनः– संजय! अद्याऽप्युपदेष्टव्यमस्ति?

संजयः– राजन्! यावत्प्राणिति तावदुपदेष्टव्यभूमिर्विजिगीषुः प्रज्ञावताम्।

दुर्योधनः– (सक्रोधम्) शृणुमस्तावद्भवत एव प्रज्ञावतोऽस्मान्प्रति प्रतिरूपमुपदेशम्।

धृतराष्ट्रः– वत्स! युक्तवादिनि संजये किमत्र क्रोधेन? यदि प्रकृतिमापद्यसे तदहमेव भवन्तं ब्रवीमि। श्रूयताम्–

दुर्योधनः– कथयतु तातः!

धृतराष्ट्रः– वत्स! किं विस्तरेण? संधत्तां भवानिदानीमपि युधिष्ठिरमीप्सितपणबन्धेन।

दुर्योधनः– तात! तनयस्नेहवैक्लव्यादम्बा, बालिशत्वेन संजयश्च काममेवं ब्रवीतु। युष्माकमप्येवं व्यामोहः। अथवा प्रभवति पुत्रनाशजन्मा हृदयज्वरः। अन्यच्च तात! अस्खलितभ्रातृशतो यदाऽहं तदाऽवधीरित–

---

[1]. जाद! जं पिदा दे विउरो वा भणिस्सदि तं अनुचिट्ठ।

धृतराष्ट्र– पुत्र! अपनी माता के तथा मारे गए सभी बन्धुओं वाले मेरे वचनों को सुनो। देखो,

जिसने दो पराक्रमियों के बल के हिस्सेदार (दायदाः) पाण्डवों की भी परवाह नहीं की। वे दोनों भीष्म एवं द्रोण भी मारे गए। सभी के देखते–देखते कर्ण के पुत्र को मारने वाले, अर्जुन (फाल्गुन) से संसार भयभीत है और मेरे पुत्रों के निधन से अब तुम पर शत्रु की प्रतिज्ञा को पूरा किया जाना है। इसलिए हे पुत्र! मान–अपमान को शत्रुओं पर छोड़ दो और इन दोनों अन्धे माता–पिता का पालन करो।।5।।

दुर्योधन– हे तात! हे माते! युद्ध से लौटकर मुझे क्या करना चाहिए?

गान्धारी– हे पुत्र! जो तुम्हारे पिता अथवा विदुर कहें, वही करो।

संजय– राजन्! यह उचित ही है।

दुर्योधन– संजय! क्या अब भी उपदेश देना रह गया है?

संजय– राजन्! जब तक विजय प्राप्त करने का अभिलाषी जीवित रहता है, तब तक विद्वान् लोगों द्वारा वह उपदेश देने योग्य होता है।

दुर्योधन– (क्रोधपूर्वक) तब तो आप जैसे बुद्धिमान् व्यक्ति का उपदेश ही हम सुन लेते हैं।

धृतराष्ट्र– पुत्र! उचित बात कहने वाले, इस संजय पर क्रोध करने से क्या लाभ? यदि तुम शान्त हो जाते हो, तो मैं ही तुमसे कहता हूँ। सुनो–

दुर्योधन– पिताजी, कहिए।

धृतराष्ट्र– पुत्र! विस्तार से क्या? अभी भी आप अभिलषित शर्त को मानकर युधिष्ठिर के साथ सन्धि कर लो।

दुर्योधन– पिताजी, वस्तुतः माता जी पुत्र–स्नेह से व्याकुलता के कारण और संजय मूर्खता से ऐसा कह रहे हैं। आपको भी इसीप्रकार

वासुदेवसामोपन्यासः। सम्प्रति दृष्टपितामहाऽऽचार्याऽनुजराजचक्रविपत्तिः स्वशरीरमात्रस्नेहादुदात्तपुरुषव्रीडावहमसुखावसानं च कथमिव करिष्यति दुर्योधनः सह पाण्डवैः सन्धिम्। अन्यच्च नयवेदिन् संजय!

हीयमानान् किल रिपून्नृपाः सन्दधत्ते कथम्?।
दुःशासनेन हीनोऽहं सानुजः पाण्डवोऽधुना?।।6।।

(अन्वय– किल हीयमानान् रिपून् नृपाः कथम् सन्दधत्ते? अहम् दुःशासनेन हीनः, अधुना पाण्डवः स–अनुजः?।।6।।)

धृतराष्ट्रः– वत्स! एवं गतेऽपि मत्प्रार्थनया किंचिन्न करोति युधिष्ठिरः? अन्यच्च सर्वमेवाऽपकृतं नानुमन्यते।

दुर्योधनः– कथमिव ?

धृतराष्ट्रः– वत्स! श्रूयतां प्रतिज्ञा युधिष्ठिरस्य– 'नाहमेकस्यापि भ्रातुर्विपत्तौ प्राणान् धारयामी' ति। बहुच्छलत्वात्संग्रामस्यानुजनाशमाशंकमानो यदैव भवते रोचते तदैवाऽसौ सज्जः सन्धातुम्।

संजयः– एवमिदम्।

गान्धारी– जात! उपपत्तियुक्तं प्रतिपद्यस्व पितुर्वचनम्।[1]

दुर्योधनः– तात! अम्ब! संजय!

प्रस्तुत अंक में कवि ने पिता धृतराष्ट्र तथा माता गान्धारी एवं पुत्र दुर्योधन के अन्तर्द्वन्द्व की सुन्दर प्रस्तुति की है। दुर्योधन अपने सभी भाइयों को मारने वाले पाण्डवों से बदला लेने के लिए लालायित है, जबकि माता–पिता युद्ध को बन्द करके, इसे सन्धि करने के लिए प्रेरित करते हैं, किन्तु दुर्योधन का स्वाभिमान उसे ऐसा करने से रोकता है। यहाँ पर माता–पिता का यही स्वार्थ है कि सौ पुत्रों के मरने पर भी, केवल दुर्योधन के सहारे वे अपने शेष जीवन को व्यतीत कर लेंगे, किन्तु दुर्योधन अपने शत्रुओं से अपने प्रिय जनों को मारने का बदला लेने हेतु युद्ध करना चाहता है या फिर मृत्यु को अंगीकार करने के लिए उत्सुक है। इसप्रकार कवि ने यहाँ दुर्योधन के चरित्र के किंचित् उज्ज्वल पक्ष को प्रस्तुत किया है।

---

[1]. जाद! उपपत्तिजुत्तं पडिवज्जस्स पिदुणो वअणम्।

का व्यामोह है या फिर पुत्र–नाश से उत्पन्न हृदय–ज्वर आपको भी प्रभावित कर रहा है और भी हे पिताश्री! जिस समय मैं सौ भाइयों से युक्त था, उसी समय वासुदेव के शान्ति–प्रस्ताव को तिरस्कृत कर दिया था, अब जबकि भीष्मपितामह, आचार्य द्रोण, अनुजों एवं कर्ण आदि राजाओं के समूह के विनाश की विपत्ति को देख लेने वाला मैं, दुर्योधन अपने शरीरमात्र के स्नेह के कारण महापुरुषों की लज्जा धारण करने वाली तथा परिणाम में दुःख प्रदान करने वाली, पाण्डवों के साथ सन्धि को भला कैसे कर सकूँगा? और भी, हे नीतिज्ञ संजय!

वास्तव में, क्षीण बल वाले शत्रुओं के साथ राजा लोग भला किसप्रकार सन्धि कर सकते हैं? यों भी अब मैं दुःशासन आदि अनुजों से रहित हूँ तथा पाण्डव लोग इस समय अनुजों से युक्त हैं।।6।।

धृतराष्ट्र– पुत्र! ऐसा होने पर भी मेरी प्रार्थना से क्या युधिष्ठिर सन्धि नहीं करेंगे? इसके अलावा सभी लोग अपकार को मानने के ही पक्षधर नहीं होते हैं।

दुर्योधन– वह कैसे?

धृतराष्ट्र– पुत्र! तुम युधिष्ठिर की प्रतिज्ञा को सुनो, तदनुसार– 'एक भी भाई पर प्राणों की विपत्ति आने पर मैं प्राण धारण नहीं करूँगा।' अत्यधिक छल–प्रपंच के कारण युद्ध से भाइयों के विनाश की आशंका करता हुआ युधिष्ठिर, जब भी तुम चाहोगे, तभी सन्धि करने के लिए वह तैयार है।

संजय– यह ऐसा ही है।

गान्धारी– पुत्र! प्रमाणपूर्वक कहे गए पिता के वचनों का पालन करो।

दुर्योधन– पिताजी! माता जी! संजय!

शब्दार्थ– वासुदेव–श्रीकृष्ण, सामोपन्यासः–शान्ति विषयक प्रस्ताव, सम्प्रति–इस समय, राजचक्र–राजसमूह, उदात्तपुरुष–महापुरुष, श्रेष्ठ व्यक्ति, व्रीड़ा–लज्जा, कथमिव–भला कैसे, करिष्यति–करेगा, नयवेदिन्–नीति को जानने वाले।

एकेनापि विनानुजेन मरणं पार्थः प्रतिज्ञातवान्
भ्रातृणां निहते शते विषहते दुर्योधनो जीवितुम्?
तं दुःशासनशोणिताशनमरिं भिन्नं गदाकोटिना
भीमं दिक्षु न विक्षिपामि कृपणः सन्धिं विदध्यामहम्।।7

(अन्वय– एकेन अपि अनुजेन विना पार्थः मरणम् प्रतिज्ञातवान्, भ्रातृणाम् शते निहते अपि दुर्योधनः जीवितुम् विषहते? दुःशासन-शोणित–अशनम् तम् अरिम् भीमम् गदा–कोटिना भिन्नम्, दिक्षु न विक्षिपामि, कृपणः अहम् सन्धिम् विदध्याम्।।7।।)

गान्धारीः– हा जात दुःशासन! हा दुर्मर्षण। हा विकर्ण! हा वीरशतप्रसविनि गान्धारि, दुःखशतं प्रसूता, न सुतशतम्।[1]

(सर्वे रुदन्ति)

संजयः– (बाष्पमुत्सृज्य) तात! अम्ब! प्रतिबोधयितुं महाराजमिमां भूमिं युवामागतौ। तदात्माऽपि तावत्संस्तभ्यताम्।

धृतराष्ट्रः– वत्स दुर्योधन! एवं विमुखेषु भागधेयेषु त्वयि चाऽमुंचति सहजं मानवबन्धमरिषु त्वदेकशेषजीवितालम्बनेयं तपस्विनी गान्धारी कमवलम्बतां शरणमहं च ?।

दुर्योधनः– श्रूयतां यत्प्रतिपत्तमिदानीं प्राप्तकालम्–

कलितभुवना भुक्तैश्वर्यास्तिरस्कृतविद्विषः
प्रणतशिरसां राज्ञां चूड़ासहस्रकृताऽर्चनाः।
अभिमुखमरीन् संख्ये घ्नन्तो हताः शतमात्मजाः
वहतु सगरेणोढां तातो धुरं सहितोऽम्बया।।8।।

(अन्वय–कलित–भुवनाः, भुक्त–ऐश्वर्याः, तिरस्कृत–विद्विषः, प्रणत-शिरसाम् राज्ञाम्, चूड़ा–सहस्र–कृत–अर्चनाः, संख्ये अरीन् घ्नन्तः अभिमुखम् शतम् आत्मजाः हताः, अम्बया सहितः तातः सगरेण ऊढाम् धुरम् वहतु ।।8।।)

---

[1]. 'हा जाद दुस्सासण, हा दुम्मरिसण, हा विकण्ण, हा वीरसदप्पसविणि गान्धारि दुक्खसदं प्पसूदा ण सुदसदम्।

एक भी अनुज के न रहने पर युधिष्ठिर ने मरने की प्रतिज्ञा की है और सौ भाइयों के मारे जाने पर भी दुर्योधन जीवित रहने में समर्थ है। अनुज दुःशासन का रक्तपान करने वाले, शत्रु भीम को मैं भला गदा के अग्रभाग से विनष्ट करके दिशाओं में न फेंकूँ? और कायर मैं उनसे सन्धि कर लूँ।।7।।

गान्धारी– हाय! पुत्र दुःशासन, हाय दुर्मर्षण! हाय विकर्ण! हाय वीर प्रसविनी गान्धारि! तूने सौ पुत्रों को नहीं, अपितु सौ दुःखों का उत्पन्न किया है।

(सभी रोते हैं)

संजय– (अश्रु पोंछकर) पिताश्री! माताजी! आप दोनों महाराज को धैर्य बँधाने के लिए इस स्थान पर आए थे। इसलिए आप दोनों स्वयं को भी तो धैर्य धारण कराइए।

धृतराष्ट्र– पुत्र दुर्योधन! इसप्रकार भाग्य के विरुद्ध होने पर, तुम्हारे शत्रु पर स्वाभिमान को न्यौछावर न करने पर, एकमात्र तुम ही, जिसके जीवन का आधार रह गए हो, ऐसी बेचारी यह गान्धारी किसका सहारा ग्रहण करे और मैं भी किसकी शरण लूँ?

दुर्योधन– सुनिए, जो इस समय करने का समय है–

सम्पूर्ण संसार की रक्षा करने वाले, ऐश्वर्यों का भोग करने वाले, शत्रुओं को तिरस्कृत करने वाले, नतमस्तक राजाओं के हजारों चूड़ामणियों से पूजा कराने वाले, युद्ध में शत्रुओं का संहार करते हुए, आपके सामने ही सौ पुत्र मारे गए। इसलिए माता सहित पिताजी, राजा सगर द्वारा धारण किए गए, भार के समान ही आप ही इस पृथ्वी के भार को वहन कीजिए।। 8।।

विपर्यये त्वस्याऽधिपतेरुल्लंघितः क्षात्रधर्मः स्यात्।

(नेपथ्ये महान्कलकलः)

गान्धारी— (आकर्ण्य सभयम्) संजय! किमेतद्धाहाकारमिश्रं तूर्यरसितं श्रूयते।[1]

संजयः— अम्ब! भूमिरियमेवंविधानां भीरुजनत्रासजननी महानिनादानाम्।

धृतराष्ट्रः— वत्स संजय! ज्ञायतामतिभैरवः खलु विस्तारी हाहारवः। कारणेनाऽस्य महता भवितव्यम्।

दुर्योधनः— तात! प्रसीद। पराङ्मुखं खलु दैवमस्माकम्। यावदपरमपि किंचिदत्याहितं न श्रावयति तावदेवाऽऽज्ञापय मां संग्रामावतरणाय।

गान्धारी— जात! मुहुर्तकं तावन्मां मन्दभागिनीं समाश्वासय।[2]

धृतराष्ट्रः— वत्स! यद्यपि भवान्समराय कृतनिश्चयस्तथापि रहः परप्रतीघातोपायश्चिन्त्यताम्।

दुर्योधनः—

प्रत्यक्षं हतबान्धवा मम परे हन्तुं न योग्या रहः,
किं वा तेन कृतेन तैरिह कृतं यन्न प्रकाश्यं रणे।

गान्धारी— जात! एकाकी त्वम्, कस्ते साहाय्यं करिष्यति?[3]

दुर्योधनः—

एकोऽहं जगतीत्रयक्षयकरो मातः! कियन्तोऽरयः,
साम्यं केवलमेतु दैवमधुना निष्पाण्डवा मेदिनी।।9।।

(अन्वय— प्रत्यक्षम् हत–बान्धवाः परे रहः, मम हन्तुम् न योग्याः, इह रणे तैः प्रकाश्यम् यत् न कृतम् तेन कृतेन वा किम्? मातः! एकः

---

[1]. किं एदं हाहाकारमिस्सं तूररसिदं सुणीअदि?

[2]. जाद! मुहूत्तअं दाव मं मन्दभाइणीं समस्सासिहि।

[3]. जाद! एआइ तुमम्, को दे सहाअत्तणं करिस्सदि?

इसके विपरीत कार्य करने पर इनके क्षात्रधर्म का उल्लंघन हो जाएगा।

(नेपथ्य में महान् कलकल होता है)

गान्धारी– (सुनकर भयपूर्वक) संजय! क्या यह हाहाकार से युक्त तुरही की आवाज़ सुनायी दे रही है।

संजय– हे माते! महान् हाहाकारों की यह भूमि इसप्रकार के कायरों को भयभीत करने वाली होती है।

धृतराष्ट्र– पुत्र संजय! पता करो, अत्यधिक भयंकर और विस्तार से युक्त यह हाहाकार कैसा है? क्योंकि इसका कारण भी कोई बड़ा ही होना चाहिए।

दुर्योधन– पिताजी! प्रसन्न होइए। वस्तुतः भाग्य हमारे प्रतिकूल है, जब तक यह किसी दूसरे अनिष्ट की सूचना नहीं सुनाता है, तब तक ही मुझे युद्धभूमि में उतरने की आज्ञा प्रदान कीजिए।

गान्धारी– पुत्र! जरा क्षणभर के लिए मुझ मन्दभागिनी को धैर्य तो बँधा दो।

धृतराष्ट्र– पुत्र! यद्यपि तुम युद्ध में जाने का निश्चय कर चुके हो, फिर भी एकान्त में बैठकर शत्रु के संहार का उपाय तो सोच लो।

दुर्योधन– मेरे सामने ही शत्रुओं ने मेरे भाइयों को मार डाला और मैं उन्हें मारने में समर्थ न हो सका। इस युद्ध में उन शत्रुओं ने भीष्म एवं द्रोणादि वीरों का संहार करके, जो पौरुष प्रदर्शित किया है, यदि वैसा नहीं दिखा पाया तो क्या लाभ?

गान्धारी– पुत्र! तुम तो अकेले हो, तुम्हारी सहायता कौन करेगा?

दुर्योधन– हे माता! अकेले ही मैं तीनों लोकों का विनाश करने में समर्थ हूँ। शत्रु कितने ही क्यों न हों, यदि भाग्य अनुकूल हो, तो पृथ्वी पाण्डवों से रहित हो जाएगी।।9।।

अहम् जगती–त्रय–क्षय–करः, अरयः कियन्तः? अधुना केवलम् दैव साम्यम्, एतु मेदिनी निष्पाण्डवाः ।।9।।)

(नेपथ्ये कलकलानन्तरम्)

भो, भो, योधाः! निवेदयन्तु भवन्तः कौरवेश्वराय इदं महत्कदनं प्रवृत्तम्। अलमप्रियश्रवणपराङ्मुखतया। यतः कालानुरूपं प्रतिविधातव्यमिदानीम्। तथाहि–

त्यक्तप्राजनरश्मिरंकिततनुः पार्थांकितैर्मार्गणै–
र्वाहैः स्यन्दनवर्त्मनां परिचयादाकृष्यमाणः शनैः।
वार्तामंगपतेर्विलोचनजलैरावेदयन्पृच्छतां
शून्येनैव रथेन याति शिविरं शल्यः कुरूंछल्ययन्।।10।

(अन्वय– त्यक्त–प्राजन–रश्मिः पार्थ–अंकितैः मार्गणैः अंकित-तनुः, स्यन्दन–वर्त्मनाम् परिचयात् वाहैः शनैः आकृष्यमाणः, पृच्छताम् विलोचन–जलैः अंगपतेः वार्ताम् आवेदयन्, शल्यः कुरून् शल्ययन् शून्येन एव रथेन शिविरम् याति।।10।)

दुर्योधनः– (श्रुत्वा साशंकम्) आः सूत! केनेदमविस्पष्टमशनिपात-दारुणमुद्घोषितम्, ज्ञायताम्। कः कोऽत्र भोः?

(प्रविश्य संभ्रान्तः)

सूतः– हा! हताः स्मः। (इत्यात्मानं पातयति)

दुर्योधनः– अयि! कथय कथय ?।

धृतराष्ट्रसंजयौ– कथ्यतां कथ्यताम्।

सूतः– आयुष्मन्! किमन्यत्–

शल्येन यथा शल्येन मूर्च्छितः प्रविशता जनौघोऽयम्।
शून्यं कर्णस्य रथं मनोरथमिवाधिरूढेन।।11।।

(अन्वय– प्रविशता शल्येन यथा मनोरथम् इव शून्यम् कर्णस्य रथम् अधिरूढेन शल्येन अयम् जन–ओघः मूर्च्छितः।।11।।)

दुर्योधनः– हा वयस्य कर्ण!

(इति मोहमुपगतः)

(नेपथ्य में कोलाहल होने के बाद)

अरे, अरे! योद्धाओं, आप लोग कौरवेश्वर से निवेदन कर दीजिए कि यह महान् भयंकर घटित हो रहा है। इसलिए अप्रिय समाचार सुनने से मुख मोड़ना अब व्यर्थ है, वस्तुतः अब तो समय के अनुरूप ही कार्य करना चाहिए, क्योंकि–

चाबुक एवं लगाम को छोड़े हुए, अर्जुन के बाणों से चिह्नित शरीर से युक्त, रथ के मार्ग से परिचित होने के कारण, घोड़ों द्वारा धीरे–धीरे रथ को ले जाता हुआ, कर्ण के विषय में पूछे जाने पर अश्रु बहाते हुए समाचार बताता हुआ एवं कौरवों को पीड़ित करता हुआ, 'शल्य' खाली रथ लेकर शिविर की ओर जा रहा है।।10।।

दुर्योधन– (सुनकर आशंका के साथ) आः सूत! यह वज्रपात के समान भयंकर उद्घोष भला किसने किया है? पता करो। अरे! यहाँ कोई है?

(प्रवेश करके भयपूर्वक)

सूत– हाय! हम लोग मारे गए।

(ऐसा कहकर स्वयं को गिरा देता है)

दुर्योधन– अरे! कहो, कहो।

धृतराष्ट्र और संजय दोनों– कहिए, कहिए।

सूत– आयुष्मन्! और क्या?

प्रवेश करते हुए, विषैले बाणों के जैसा, शून्य मनोरथ के समान, (कर्ण से शून्य) **कर्ण के रथ पर अधिरूढ़ हुए शल्य द्वारा, लोगों का यह समूह मूर्च्छित हो गया है।।11।।**

दुर्योधन– हाय! मित्र, कर्ण!

(यह कहकर मूर्च्छित हो जाता है)

गान्धारी– जात! समाश्वसिहि समाश्वसिहि।[1]

संजयः– समाश्वसितु देवः, समाश्वसितु ।

धृतराष्ट्रः– भोः! कष्टं कष्टम्।

भीष्मे द्रोणे च निहते य आसीदवलम्बनम्।
वत्सस्य च सुहृच्छूरो राधेयः सोऽप्ययं गतः।।12।।

(अन्वय– भीष्मे द्रोणे च निहते, यः अवलम्बनम् आसीत्, वत्सस्य शूरः सुहृत् च, सः अयम् राधेयः अपि गतः।।12।।)

वत्स! समाश्वसिहि, समाश्वसिहि। ननु भो हतविधे!

अन्धोऽनुभूतशतपुत्रविपत्तिदुःख–
शोच्यां दशामुपगतः सह भार्ययाऽहम्।
अस्मिन्नशेषितसुहृद् गुरुबन्धुवर्गे
दुर्योधनेऽपि हि कृतो भवता निराशः।।13।।

(अन्वय– अन्धः अनुभूत–शत–पुत्र–विपत्ति–दुःखः अहम् भार्यया सह शोच्याम् दशाम् उपगतः, हि अशेषित–सुहृद्–गुरु–बन्धु–वर्गे अस्मिन् दुर्योधने अपि भवता निराशः कृतः।।13।।)

वत्स दुर्योधन! समाश्वसिहि, समाश्वसिहि। समाश्वासय तपस्विनीं मातरं च।

दुर्योधनः– (लब्धसंज्ञः)

अयि कर्ण! कर्णसुखदां प्रयच्छ मे
गिरमुद्गिरन्निव मुदं मयि स्थिराम्।
सतताऽवियुक्तमकृताऽप्रियं कथं
वृषसेनवत्सल! विहाय यासि माम्?।।14।।

(अन्वय– अयि कर्ण! मयि स्थिराम् मुदम् उद्गिरन् इव मे कर्ण–सुखदाम् गिरम् प्रयच्छ, वृषसेन–वत्सल! सतत–अवियुक्तम् अकृत–अप्रियम्, माम् विहाय कथम् यासि?।।14।।)

(इति पुनर्मोहमुपगतः। सर्वे समाश्वासयन्ति)

---

[1]. जाद! समस्सास समस्सस।

गान्धारी– पुत्र! धैर्य धारण करो, धैर्य धारण करो।

संजय– महाराज! धैर्य रखें, धैर्य रखें।

धृतराष्ट्र– अरे! कष्ट है, कष्ट है–

भीष्म एवं द्रोण के मारे जाने पर, जो अवलम्ब बना हुआ था और जो मेरे पुत्र का मित्र तथा योद्धा था, ऐसा वह राधेय कर्ण भी चला गया।।12।।

पुत्र! धैर्य धारण करो, धैर्य धारण करो। निश्चय ही, हे दुर्भाग्य!

नेत्रहीन, सौ पुत्रों के विनाश के दुःख को अनुभव किया हुआ मैं, पत्नी सहित शोचनीय दशा को प्राप्त हो गया हूँ, क्योंकि सम्पूर्ण मित्र एवं बन्धुवर्ग से रहित इस दुर्योधन पर भी तुम्हारे द्वारा मुझे निराश ही किया गया है।।13।।

पुत्र दुर्योधन! धैर्य धारण करो और तपस्विनी माता को भी भलीप्रकार धैर्य बँधाओ।

दुर्योधन– (होश में आकर)

अरे कर्ण! मानो मेरे मन में चिरस्थायिनी प्रसन्नता प्रदान करने वाली और मेरे कानों को सुख प्रदान करने वाली, वाणी में मुझे उत्तर प्रदान करो। हे वृषसेन वत्सल! हमेशा साथ में रहने वाले, कभी भी अप्रिय कार्य न करने वाले, मुझ दुर्योधन को छोड़कर तुम क्यों जा रहे हो?।। 14।।

(यह कहकर फिर से मूर्च्छित हो जाता है। सभी धैर्य बँधाते हैं)

शब्दार्थ– जात–पुत्र, निहते–मरने पर, अवलम्बनम्–सहारा, आसीत्–था, राधेयः–कर्ण, गतः–चला गया, हतविधे–हे दुर्भाग्य, शोच्याम्–शोचनीय को, दशाम्–दशा को, उपगतः– प्राप्त हो गया, हि–क्योंकि, तपस्विनीम्–बेचारी को, प्रयच्छ–प्रदान करो, मुदम्– प्रसन्नता को, मयि–मुझमें, सतत–निरन्तर, विहाय–छोड़कर, इति–इसप्रकार, अशेषित–सम्पूर्ण।

दुर्योधनः–

मम प्राणाधिके तस्मिन्नंगानामधिपे हते।
उच्छ्वसन्नपि लज्जेऽहमाश्वासे तात! का कथा? ।15।

(अन्वय– तात! मम प्राण–अधिके अंगानाम् अधिपे तस्मिन् हते अहम् उच्छ्वसन् अपि लज्जे, आश्वासे का कथा? ।15।)

अपि च –

शोचामि शोच्यमपि शत्रुहतं न वत्सं
दुःशासनं तमधुना न च बन्धुवर्गम्।
येनाऽतिदुःश्रवमसाधु कृतं तु कर्णे
कर्ताऽस्मि तस्य निधनं समरे कुलस्य ।।16।।

(अन्वय– अधुना शत्रु–हतम् शोच्यम् अपि न वत्सम्, तम् दुःशासनम् बन्धु–वर्गम् च न शोचामि, तु येन कर्णे अति–दुःश्रवम् असाधु कृतम्, तस्य कुलस्य समरे निधनम् कर्ता अस्मि।।16।।)

गान्धारी– जात! शिथिलय तावत्क्षणमात्रं बाष्पमोक्षम्।[1]

धृतराष्ट्र– वत्स! क्षणमात्रं परिमार्जयाऽश्रूणि।

दुर्योधनः–

मामुद्दिश्य त्यजन्प्राणान् केनचिन्न निवारितः।
तत्कृते त्यजतो बाष्पं किं मे दीनस्य वार्यते?।।17।।

(अन्वय– माम् उद्दिश्य प्राणान् त्यजन्, केनचित् न निवारितः, तत् कृते बाष्पम् त्यजतः, दीनस्य मे किम् वार्यते?।।17।।)

सूत! केनैतदसंभावनीयमस्मत्कुलान्तकरं कर्म कृतं स्यात्?

सूतः– आयुष्मन्! एवं किल जनः कथयति–

भूमौ निमग्नचक्रश्चक्रायुधसारथेः शरैस्तस्य।
निहतः किलेन्द्रसूनोरस्मत्सेना कृतान्तस्य ।।18।।

(अन्वय– भूमौ निमग्न–चक्रः, चक्र–आयुध–सारथेः, तस्य अस्मत् सेना कृतान्तस्य इन्द्र–सूनोः शरैः निहतः किल।।18।।)

---

[1]. जाद! सिढिलेहि दाव क्खणमेत्तं बाप्पमोक्खम्।

दुर्योधन– हे पिताजी! मेरे प्राणों से भी अधिक प्रिय, अंगराज कर्ण के मारे जाने पर मैं श्वास लेने में भी लज्जा का अनुभव कर रहा हूँ। धैर्य धारण करने की तो बात ही क्या है?।। 15।।

और भी–

अब शत्रुओं द्वारा मारे गए, शोचनीय पुत्र, प्रिय अनुज दुःशासन एवं दूसरे बन्धुवर्ग का मुझे शोक नहीं है, किन्तु जिस दुष्ट ने अत्यन्त कष्टपूर्वक सुना जा सकने वाला, कर्ण का यह अमंगल कार्य किया है। उसके वंश का मैं संग्राम में विनाश करने वाला हूँ।।16।।

गान्धारी– पुत्र! थोड़ी देर के लिए अश्रुप्रवाह को रोक लो।

धृतराष्ट्र– पुत्र! क्षणमात्र के लिए अश्रुओं को पोंछ लो।

दुर्योधन– मुझे लक्ष्य करके, प्राणों को त्यागते हुए, जिस कर्ण को किसी भी व्यक्ति द्वारा रोका नहीं गया। उसके लिए अश्रुओं को त्यागते हुए, मुझ दुःखी को क्यों रोका जा रहा है?।।17।।

हे सूत! हमारे वंश का विनाश करने वाला, यह असम्भव कार्य किसने किया?

सूत– वस्तुतः लोग ऐसा कह रहे हैं–

निश्चय ही, वे रथ का पहिया भूमि में धँस जाने पर, चक्रधारी श्रीकृष्ण द्वारा चलाए जा रहे रथ वाले, हमारी सेना का विनाश करने वाले, इन्द्रपुत्र अर्जुन के बाणों से मारे गए।।18।।

शब्दार्थ– मम–मेरे, हते–मारे जाने पर, उच्छ्वसन्–श्वास लेता हुआ, लज्जे–लज्जित हो रहा हूँ, का–क्या, कथा–बात, आश्वासे–धैर्य के लिए, अपिच–और भी, अधुना–अब, वत्सम्–पुत्र को, शोचामि–शोक करता हूँ, असाधु–अनुचित, अमंगल, निधनम्–विनाश, मृत्यु, समरे–युद्ध में, शिथिलय–रोक लो, बाष्पमोक्षम्–आँसुओं के छोड़ने को, क्षणमात्रम्–क्षणभर के लिए, परिमार्जय–पोंछ लो।

दुर्योधनः– कष्टं भोः कष्टम्।

कर्णाननेन्दुस्मरणात्क्षुभितः शोकसागरः।
वाडवेनेव शिखिना पीयते क्रोधजेन मे।।19।।

(अन्वय– कर्ण–आनन–इन्दु–स्मरणात् क्षुभितः मे शोक–सागरः वाडवेन शिखिना इव क्रोधजेन पीयते ।।19।।)

तात! अम्ब! प्रसीदतम्।

ज्वलनः शोकजन्मा मामयं दहति दुःसहः।
समानायां विपत्तौ मे वरं संशयितो रणः।।20।।

(अन्वय– दुःसहः शोक–जन्मा, अयम् ज्वलनः माम् दहति, मे विपत्तौ समानायाम् संशयितः रणः वरम्।।20।।)

धृतराष्ट्रः– (दुर्योधनं परिष्वज्य रुदन्)

भवति तनय! लक्ष्मीः साहसेष्वीदृशेषु
द्रवति हृदयमेतद्भीममुत्प्रेक्ष्य भीमम्।
अनिकृतिनिपुणं ते चेष्टितं मानशौण्ड!
छलबहुलमरीणां संगरं हा! हतोऽस्मि।।21।।

(अन्वय– तनय! ईदृशेषु साहसेषु लक्ष्मीः भवति, भीमम्, भीमम् उत्प्रेक्ष्य एतत् हृदयम् द्रवति, मानशौण्ड! ते चेष्टितम् अनिकृति–निपुणम्, अरीणाम् संगरम् छल–बहुलम्, हा! हतः अस्मि।।21।।)

गान्धारी– जात! तेनैव सुतशतकृतान्तेन वृकोदरेण समं समरं मार्गयसे?[1]

दुर्योधनः– अम्ब! तिष्ठतु तावद् वृकोदरः।

पापेन येन हृदयस्य मनोरथो मे
सर्वांगचन्दनरसो नयनाऽमलेन्दुः।
पुत्रस्तवाम्ब! तव तात! नयैकशिष्यः
कर्णो हतः सपदि तत्र शराः पतन्तु।।22।।

दुर्योधन– अरे! कष्ट है, अत्यधिक कष्ट है–

---

[1]. जाद तेण एव सु दसदकदन्तेण विओदलेण समं समलं मग्गसि?

मित्र कर्ण के मुखरूपी चन्द्रमा का स्मरण करने से व्याकुल हुआ, मेरा शोकरूपी सागर, वड़वानल के समान, क्रोध से उत्पन्न हुई अग्नि द्वारा पिया जा रहा है।।19।।

पिताजी! माते! आप प्रसन्न रहिए।

अत्यधिक शोक से उत्पन्न, यह अग्नि मुझे जला रही है। इसलिए युद्ध करने एवं न करने इन दोनों समान विपत्ति में संशय होने पर मेरे लिए युद्ध करना ही श्रेष्ठ है।।20।।

धृतराष्ट्र– (दुर्योधन को गले लगाकर रोते हुए)

पुत्र! इसप्रकार के साहसपूर्ण कार्यों में ही लक्ष्मी निवास करती है, किन्तु भयंकर भीम को सोचकर हृदय व्याकुल हो जाता है। हे स्वाभिमानियों में अग्रणी! तुम्हारा कार्य शत्रुओं की वंचना से रहित है, जबकि शत्रुओं के साथ युद्ध करना, छल–प्रपंच से भरा हुआ है। हाय! मैं तो मारा गया।।21।।

गान्धारी– बेटा! उसी सौ पुत्रों का विनाश करने वाले, भीमसेन के साथ युद्ध करना चाह रहे हो?।

दुर्योधन– हे माते! तब तक भीम तो अलग ही रहे–

हे पिताजी! जिस दुष्ट ने मेरे हृदय के मनोरथ को, सभी अंगों को चन्दन के समान आनन्दित करने वाले, नेत्रों के लिए निर्मल चन्द्रमा के समान, तुम्हारे पुत्र, तुम्हारे राजनीति के प्रमुख शिष्य कर्ण का वध किया है, मेरे बाण तो शीघ्रतापूर्वक उसी पर गिरेंगे।।22।।

शब्दार्थ– आनन–मुख, इन्दु–चन्द्रमा, स्मरणात्–स्मरण करने से, क्षुभितः–व्याकुल हुआ, वाडवेन–वड़वानल के द्वारा, इव–समान, क्रोधजेन–क्रोध से उत्पन्न, पीयते–पिया जा रहा है, ज्वलनः–अग्नि, माम्–मुझे, दहति–जला रहा है, परिष्वज्य–आलिंगन करके, रुदन्–रोते हुए, ईदृशेषु–इसप्रकार को में, उत्प्रेक्ष्य–देखकर।

(अन्वय– येन पापेन मे हृदयस्य मनोरथः, सर्वांग–चन्दन–रसः, नयन–अमल–इन्दुः अम्ब! तव पुत्रः, तात! नय तव एक–शिष्यः, कर्णः हतः, तत्र सपदि शराः पतन्तु।।22।।)

सूत! अलमिदानीं कालातिपातेन, सज्जं मे रथमुपहर। भयं चेत्पाण्डवेभ्यस्तिष्ठ। गदामात्रसहाय एव समरभुवमवतरामि।

सूतः– अलमन्यथा संभावितेन! अयमहमागत एव।

(इति निष्क्रान्तः)

धृतराष्ट्रः– वत्स दुर्योधन! यदि स्थिर एवाऽस्मान्दग्धुमयं ते व्यवसायस्तद्यथासन्निहितेषु वीरेषु सेनापतिः कश्चिदभिषिच्यताम्।

दुर्योधनः– नन्वभिषिक्त एव।

गान्धारी– जात! कतरः पुनः स, यत्रेमां हताशामवलम्बिष्ये?[1]

धृतराष्ट्रः– किं वा शल्य उत वाऽश्वत्थामा?।

संजयः– हा कष्टम्।

गते भीष्मे हते द्रोणे कर्णे च विनिपातिते।
आशा बलवती राजन्छल्यो जेष्यति पाण्डवान्।।23।।

(अन्वय– भीष्मे गते, द्रोणे हते, कर्णे च विनिपातिते, राजन्! आशा बलवती, शल्यः पाण्डवान् जेष्यति।।23।।)

दुर्योधनः– किं वा शल्येनोत वाऽश्वत्थाम्ना?

कर्णालिंगनदायी वा पार्थप्राणहरोऽपि वा।
अनिवारितसम्पातैरयमात्माऽश्रुवारिभिः।।24।।

(अन्वय– कर्ण–आलिंगन–दायी वा, पार्थ–प्राण–हरः अपि वा, अनिवारित–सम्पातैः अश्रु–वारिभिः अयम् आत्मा (अभिषिक्तः)।।24।।)

(नेपथ्ये कलकलं श्रुत्वा)

भो भोः कौरवबलप्रधानयोधाः! अलमस्मानवलोक्य भयादितस्ततो गन्तुम्। कथयन्तु भवन्तः कस्मिन्नुद्देशे सुयोधनस्तिष्ठतीति।

(सर्वे ससंभ्रममाकर्णयन्ति)

---

1. जाद! कदरो उण सो, जस्सिं हदासं ओलम्बिस्सम्।

सूत! अब विलम्ब करना व्यर्थ है। तैयार किया हुआ मेरा रथ ले आओ। यदि पाण्डवों का भय हो, तो ठहरो, मैं गदामात्र सहयोगी होकर ही समरभूमि में उतरता हूँ।

सूत– विपरीत सम्भावना से बस कीजिए। यह मैं आ ही गया हूँ।

(इसप्रकार कहकर निकल जाता है)

धृतराष्ट्र– पुत्र, दुर्योधन! यदि हमें जलाने का तुम्हारा दृढ़ निश्चय है तो उपस्थित वीरों में से किसी भी एक को सेनापति पद पर अभिषिक्त कर दो।

दुर्योधन– निश्चय ही, अभिषिक्त किया जा चुका है।

गान्धारी– पुत्र! वह कौन सा व्यक्ति है, जिसपर मैं नष्ट हुई आशा लगाऊँ?

धृतराष्ट्र– क्या वह शल्य है अथवा फिर अश्वत्थामा?

संजय– हाय! कष्ट है–

भीष्मपितामह के चले जाने, द्रोणाचार्य के मारे जाने और कर्ण जैसे महारथियों का निधन होने पर, हे राजन्! अब तो यही बलवती आशा लगी हुई कि शल्य ही पाण्डवों पर विजय प्राप्त करेगा।।23।।

दुर्योधन– शल्य अथवा अश्वत्थामा से क्या?

कर्ण को आलिंगन प्रदान करने वाला अथवा पार्थ के प्राणों का हरण करने वाला या फिर निरन्तर आँसू बहाने वाला, यह मैं स्वयं ही अभिषिक्त हो गया हूँ।।24।।

(नेपथ्य में कोलाहल सुनकर)

अरे! अरे! कौरव सेना के प्रमुख योद्धाओं! हमें देखकर भयपूर्वक इधर–उधर भागने से बस करो। कृपया आप तो यह बताएँ कि सुयोधन भला किस प्रदेश में बैठा हुआ है?

(सभी घबराहटपूर्वक सुनते हैं)

(प्रविश्य सम्भ्रान्तः)

सूतः– आयुष्मन्!

प्राप्तावेकरथारूढौ पृच्छन्तौ त्वामितस्ततः।

सर्वे– कश्च कश्च?

सूतः–

स कर्णारिः स च क्रूरो वृककर्मा वृकोदरः।।25।।

(अन्वय– एक–रथ–आरूढौ इतस्ततः त्वाम् पृच्छन्तौ प्राप्तौ, सः कर्ण–अरिः सः च क्रूरः वृक–कर्मा, वृकोदरः।।25।।)

गान्धारी– (सभयम्) जात! किमत्र साम्प्रतं प्रतिपत्तव्यम्?[1]

दुर्योधनः– अम्ब! ननु सन्निहितैवेयं गदा।

गान्धारी– हा हताऽस्मि, अहं मन्दभागिनी।[2]

दुर्योधनः– अम्ब! अलमिदानीं कार्पण्येन। संजय! रथमारोप्य पितरौ शिविरं प्रतिष्ठस्व। समागतोऽस्माकं शोकाऽपनोदी जनः।

धृतराष्ट्रः– वत्स! क्षणमेकं प्रतीक्षस्व यावदनयोर्भावमुपलभे।

दुर्योधनः– तात! किमनेनोपलब्धेन?। तद्गम्यताम्।

(धृतराष्ट्रो गान्धारी च किंचिद्गत्वा तिष्ठतः)

(ततः प्रविशतो रथाऽऽरूढौ भीमार्जुनौ)

भीमः– भो भोः सुयोधनानुजीविनः! किमिति सम्भ्रमादयथातथं संचरन्ति भवन्तः। कथयत तावदिदमावयोरागमनं स्वामिनस्तस्य कुरुपतेः। अलमावयोः शंकया–

कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी
कृष्णाकेशोत्तरीयव्यपनयनमरुत्पाण्डवा यस्य दासाः।
राजा दुःशासनादेर्गुरुरनुजशतस्यांगराजस्य मित्रं,
क्वास्ते दुर्योधनोऽसौ, कथयत न रुषा द्रष्टुमभ्यागतौ स्वः।

---

1 . (सभयं) जाद! किं एत्थ सम्पत्तं पडिपज्जिदव्वं?

2 . हा हदम्हि मन्दभाइणी।

(प्रवेश करके डरा हुआ)

सूतः– आयुष्मन्!

एक ही रथ पर चढ़े हुए, आपको इधर–उधर पूछते हुए, खोजते हुए,

सभी– कौन? कौन?

सूतः– वह कर्ण के शत्रु अर्जुन एवं क्रूरकर्म करने वाला भयंकर वृकोदर दोनों ही आ गए हैं।।25।।

गान्धारी– (भयपूर्वक) हे पुत्र! अब भला क्या करना चाहिए?

दुर्योधन– हे माते! निश्चय ही, यह मेरी गदा तैयार है।

गान्धारी– हाय! मैं मन्दभागिनी तो मारी गयी।

दुर्योधन– हे माते! अब दीनता से कोई लाभ नहीं है? संजय! माता–पिता को रथ पर बैठाकर शिविर में प्रस्थान करो, क्योंकि हमारे शोक को दूर करने वाला आ गया है।

धृतराष्ट्र– वत्स! एक क्षण के लिए प्रतीक्षा करो, जब तक मैं इन दोनों के आशय को समझ लूँ।

दुर्योधन– पिताजी! अब भाव समझने से क्या? आप तो जाइए।

(धृतराष्ट्र और गान्धारी दोनों कुछ दूर जाकर रुक जाते हैं)

(उसके बाद रथ पर आरूढ़ हुए भीम और अर्जुन प्रवेश करते हैं)

भीम– अरे! अरे! सुयोधन के पक्षपातियों! भयभीत हुए, आप लोग इधर–उधर क्यों घूम रहे हैं? जरा आप लोग अपने स्वामी उस कुरुराज को हम दोनों के आने की यह सूचना दे दो। हम दोनों पर शंका से बस करो।

जुए में छलों को करने वाला, लाक्षागृह को जलाने वाला, अभिमानी एवं द्रौपदी के केशों और उत्तरीय को खींचने में वायु के समान, जुए में दास बने हुए पाण्डव लोग जिसे चुपचाप देख रहे थे, दुःशासन आदि सौ भाइयों में बड़े, अंगराज का मित्र, वह दुर्योधन कहाँ है? जरा बताओ। हम दोनों क्रुद्ध होकर नहीं, अपितु यों ही देखने के लिए आए हैं।।26।।

(अन्वय– द्यूतच्छलानाम् कर्ता, जतुमय–शरण–उद्दीपनः, अभिमानी –कृष्णा–केश–उत्तरीय–व्यपनयन–मरुत् सः, पाण्डवाः यस्य दासाः, दुःशासनादेः अनुज–शतस्य गुरुः, अंगराजस्य मित्रम् राजा असौ दुर्योधनः, क्व आस्ते? कथयतः रुषा न, द्रष्टुम् अभ्यागतौ स्वः।।26।।)

धृतराष्ट्रः– संजय! दारुणः खलूपक्षेपः पापस्य।

संजयः– तात! कर्मणा कृतनिःशेषविप्रियाः सम्प्रति वाचा व्यवस्यन्ति।

दुर्योधनः– सूत! कथय गत्वोभयोः'अयं तिष्ठतीति'।

सूतः– यथाऽऽज्ञापयति देवः। (तावुपसृत्य) ननु भो वृकोदराऽर्जुनौ! एष महाराजस्तातेनाऽम्बया च सह न्यग्रोधच्छायायामुपविष्टस्तिष्ठति।

अर्जुनः– आर्य! प्रसीद। न युक्तं पुत्रशोकोपपीडितौ पितरौ पुनरस्मद्दर्शनेन भृशमुद्वेजयितुम्। तद् गच्छावः।

भीमः– मूढ! अनुलंघनीयः सदाचारः। न युक्तमनभिवाद्य गुरून् गन्तुम्। (उपसृत्य) संजय! पित्रोर्नमस्कृतिं श्रावय। अथवा तिष्ठ। स्वयमेव विश्राव्य नामकर्मणी वन्दनीया गुरवः। (इति रथादवतरतः)

अर्जुनः– (उपगम्य) तात! अम्ब!

सकलरिपुजयाऽऽशा यत्र बद्धा सुतैस्ते
तृणमिव परिभूतो यस्य गर्वेण लोकः।
रणशिरसि निहन्ता तस्य राधासुतस्य
प्रणमति पितरौ वां मध्यमः पाण्डवोऽयम्।।27।।

(अन्वय– ते सुतैः सकल–रिपु–जय–आशा यत्र बद्धा,यस्य लोकः गर्वेण तृणम् इव परिभूतः, रण–शिरसि तस्य राधा–सुतस्य निहन्ता, अयम् मध्यमः पाण्डवः पितरौ वाम् प्रणमति।।27।।)

भीमः–

चूर्णिताशेषकौरव्यः क्षीबो दुःशासनाऽसृजा।
भङ्क्ता सुयोधनस्योर्वो भीमोऽयं शिरसाऽंचति।।28।।

धृतराष्ट्रः– संजय! वास्तव में इस पापी का आक्षेप भयंकर है।

संजयः– तात! कर्म द्वारा सभी प्रकार के अप्रिय कार्य करके, अब ये वाणी से आक्षेप करेंगे।

दुर्योधन– हे सूत! उन दोनों से जाकर कहो कि– 'यह यहाँ पर बैठा हुआ है।'

सूत– जैसी महाराज की आज्ञा। (उन दोनों के पास जाकर) अरे! वृकोदर एवं अर्जुन! निश्चय ही, ये महाराज, पिताजी और माताजी के साथ इस वट वृक्ष की छाया में विराजमान हैं।

अर्जुन– आर्य! प्रसन्न होइए। पुत्रशोक से व्याकुल, माता–पिता को फिर से दिखायी देकर, अधिक व्याकुल करना उचित नहीं है। इसलिए आइए, हम दोनों चलते हैं।

भीम– मूर्ख! सदाचार का उल्लंघन नहीं करना चाहिए। इसलिए गुरुजनों को अभिवादन किए बिना चले जाना ठीक नहीं है। (पास जाकर) संजय! माता–पिता को हमारा प्रणाम सुना दो अथवा ठहरो, हम दोनों ही आकर सुना देते हैं, क्योंकि गुरुजन तो वन्दनीय होते हैं।

(ऐसा कहकर दोनों रथ से उतरते हैं)

अर्जुन– (पास जाकर) पिताजी! माताजी!

तुम्हारे पुत्रों द्वारा सभी शत्रुओं पर विजय प्राप्त करने की जिस पर आशा बाँधी गयी थी, जिसके अहंकार से संसार का तिनके के समान मानकर, तिरस्कार किया जाता था, समरभूमि में उस राधेय कर्ण का मारने वाला, यह मध्यम पाण्डव अर्जुन आप दोनों को प्रणाम कर रहा है।।27।।

भीम–

सभी कौरवों को नष्ट करने वाला, दुःशासन के रुधिर को पीने के कारण, मदमस्त बना हुआ, सुयोधन की जँघाओं को विदीर्ण करने वाला, यह भीम सिर झुकाकर आपको प्रणाम कर रहा है।।28।।

(अन्वय– चूर्णित–अशेष–कौरव्यः दुःशासन–असृजा क्षीबः सुयो-धनस्य ऊर्वोः भङ्क्ता, अयम् भीमः शिरसा अंचति।।28।।)

धृतराष्ट्रः– दुरात्मन् वृकोदर! न तावद्विकत्थयाऽऽत्मानम्, न खल्विदं भवतैव केवलं सपत्नामपकृतम्। यावत्क्षत्रं तावत्समरविजयिनो जिता हताश्च वीराः। तत्किमेवं विकत्थनाभिरस्मानुद्वेजयसि?

भीमः– तात, अलमलं मन्युना।

कृष्णा केशेषु कृष्टा तव सदसि वधूः पाण्डवानां नृपैर्यैः
सर्वे ते क्रोधवह्नौ कृशशलभकुलाऽवज्ञया येन दग्धाः।
एतस्माच्छ्रावयेऽहं न खलु भुजबलश्लाघया नापि दर्पात्
पुत्रैः पौत्रैश्च कर्मण्यतिगुरुणि कृते तात! साक्षी त्वमेव।29

(अन्वय– पाण्डवानाम् वधूः कृष्णा यैः नृपैः तव सदसि केशेषु कृष्टा, येन कृश–शलभ–कुल–अवज्ञया सर्वे ते क्रोध–वह्नौ दग्धाः, एतस्मात् अहम् श्रावये, न खलु भुज–बल–श्लाघया, न अपि दर्पात्, तात! पुत्रैः पौत्रैः च कृते अति–गुरुणि कर्मणि त्वम् एव साक्षी ।। 29।।)

दुर्योधनः– अरे रे मरुत्तनय! किमेवं वृद्धस्य राज्ञः पुरतो निन्दित-व्यमात्मकर्म श्लाघसे। अपि च–

कृष्टा केशेषु भार्या तव, तव च पशोस्तस्य राज्ञस्तयोर्वा
प्रत्यक्षं भूपतीनां मम भुवनपतेराज्ञया द्यूतदासी।
अस्मिन्वैरानुबन्धे वद किमपकृतं तैर्हता ये नरेन्द्राः,
बाह्वोर्वीर्यातिरेकद्रविणगुरुमदं मामजित्वैव दर्पः।।30।।

(अन्वय– भुवनपतेः मम आज्ञया द्यूत–दासी, तव पशोः तव, तस्य च राज्ञः तयोः वा भार्या भूपतीनाम् प्रत्यक्षम् केशेषु कृष्टा, अस्मिन् वैर–अनुबन्धे ये नरेन्द्राः हताः, तैः किम् अपकृतम् वद, बाह्वोः वीर्य-अतिरेक–द्रविण–गुरु–मदम् माम् अजित्वा एव दर्पः।।30।।)

आः दुरात्मन्! एष न भवसि।

(इति सक्रोधमुत्थाय हन्तुमिच्छति)

(धृतराष्ट्रो धृत्वोपवेशयति)

धृतराष्ट्रः– हे दुरात्मन! वृकोदर! अपनी अधिक प्रशंसा मत करो, क्योंकि केवल तुमने अकेले ही शत्रुओं का संहार नहीं किया है। जब तक क्षत्रिय जाति है, तब तब युद्ध–विजयी वीर जीते और मारे जाते रहे हैं।

भीम– हे तात! क्रोध से बस कीजिए, बस कीजिए।

पाण्डवों की वधू द्रौपदी, जिन राजाओं द्वारा आपकी सभा में केश पकड़कर खींची गई, इस अर्जुन ने तुच्छ पतंगों के समान, अवज्ञा करके, उन सभी को क्रोधरूपी अग्नि में जलाकर भस्म कर दिया है। इसीकारण मैं आपको सुना रहा हूँ, अपने भुजबल की प्रशंसा और अभिमान से यह सब मैं आपको नहीं कह रहा हूँ। हे तात! अपने पुत्रों, पौत्रों द्वारा किए गए, शत्रुवध आदि अत्यन्त महान् कार्यों के तो आप स्वयं ही साक्षी हैं। ।29।।

दुर्योधन– अरे! रे! वायुपुत्र! भीम, इसप्रकार वृद्ध महाराज के सामने, अपने निन्दनीय कर्मों की प्रशंसा कर रहे हो? और भी–

सभी लोकों के अधिपति, मेरी आज्ञा से जुए में जीती गयी, तेरी पत्नी को दासी मानकर, पशु के समान तेरे एवं अर्जुन के और उस राजा युधिष्ठिर तथा नकुल–सहदेव के समक्ष, केश पकड़कर खींचा गया। इस शत्रुता के प्रसंग में, जो राजा मारे गए, उन्होंने तुम्हारा क्या अपकार किया था? जरा बताओ। भुजाओं के बलरूपी धन के अभिमान से मत्त हुए, मुझे जीते बिना ही गर्व कर रहे हो?।।30।।

अहो! दुरात्मन्! यह तू अब जीवित नहीं बचेगा।

(इसप्रकार कहकर क्रोधपूर्वक उठकर मारना चाहता है)

(धृतराष्ट्र पकड़कर बैठा देते हैं)

(भीमः क्रोधं नाटयति)

अर्जुनः– (निवारयन्) आर्य! प्रसीद, प्रसीद। किमत्र क्रोधेन।

अप्रियाणि करोत्येष वाचा शक्तो न कर्मणा।
हतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा।।31।।

(अन्वय– हत–भ्रातृ–शतः, दुःखी एषः वाचा अप्रियाणि करोति कर्मणा न शक्तः, अस्य प्रलापैः का व्यथा।।31।।)

भीमः– अरे रे भरतकुलेन्दुकलंक!

अत्रैव किं न विशसेयमहं भवन्तं
दुःशासनानुगमनाय कटुप्रलापिन्!
विघ्नं गुरुर्न कुरुते यदि मद्गदाग्र–
निर्भिद्यमानरणिताऽस्थीनि ते शरीरे ।।32।।

(अन्वय– कटु–प्रलापिन्! यदि मत्–गदा–अग्र–निर्भिद्यमान–रणित–अस्थीनि ते शरीरे गुरुः विघ्नम् न कुरुते, अत्र एव भवन्तं दुःशासन–अनुगमनाय अहम् न विशसेयम् किम्?।।32।।)

अन्यच्च मूढ!

शोकं स्त्रीवन्नयनसलिलैर्यत्परित्याजितोऽसि
भ्रातुर्वक्षःस्थलविघटने यच्च साक्षीकृतोऽसि।
आसीदेतत्तव कुनृपतेः कारणं जीवितस्य
क्रुद्धे युष्मत्कुलकमलिनीकुंजरे भीमसेने।।33।।

(अन्वय– युष्मत् कुल–कमलिनी–कुंजरे भीमसेने क्रुद्धे,यत् स्त्रीवत् नयन–सलिलैः शोकम् परित्याजितः असि, यत् च भ्रातुः वक्षःस्थल–विघटने साक्षी–कृतः असि, एतत् कु–नृपतेः तव जीवितस्य कारणम् आसीत्।।33।।)

दुर्योधनः– दुरात्मन्! भरतकुलापसद! पाण्डवपशो! नाऽहं भवानिव विकत्थनाप्रगल्भः। किन्तु–

द्रक्ष्यन्ति नचिरात्सुप्तं बान्धवास्त्वां रणांगणे।
मद्गदाभिन्नवक्षोऽस्थिवेणिकाभीमभूषणम्।।34।।

(भीम क्रोध करने का अभिनय करता है)

अर्जुन– (रोकते हुए) आर्य! प्रसन्न होइए। यहाँ पर क्रोध करने से क्या लाभ है?

सौ भाइयों के मारे जाने से दुःखी यह दुर्योधन वाणी के द्वारा ही, अप्रिय कर रहा है, जबकि कर्म करने में यह समर्थ नहीं है। इसलिए इसके प्रलापों से दुःखी होने की आवश्यकता नहीं है। ।31।।

भीम– अरे! रे! भरतकुल के कलंक!

हे कटुप्रलाप करने वाले! यदि मेरी गदा के अग्रभाग से तोड़ी गयी, चरमराती हुई तेरे शरीर की हड्डियों वाले, तेरे शरीर पर, गुरुजन विघ्न नहीं करते तो, आज ही तुझे दुःशासन का अनुगमन करने के लिए, क्या मैं मार चुका नहीं होता? ।।32।।

और भी हे मूर्ख!

तेरे वंशरूपी कमलिनी लता के लिए मतवाले हाथी के समान, मुझ भीम के क्रुद्ध होने पर, जो स्त्रियों के समान आँसू बहाकर तूने अपने शोक को हलका किया है और भाई दुःशासन के वक्षःस्थल को विदीर्ण करने में तू साक्षी रहा है, यही दुष्ट नृपति, तेरे जीवित रहने का कारण था। ।33।।

दुर्योधन– हे दुरात्मन्! भरतकुलकलंक! नीच पाण्डव! मैं तुम्हारे समान आत्मप्रशंसा करने में निपुण नहीं हूँ, किन्तु–

तेरे बन्धु लोग रणभूमि में मेरी गदा से विदीर्ण हुए, वक्षःस्थल की हड्डियों की माला से भयानकरूप से सजे हुए, तुझे शीघ्र ही सोया हुआ देखेंगे। ।34।।

शब्दार्थ– निवारयन्–रोकते हुए, प्रसीद–प्रसन्न होइए, अत्र–इस विषय में, विशसेयम्–मार चुकना, युष्मत्–तुम्हारे, कुंजर–हाथी, स्त्रीवत्–स्त्री के समान, परित्याजितः–परित्याग दिया, हलका कर दिया, विघटने–विदीर्ण करने में।

(अन्वय– बान्धवाः त्वाम् रणांगणे मत्–गदा–भिन्न–वक्षः–अस्थि–वेणिका–भीम–भूषणम् न–चिरात् सुप्तम् द्रक्ष्यन्ति।।34।।)

भीमः– (विहस्य) **यद्येवं श्रद्धत्ते भवांस्तदा प्रत्यासन्नमेव कथयामि।**

पीनाभ्यां मद्भुजाभ्यां भ्रमितगुरुगदाऽऽघातसंचूर्णितोरोः
क्रूरस्याधाय पादं तव शिरसि नृणां पश्यतां श्वः प्रभाते।
त्वन्मुख्यभ्रातृचक्रोद्दलनगलदसृक्चन्दनेनाऽऽनखाग्रं
स्त्यानेनार्द्रेण चाऽऽक्तः स्वयमनुभविता भूषणं भीममस्मि।

(अन्वय– श्वः प्रभाते नृणाम् पश्यताम्, पीनाभ्याम् मत् भुजाभ्याम् भ्रमित–गुरु–गदा–आघात–संचूर्णित–उरोः क्रूरस्य तव शिरसि पादम् आधाय, स्त्यानेन आर्द्रेण च त्वत् मुख्य–भ्रातृ–चक्र–उद्दलन–गलत्–असृक्–चन्दनेन आनखाग्रम् च आक्तः स्वयम् भीमम् भूषणम् अनुभविता अस्मि।।35।।)

(नेपथ्ये)

भो भो भीमसेनार्जुनौ! एष खलु निहताशेषाऽरातिचक्र आक्रान्त–परशुरामाऽभिरामयशाः, प्रतापतपितदिङ्मण्डलः स्थापितस्वजनः श्रीमान्–जातशत्रुर्देवो युधिष्ठिरः समाज्ञापयति।

उभौ– किमाज्ञापयत्यार्यः?

(पुनर्नेपथ्ये)

कुर्वन्त्वाप्ता हतानां रणशिरसि जना वह्निसाद्देहभारा–
नश्रून्मिश्रं कथंचिद्ददतु जलममी बान्धवा बान्धवेभ्यः।
मार्गन्तां ज्ञातिदेहान्हतनरगहने खण्डितान्गृध्रकंकै–
रस्तं भास्वान्प्रयातः सह रिपुभिरयं संह्रियन्तां बलानि।।

(अन्वय– आप्ताः जनाः रण–शिरसि हतानाम् देहभारान् वह्निसात् कुर्वन्तु, अमी बान्धवाः बान्धवेभ्यः अश्रून् मिश्रम् जलम् कथंचित् ददतु गृध्र–कंकैः खण्डितान् ज्ञाति–देहान् हत–नर–गहने मार्गन्ताम्, अयम् भास्वान् रिपुभिः सह अस्तम् प्रयातः, बलानि संह्रियन्ताम्।।36।।)

उभौ– यदाज्ञापयत्यार्यः। (इति निष्क्रान्तौ)

भीमः– (हँसकर) यदि तुम्हारी ऐसी श्रद्धा है, तो शीघ्र ही जो होने जा रहा है, वह तुम्हें कहता हूँ–

कल प्रातःकाल में ही लोगों के देखते–देखते, मेरी पुष्ट भुजाओं द्वारा घुमायी गयी भारी गदा के आघात से चकनाचूर हुई, जँघाओं वाले, क्रूर तेरे सिर पर पैर रखकर, जिन सौ भाइयों के समूह में अकेला तू ही शेष रह गया है, ऐसे घने तथा गीले, टपक रहे तेरे, रुधिररूप चन्दन से, नाखूनों के अग्रभाग तक घुसेड़कर, रक्त से सना हुआ, मैं स्वयं भयंकर आभूषण पहनने का अनुभव कर रहा हूँ।।35।।

(नेपथ्य में)

अरे! अरे! भीम और अर्जुन! निश्चय ही, इस समस्त शत्रु–समूह को मारकर, परशुराम के समान मनोरम यश से अभिभूत, अपने पराक्रम से सभी दिशाओं के समूह को अत्यधिक तप्त करने वाले, अपने जनों को स्थापित करने वाले, अजातशत्रु श्रीमान् महाराज युधिष्ठिर आदेश प्रदान कर रहे हैं कि–

दोनों– आर्य, क्या आज्ञा दे रहे हैं?

(फिर नेपथ्य में)

सम्मानीय लोग युद्धभूमि में मारे गए, व्यक्तियों के शवों का अग्नि संस्कार करें और ये बन्धु, मृत बान्धव–जनों को किसीप्रकार अश्रुमिश्रित जलांजलि प्रदान करें। गृध्र तथा कंक पक्षियों द्वारा टुकड़े किए गए, मारे गए लोगों के शरीरों को ढ़ेर में खोज लेवें, क्योंकि अब यह सूर्य भगवान् शत्रुओं के अन्त के साथ–साथ, स्वयं भी अस्त हो रहा है। इसलिए रणक्षेत्र से सेनाओं को वापस लौटा लिया जाए।।36।।

दोनों– आर्य की जैसी आज्ञा।

(यह कहकर दोनों निकल जाते हैं)

(नेपथ्ये)

अरे रे गाण्डीवाकर्षणबाहुशालिन्! अर्जुन! अर्जुन! क्वेदानीं गम्यते?

कर्णक्रोधेन युष्मद्विजयि धनुरिदं त्यक्तमेतान्यहानि,
प्रौढं विक्रान्तमासीद्वन इव भवतां शूरशून्ये रणेऽस्मिन्
स्पर्शं स्मृत्वोत्तमांगे पितुरनवजितन्यस्तहेतेरुपेतः
कल्पाग्निः पाण्डवानां द्रुपदसुतचमूघस्मरो द्रौणिरस्मि।।

(अन्वय— युष्मत् विजयि इदम् धनुः कर्ण—क्रोधेन एतानि अहानि त्यक्तम्, अस्मिन् शूर—शून्ये वने इव रणे भवताम् प्रौढ़म् विक्रान्तम् आसीत्, अनवजित—न्यस्त—हेतेः पितुः उत्तमांगे स्पर्शम् स्मृत्वा, पाण्डवानाम् कल्प—अग्निः द्रुपद—सुत—चमू—घस्मरः द्रौणिः उपेतः अस्मि।।37।।)

धृतराष्ट्रः— (आकर्ण्य सहर्षम्) वत्स दुर्योधन! द्रोणवधपरिभवोद्दीपितक्रोधपावकः पितुरपि समधिकबलः, शिक्षावानमरोपमश्चायमश्वत्थामा प्राप्तः। तत्प्रत्युपगमनेन तावदयं सम्भाव्यतां वीरः।

गान्धारी— जात! प्रत्युद्गच्छैनं महाभागम्।[1]

दुर्योधन— तात! अम्ब! किमनेनांगराजवधाऽऽशंसिना वृथायौवनशस्त्रबलभरेण?।

धृतराष्ट्रः— वत्स! न खल्वस्मिन्काले पराक्रमवतामेवं विधानां वाङ्मात्रेणापि विरागमुत्पादयितुमर्हसि।

(प्रविश्य)

अश्वत्थामाः— विजयतां कौरवाऽधिपतिः।

दुर्योधनः— (उत्थाय) गुरुपुत्र! इत आस्यताम्। (इत्युपवेशयति)

अश्वत्थामा— (सास्रम्) राजन्दुर्योधन!

कर्णेन कर्णसुभगं बहु यत्तदुक्त्वा
यत्संगरेषु विहितं विदितं त्वया तत्।
द्रौणिस्त्वधिज्यधनुरापतितोऽभ्यमित्र—
मेषोऽधुना त्यज नृप! प्रतिकारचिन्ताम्।।38।।

---

1. जाद! पच्चुग्गच्छ एदं महाभाअम्।

(नेपथ्य में)

अरे! रे! गाण्डीव धनुष को खींचने में प्रसिद्ध बाहुबली अर्जुन! अर्जुन! इस समय तू कहाँ जा रहा है?

तुम लोगों पर विजय प्राप्त करने वाला, यह धनुष कर्ण पर क्रुद्ध मैंने इतने दिनों तक त्याग रखा था, वीरों से शून्य, वन के समान इस युद्धभूमि में तुम्हारा प्रबल पौरुष था। अपराजित एवं अस्त्र का त्याग करने वाले पिताजी के सिर पर किए गए स्पर्श को स्मरण करके, पाण्डवों की प्रलयाग्नि के समान, द्रुपद के पुत्र धृष्टद्युम्न की सेना का विनाश करने वाला, यह मैं द्रोणपुत्र आ गया हूँ।।37।।

धृतराष्ट्र– (सुनकर हर्षपूर्वक) पुत्र, दुर्योधन! द्रोण के वधरूपी अपमान से उत्तेजित, क्रोधरूपी अग्नि वाले, अपने पिता से भी अधिक शक्तिशाली, धनुर्वेद का ज्ञाता, देवता के समान, यह अश्वत्थामा आ गया है। इसलिए इस वीर की अगवानी करके स्वागत करो।

गान्धारी– पुत्र! इस महाभाग का आगे बढ़कर स्वागत करो।

दुर्योधन– पिताश्री! माताजी! अंगराज का वध चाहने वाले, व्यर्थ ही यौवन एवं शस्त्रबल का बोझ ढ़ोने वाले, इस व्यक्ति से क्या लाभ?

धृतराष्ट्र– पुत्र! वस्तुतः ऐसे समय में इसप्रकार के पराक्रम शालियों में कटु वचनों द्वारा विरक्ति उत्पन्न करना उचित नहीं है।

(प्रवेश करके)

अश्वत्थामा– कौरवराज की विजय हो।

दुर्योधन– (उठकर) हे गुरुपुत्र! इधर बैठो।

(यह कहकर बैठाता है)

अश्वत्थामा– (अश्रुपूर्वक) राजन्, दुर्योधन!

कर्ण ने कानों को मधुर लगने वाली, बहुत सी बातों को कहकर, युद्ध में जो किया, वह तो आपको पता ही है। धनुष खींचकर यह अश्वत्थामा शत्रुओं के समक्ष अब आ गया है, हे राजन्! इसलिए इस समय शत्रुओं से बदला लेने की चिन्ता को छोड़ दो।। 38।।

(अन्वय– कर्णेन यत् कर्ण–सुभगम् तत् बहु उक्त्वा, यत् संगरे विहितम्, तत् त्वया विदितम्, एषः द्रौणिः तु अधिज्य–धनुः अभ्यमित्रम् आपतितः, नृप! अधुना प्रतिकार–चिन्ताम् त्यज।।38।।)

दुर्योधनः– (साभ्यसूयम्) **आचार्यपुत्र!**

अवसानेऽंगराजस्य योद्धव्यं भवता किल।
ममाऽत्यन्तं प्रतीक्षस्व, कः कर्णः कः सुयोधनः?।।39।।

(अन्वय– अंगराजस्य अवसाने किल भवता योद्धव्यम्, मम अति अन्तम् प्रतीक्षस्व, कः कर्णः? कः सुयोधनः?।।39।।)

अश्त्थामाः– (स्वगतम्) **कथमद्यापि स एव कर्णापक्षपातोऽस्मासु च परिभवः।** (प्रकाशम्) **राजन्कौरवेश्वर! एवं भवतु।**

(इति निष्क्रान्तः)

धृतराष्ट्रः– वत्स! क एष ते व्यामोहो यदस्मिन्नपि काले एवं विधस्य महाभागस्याश्वत्थाम्नो वाक्पारुष्येणाऽपरागमुत्पादयसि?।

दुर्योधनः– किमस्याऽप्रियमनृतं च मयोक्तम्?। किं वा नेदं क्रोधस्थानम्?। पश्य –

अकलितमहिमानं क्षत्रियैरात्तचापैः
समरशिरसि युष्मद्भाग्यदोषाद्विपन्नम्।
परिवदति समक्षं मित्रमंगाधिराजं
मम खलु कथयास्मिन्को विशेषोऽर्जुने वा।।40।।

(अन्वय– आत्त–चापैः क्षत्रियैः अकलित–महिमानम् युष्मत्–भाग्य–दोषात् समर–शिरसि विपन्नम्, मित्रम् अंगाधिराजम् मम समक्षम् परिवदति, अस्मिन् अर्जुने वा कः विशेषः खलु कथय।।40।।)

धृतराष्ट्रः– अथवा वत्स! तवापि कोऽत्र दोषः। अवसानमिदानीं भरतकुलस्य। संजय! किमिदानीं करोमि मन्दभाग्यः?। (विचिन्त्य) **भवत्वेवं तावत्। संजय! मद्वचनाद् ब्रूहि भारद्वाजमश्वत्थामानम्।–**

स्मरति न भवान्पीतं स्तन्यं विभज्य सहाऽमुना,
मम च मृदितं क्षौमं बाल्ये त्वदंगविवर्तनैः।

दुर्योधन– (ईर्ष्यापूर्वक) आचार्य पुत्र!

अंगराज कर्ण के मारे जाने के बाद ही, यदि आपको युद्ध करना अभीष्ट था, तब तो अब मेरे अन्त की भी प्रतीक्षा कीजिए, क्योंकि मेरे लिए क्या कर्ण? और क्या दुर्योधन?।।39।।

अश्त्थामा– (मन में) क्या आज भी यह कर्ण के प्रति पक्षपाती है और हम लोगों का तिरस्कार? (प्रकट में) राजन्! कौरवेश्वर! तो फिर ऐसा ही होवे। (यह कहकर निकल जाता है)

धृतराष्ट्र– पुत्र! यह तुम्हारा कैसा व्यामोह है? जो इस समय में भी महानुभाव अश्वत्थामा का कठोर वचनों से तिरस्कार कर उसमें विराग भाव उत्पन्न कर रहे हो।

दुर्योधन– मैंने इसका अप्रिय अथवा असत्य क्या कह दिया है? अथवा क्या यह क्रोध का स्थान नहीं है? देखिए–

धनुष खींचे हुए क्षत्रिय भी जिसकी महिमा को नहीं समझ सके, आप सबके दुर्भाग्य से युद्धक्षेत्र में मारे गए, ऐसे मित्र अंगराज कर्ण की मेरे सामने ही निन्दा कर रहा है, इसलिए मुझे इस अश्वत्थामा अथवा अर्जुन में कोई विशेष अन्तर दिखायी नहीं दे रहा है, जरा आप ही कहिए।।40।।

धृतराष्ट्र– अथवा तुम्हारा भी इस विषय में क्या दोष? इस समय तो भरतकुल का अवसान ही आ गया है। संजय! मन्दभागी मैं अब क्या करूँ? (विचारकर) ठीक है, ऐसा ही होवे। संजय! मेरे आदेश से भारद्वाज गोत्र में उत्पन्न अश्वत्थामा से कहो–

बाल्यावस्था में इसके साथ बाँटकर पिए गए माता के दूध का क्या आप स्मरण कर रहे हैं? एवं अपने शरीर के लोटपोट करने पर हमारे रेशमी वस्त्रों को रौंदकर, मलिन करने वाली बातों को भी (आप नहीं स्मरण कर रहे हैं?) **इस कारण भाइयों के मारे जाने से, बढ़े हुए शोक से अत्यधिक प्रेम से विरुद्ध वचन बोलने वाले, इस दुर्योधन पर तुम्हें अधिक समय तक क्रोध नहीं करना चाहिए।।41।।**

अनुजनिधनस्फीताच्छोकादतिप्रणयाच्च यद्
विकृतवचने माऽस्मिन्क्रोधश्चिरं क्रियतां त्वया।।41।।

(अन्वय– बाल्ये अमुना सह विभज्य पीतम् स्तन्यम् भवान् न स्मरति? त्वत् अंग–विवर्तनैः मृदितम् मम क्षौमम् च (न स्मरति?) यत् अनुज–निधन–स्फीतात् शोकात्, अतिप्रणयात् च, विकृत–वचने अस्मिन् त्वया चिरम् क्रोधः मा क्रियताम्।।41।।)

संजयः– यदाज्ञापयति तातः। (इत्युत्तिष्ठति)

धृतराष्ट्रः– अपि चेदमन्मत्त्वया वक्तव्यम्–

यन्मोचितस्तव पिता वितथेन शस्त्रं
यत्तादृशः परिभवः स तथाविधोऽभूत्।
एतद्विचिन्त्य बलमात्मनि पौरुषं च
दुर्योधनोक्तमपहाय विधास्यतीति ।।42।।

(अन्वय– यत् तव पिता वितथेन शस्त्रम् मोचितः, यत् तादृशः सः तथाविधः परिभवः अभूत्, एतत् विचिन्त्य आत्मनि पौरुषम् बलम् च (विचिन्त्य) दुर्योधन–उक्तम् अपहाय विधास्यति, इति।।42।।)

संजयः– यदाज्ञापयति तातः।

(इति निष्क्रान्तः)

दुर्योधनः– सूत! सांग्रामिकं मे रथमुपकल्पय।

सूतः– यदाज्ञापयत्यायुष्मान्।

(इति निष्क्रान्तः)

धृतराष्ट्रः– गान्धारि! इतो वयं मद्राधिपतेः शल्यस्य शिविरमेव गच्छावः। वत्स! त्वमप्येवं कुरु।

(इति परिक्रम्य निष्क्रान्ताः सर्वे)

॥ इति पंचमोऽङ्कः ॥

संजय– जैसी पिताश्री की आज्ञा।

(यह कहकर उठता है)

धृतराष्ट्र– अभी तुम्हें और कुछ भी कह देना चाहिए–

जो तुम्हारे पिता द्रोण ने, युधिष्ठिर के असत्य–भाषण से शस्त्र का परित्याग किया था और जो उसप्रकार लोकप्रसिद्ध तुम्हारे पिता का वैसा अपमान हुआ, यह विचार कर तथा अपने इस पौरुषबल के विषय में चिन्तन करके, दुर्योधन की बात को भुलाकर, जो भी तुम्हें उचित प्रतीत हो, वह करना चाहिए।।42।।

संजय– पिताश्री की जैसी आज्ञा।

(यह कहकर निकल जाता है)

दुर्योधन– सूत! मेरा युद्ध–सम्बन्धी रथ तैयार करो।

सूत– आयुष्मान् की जैसी आज्ञा।

(यह कहकर निकल जाता है)

धृतराष्ट्र– गान्धारि! यहाँ से हम लोग मद्रराज शल्य के शिविर में ही चलते हैं। पुत्र! दुर्योधन, तुम भी ऐसा ही करो।

(ऐसा कहकर घूमकर सभी निकल जाते हैं)

॥ इसप्रकार महाकवि भट्टनारायण विरचित वेणीसंहार के पंचम अङ्क का डॉ. राकेश शास्त्री, बाँसवाड़ा द्वारा किया हुआ हिन्दी अनुवाद पूर्ण हुआ॥

।। श्रीः ।।

अथ षष्ठोऽङ्कः

(ततः प्रविशत्यासनस्थो युधिष्ठिरो द्रौपदी, चेटी पुरुषश्च)

युधिष्ठिरः– विचिन्त्य निःश्वस्य च कष्टं भोः, कष्टम्–

तीर्णे भीष्ममहोदधौ कथमपि द्रोणानले निर्वृते
कर्णाऽऽशीविषभोगिनि प्रशमिते शल्ये च याते दिवम्।
भीमेन प्रियसाहसेन रभसात्स्वल्पावशेषे जये
सर्वे जीवितसंशयं वयममी वाचा समरोपिताः।।1।।

(अन्वय– भीष्म–महोदधौ तीर्णे, द्रोण–अनले कथम् अपि निर्वृते, कर्ण–आशी–विष–भोगिनि प्रशमिते, शल्ये च दिवम् याते, जये स्वल्प–अवशेषे, प्रिय–साहसेन भीमेन रभसात्, अमी सर्वे वयम् वाचाः जीवित–संशयम् समरोपिताः।।1।।)

द्रौपदी– (सबाष्पम्) भणिदम्?महाराज! पांचाल्येति किं न भणितम्?[1]

युधिष्ठिरः– कृष्णे! ननु मया।(पुरुषमवलोक्य) बुधक!

पुरुषः– देव! आज्ञापय।

युधिष्ठिरः– उच्यतां सहदेवः– 'क्रुद्धस्य वृकोदरस्याऽपर्युषितां प्रतिज्ञामुपलभ्य प्रनष्टस्य मानिनः कौरवराजस्य पदवीमन्वेष्टुमतिनिपुण–मतयस्तेषु तेषु स्थानेषु यथार्थाऽभिज्ञाश्चराः, सुसचिवाश्च भक्तिमन्तः पटुपटहरवव्यक्तघोषणाः सुयोधनपदसंचारवेदिनः प्रतिश्रुतधनपूजाप्रत्यु–पक्रियाश्चरन्तु समन्तात्समन्तपंचकम्।

अपि च –

---

[1]. महाराज! पंचालिए त्ति किं ण

।। श्रीः।।

अथ षष्ठ अङ्क

(उसके बाद आसन पर स्थित युधिष्ठिर, द्रौपदी, चेटी एवं पुरुष प्रवेश करते हैं)

युधिष्ठिर–(सोचकर लम्बा श्वास लेकर) कष्ट है, अरे! कष्ट है।

भीष्मरूपी महासागर को पार करके, द्रोणाचार्य के क्रोधरूपी अनल के किसी प्रकार शान्त होने पर, कर्णरूपी काले नाग के परलोक सिधारने पर और मद्र के राजा शल्य के मारे जाने पर, विजय के स्वल्पमात्र शेष रहने पर, साहसी प्रिय भीम द्वारा, शीघ्रतापूर्वक (दुर्योधन के साथ युद्ध में फँसकर) **हम सभी के जीवन, अपनी वाणी से संशय में समारोपित कर दिए गए हैं।।1।।**

द्रौपदी– (अश्रुपूर्वक) महाराज! **पांचाली** ने यह क्यों नहीं कहते हैं?

युधिष्ठिर– कृष्णे! वास्तव में मैंने (पुरुष को देखकर) अरे बुधक!

पुरुष– महाराज! आज्ञा दीजिए।

युधिष्ठिर– सहदेव से कहो कि– 'क्रुद्ध वृकोदर की आज प्रतिज्ञा पूरी होने का समाचार जानकर, नष्ट हुए अहंकार वाले, छिपे हुए कौरवराज के पद–चिह्नों को खोजने हेतु, अत्यधिक मेधावी, उन सभी स्थानों का वास्तविक ज्ञान रखने वाले, गुप्तचर, स्पष्ट दुन्दुभि की घोषणा करने वाले, दुर्योधन के पद–चिह्नों के ज्ञाता, श्रेष्ठ सचिव एवं हमारे अनुरागी लोग, बड़े–बड़े पुरस्कारों की घोषणाएँ सुनकर **समन्त पंचक** के चारों ओर चले जाएँ,

और भी–

पंके वा सैकते वा सुनिभृतपदवीवेदिनो यान्तु दाशाः
कक्षेषु क्षुण्णवीरुन्निचयपरिचया वल्लवाः संचरन्तु।
नागव्याघ्राटवीषु श्वपचपुरविदो ये च रन्ध्रेष्वभिज्ञाः
ये सिद्धव्यंजना वा प्रतिमुनिनिलयं ते च चाराश्चरन्तु।।2

(अन्वय– सुनिभृत–पदवी–वेदिनः दाशाः पंके वा, सैकते वा यान्तु क्षुण्ण–वीरुत्–निचय–परिचयाः वल्लवाः कक्षेषु च संचरन्तु, नाग–व्याघ्र-अटवीषु श्व–पच–पुर–विदः ये च रन्ध्रेषु अभिज्ञाः, ये वा सिद्ध–व्यंजनाः ते चाराः प्रति–मुनि–निलयम् चरन्तु।।2।।)

पुरुषः– यथाऽऽज्ञापयति देवः।

युधिष्ठिरः– तिष्ठ! एवं च वक्तव्यः सहदेवः।

ज्ञेया रहः शंकितमालपन्तः
सुप्ता रुगार्ता मदिराविधेयाः।
त्रासो मृगाणां, वयसां विरावो
नृपांकपादप्रतिमाश्च यत्र।।3।।

(अन्वय– रहः शंकितम् आलपन्तः ज्ञेयाः, सुप्ताः, रुगार्ताः, मदिराः विधेयाः च (ज्ञेयाः) यत्र मृगाणाम् त्रासः, वयसाम् विरावः, नृप–अंक–पाद–प्रतिमाः च (सन्ति, तत्र अपि ज्ञेयाः) ।।3।।)

पुरुषः– यदाज्ञापयति देवः। (इति निष्क्रम्य पुनः प्रविश्य सहर्षम्) देव! पांचालकः प्राप्तः।

युधिष्ठिरः– त्वरितं प्रवेशय।

पुरुषः– (निष्क्रम्य, पांचालकेन सह प्रविश्य) एष देवः उपसर्पतु पांचालकः।

पांचालकः– जयतु जयतु देवः। प्रियमावेदयामि महाराजाय देव्यै च।

युधिष्ठिरः– भद्र पांचालक! कंचिदासादिता तस्य दुरात्मनः कौरवाधमस्य पदवी?

पांचालकः– देव! न केवलं पदवी, स एव दुरात्मा देवीकेश-पाशस्पर्शपातकप्रधानहेतुरुपलब्धः।

अत्यन्त गुप्त चिह्नों के ज्ञाता? धीवर, कीचड़ अथवा बालू में ढूँढ़ने के लिए जावें, पैरों से रोंदी गयी लताओं से सुपरिचित ग्वाले, झाड़ियों तथा झुरमुटों में अन्वेषण करें, हाथी एवं व्याघ्र आदि से युक्त वनों में, चाण्डालों की बस्तियों के जानकर जावें। इसके अलावा जो लोग गुफाओं अथवा सुरंगों का ज्ञान रखते हैं या फिर सिद्ध पुरुषों का वेष धारण करने में निपुण हैं, वे गुप्तचर, प्रत्येक मुनि के आश्रम पर जाकर उसे खोजें।।2।।

पुरुष– महाराज की जैसी आज्ञा।

युधिष्ठिर– ठहरो! और सहदेव को यह भी कहना है कि

एकान्त में शंकित होकर बातचीत कर रहे, शयन कर रहे, रोग से पीड़ित और मदिरा से मतवाले लोगों की भी जानकारी प्राप्त करें। इसके अतिरिक्त जहाँ पर पशु भयभीत हो रहे हों, जहाँ पर पक्षियों का कोलाहल हो रहा हो, जहाँ राजा दुर्योधन के पैरों के निशान दिखायी दे रहे हों, (वहाँ पर भी उसे अवश्य ढूँढ़ें)।।3।।

पुरुष– जैसी महाराज की आज्ञा।

(ऐसा कहकर, फिर से प्रवेश करके प्रसन्नतापूर्वक)

महाराज! पांचालराज के पुत्र धृष्टद्युम्न आए हैं।

युधिष्ठिर– शीघ्र ही प्रवेश कराओ।

पुरुष– (निकलकर धृष्टद्युम्न के साथ प्रवेश करके) ये महाराज हैं। हे पांचालक! आप पास जाइए।

पांचालक– महाराज की जय हो, जय हो। महाराज एवं देवी के लिए प्रिय समाचार निवेदन कर रहा हूँ।

युधिष्ठिर– भाई पांचालक! क्या उस दुरात्मा, कौरवाधम, दुर्योधन के पैरों के चिह्न प्राप्त हो गए है?

पांचालक– महाराज! न केवल पद–चिह्न, अपितु देवी के केशपाश के स्पर्शरूपी पाप का मुख्य कारण, वह दुष्ट दुर्योधन भी मिल गया है।

युधिष्ठिरः– (सहर्ष पांचालकं परिष्वज्य) साधु, भद्र! साधु! भवता प्रियमावेदितम्। अथ दर्शनगोचरं गतः?

पांचालकः– देव! समरगोचरं पृच्छ।

द्रौपदी– (सभयम्) कथं समरगोचरो वर्तते मे नाथः?[1]

युधिष्ठिरः– (साशंकम्) सत्यं समरगोचरो मे वत्सः?

पांचालकः– सत्यम्। किमन्यथा वक्ष्यते महाराजाय?

युधिष्ठिरः–

त्रस्तं विनापि विषयादुरुविक्रमस्य
चेतो विवेकपरिमन्थरतां प्रयाति।
जानामि चोद्यतगदस्य वृकोदरस्य
सारं रणेषु भुजयोः, परिशंकितश्च ।।4।।

(अन्वय– विषयात् विना अपि उरु–विक्रमस्य चेतः त्रस्तम्, विवेक–परि–मन्थरताम् प्रयाति, रणेषु उद्यत–गदस्य वृकोदरस्य भुजयोः सारम् जानामि च परिशंकितः च (अस्मि)।।4।।)

(द्रौपदीमवलोक्य) अयि सुक्षत्रिये!

गुरूणां बन्धूनां क्षितिपतिसहस्रस्य च पुरः
पुराऽभूदस्माकं नृपसदसि योऽयं परिभवः।
प्रिये! प्रायस्तस्य द्वितयमपि पारं गमयति
क्षयः प्राणानां नः कुरुपतिपशोर्वाऽद्य निधनम्।।5।।

(अन्वय– प्रिये! गुरूणाम् बन्धूनाम् क्षिति–पति–सहस्रस्य च पुरः पुरा नृप–सदसि, यः अयम् अस्माकम् परिभवः अभूत्, तस्य पारम् अद्य प्रायः द्वितयम् अपि गमयति, नः प्राणानाम् क्षयः, (तस्य) कुरुपति–पशोः निधनम् वा ।।5।।)

अथवा कृतं संदेहेन।

नूनं तेनाऽद्य वीरेण प्रतिज्ञाभंगभीरुणा।
बध्यते केशपाशस्ते, स चास्याकर्षणक्षमः।।6।।

---

[1]. कहं समरगोअरो वट्टइ मे णाहो?

युधिष्ठिर– (प्रसन्नतापूर्वक पांचालक का आलिंगन करके) साधु, भद्र! साधु। आपने प्रिय समाचार कहा है। क्या वह दिखायी भी पड़ गया है?

पांचालक– महाराज! युद्ध में दिखायी देने की बात पूछिए।

द्रौपदी– (भयपूर्वक) क्या मेरे स्वामी युद्ध में दिखायी दे रहे हैं?

युधिष्ठिर– (आशंकापूर्वक) क्या मेरा भाई भीम वास्तव में युद्धभूमि में विद्यमान है?

पांचालक– निश्चय ही, यह सत्य है, आपके लिए असत्य भला कैसे कहा जा सकता है?

युधिष्ठिर– विषय के अभाव में भी प्रबल पराक्रमी व्यक्ति का चित्त, त्रस्त होते हुए, चिन्तन करने में शिथिलता को प्राप्त हो जाता है। युद्धभूमि में गदा उठाए हुए, वृकोदर की भुजाओं के पराक्रम को मैं जानता हूँ, किन्तु फिर भी अत्यन्त शंकित हूँ।।4।।

(द्रौपदी को देखकर) अयि! सुक्षत्रिये!

प्रिये! द्रोण आदि गुरुजनों, बन्धुओं एवं हजारों राजाओं के सामने, पूर्व में राजसभा में, जो हमारा यह तिरस्कार हुआ था, उसके पार जाने के आज केवल दो ही मार्ग जाते हैं, पहला– **हमारे प्राणों का विनाश, अथवा** दूसरा– **उस नीच कुरुपति का निधन।।5।।**

अथवा सन्देह करने से बस करो,

आज प्रतिज्ञा भंग होने के भय से डरे हुए, उस वीर वृकोदर द्वारा तुम्हारा केशपाश निश्चय ही, बाँध दिया जाएगा और इन केशों को खींचने का दुःसाहस करने वाला, वह दुर्योधन मारा जाएगा।।6।।

शब्दार्थ– आवेदितम्–कहा है, निवेदन किया है, पृच्छ–पूछो, प्रयाति–प्राप्त होता है, जाता है, चेतः–मन, सारम्–पराक्रम को, क्षितिपति–राजा, पुरः–सामने, नृपसदसि–राजसभा में, अस्माकम्–हमारे, अभूत्–हुआ, अद्य–आज, कृतम्–बस, नूनम्–निश्चय ही, बध्यते–बाँधा जा रहा है, प्रतिज्ञाभंगभीरुणा–प्रतिज्ञा के भंग होने से डरे हुए के द्वारा।

(अन्वय– अद्य प्रतिज्ञा–भंग–भीरुणा तेन वीरेण ते केश–पाश: नूनम् बध्यते, अस्य आकर्षण–क्षमः सः च (बध्यते) ।।6।।)

पांचालक! कथय, कथय, कथमुपलब्धः, स दुरात्मा कस्मिन्नुद्देशे किं वाऽधुना प्रवृत्तमिति?।

द्रौपदी– भद्र! कथय कथय।[1]

पांचालकः– शृणोतु देवो देवी च। अस्तीह देवेन हते मद्राऽधिपतौ शल्ये, गान्धारराजकुलशलभे सहदेवशस्त्रानलप्रविष्टे, सेनापतिनिधन-निराक्रन्दविरलयोधोज्झितासु समरभूमिषु, रिपुबलपराजयोद्धतवेल्लित-विचित्रपराक्रमाऽऽसादितविमुखाऽरातिचक्रासु धृष्टद्युम्नाधिष्ठितासु च युष्मत्सेनासु, प्रनष्टेषु कृपकृतवर्माश्वत्थामासु तथा दारुणामपर्युषितां प्रतिज्ञामुपलभ्य कुमारवृकोदरस्य, न ज्ञायते क्वाऽपि प्रलीनः स दुरात्मा कौरवाऽधमः।

युधिष्ठिरः– ततस्ततः?

द्रौपदी– अयि! परतः कथय।[2]

पांचालकः– अवधत्तां देवो देवी च। ततश्च भगवता वायुदेवेना-धितिष्ठतमेकरथमारूढौ कुमारभीमार्जुनौ समन्तात् समन्तपंचकं पर्यटितु-मारब्धौ, तमनासादितवन्तौ च। अनन्तरं च दैवमनुशोचति मादृशे भृत्यवर्गे, दीर्घमुष्णं च निःश्वसति कुमारबीभत्सौ जलधरसमयनिशासंचारिखद्योत-प्रकरपिंगलैः कटाक्षैरादीपयति गदां नाथे वृकोदरे, यत् किंचनकारिता-मधिक्षिपति विधेर्भगवति नारायणे, कश्चित्संविदितः कुमारस्य मारुते-रुज्झितमांसभारः, प्रत्यग्रविशसितमृगलोहितचरणानिवसनस्त्वरमाणोऽन्ति-कमुपेत्य पुरुषः, परुषश्वासग्रस्तार्द्धश्रुतवर्णाऽनुमेयपदया वाचा कथितवान्-देव कुमार! 'अस्मिन्महतोऽस्य सरसस्तीरे द्वे पदपद्धती समवतीर्ण-प्रतिबिम्बे। तयोरेका स्थलमुत्तीर्णा, न द्वितीया। परत्र कुमारः प्रमाणं मिति।

---

[1]. भद्द! कहेहि कहेहि।

[2]. अयि! परदो कहेहि।

पांचालक! कहो, कहो, वह दुरात्मा भला किसप्रकार और किस स्थान पर मिला? अथवा इस समय वहाँ क्या हो रहा है?

द्रौपदी– भाई! कहो, कहो।

पांचालक– महाराज! और महारानी! सुनिए। इस युद्ध में महाराज द्वारा मद्रदेश के राजा शल्य के मारे जाने पर, गान्धार राजकुलरूपी शलभ के, सहदेव के शस्त्ररूपी अग्नि में प्रविष्ट हो जाने पर, सेनापति के निधन से अत्यधिक आक्रन्दन कर रहे, जहाँ–तहाँ योद्धाओं द्वारा युद्धभूमि को छोड़ देने पर, शत्रुओं की सेनाओं के पराजय से उद्धत, कुटिल गति से विचित्र प्रकार के पराक्रम को प्रदर्शित करने वाले, धृष्टद्युम्न के सेनापतित्व वाली, आपकी सेनाओं के माध्यम से युद्ध से विमुख हुए, शत्रु–समुदाय को वश में किए जाने पर कृपाचार्य, कृतवर्मा और अश्वत्थामा आदि वीरों से युक्त, सेनाओं के विनष्ट होने पर तथा कुमार वृकोदर की भयंकर प्रतिज्ञा के अपूर्ण रहने के कारण, न जाने वह दुरात्मा, कौरवाधम दुर्योधन न जाने कहाँ छिप गया?

युधिष्ठिर– उसके बाद, उसके बाद,

द्रौपदी– अरे! इसके बाद कहो।

पांचालक– महाराज और महारानी ध्यानपूर्वक सुनिए। उसे पश्चात् भगवान् वासुदेव से अधिष्ठित एक रथ पर विराजमान, कुमार भीम और अर्जुन **समन्तपंचक** के चारों ओर घूमने लगे, किन्तु उसे पा नहीं सके। तत्पश्चात् हमारे समान सेवकों के दैव के विषय में सोचने पर एवं कुमार अर्जुन द्वारा लम्बी तथा उष्ण निःश्वास छोड़ने पर, वर्षाकालीन रात्रि में घूमने वाले, जुगनुओं के समूह के समान, पिंगलवर्ण कटाक्षों द्वारा महाराज भीमसेन के गदा चमकाने पर, विधाता न जाने क्या करना चाहता है? इसप्रकार भगवान् नारायण द्वारा आक्षेप करने पर, किसी दुर्बल ताजे मारे गए, हरिण के रुधिर से सने हुए पाँव एवं वस्त्र वाले, जानकार व्यक्ति ने कठिन श्वास के कारण अस्पष्ट वाणी में, कुमार भीमसेन के पास शीघ्रतापूर्वक आकर कहा– 'देव कुमार! इस विशाल तालाब के इस किनारे पर दो पैरों के चिह्न दिखायी पड़ रहे हैं,

ततः ससंभ्रमं प्रस्थिताः सर्वे वयं तमेव पुरुषं पुरस्कृत्य गत्वा च सरस्तीरं, परिज्ञायमानसुयोधनपदलांछनां पदवीमासाद्य भगवता वासुदेवेनोक्तं– 'भो वीरवृकोदर! जानाति किल सुयोधनः सलिलस्तम्भनं विद्याम्। तन्नूनं तेन त्वद्भयात्सरसीमेनामधिशयितेन भवितव्यम्।'

एतच्च वचनमुपश्रुत्य रामाऽनुजस्य सकलदिङ्निकुंजप्रपूरिताऽतिरिक्तमुद्भ्रान्तसकलसलिलचारिचक्रं त्रासोद्धतनक्रग्राहम्, आलोडितं सरःसलिलम्। भैरवं च गर्जित्वा कुमारवृकोदरेणाऽभिहितम्– 'अरे रे वृथाप्रख्यापिताऽलीकपौरुषाऽभिमानिन्! पांचालराजतनयाकेशाम्बराऽऽकर्षणमहापातकिन्! धार्तराष्ट्राऽपसद!

जन्मेन्दोर्विमले कुले व्यपदिशस्यद्यापि धत्से गदां
मां दुःशासनकोष्णशोणितसुराक्षीबं रिपुं मन्यसे।
दर्पान्धो मधुकैटभद्विषि हरावप्युद्धतं चेष्टसे
मे त्रासान्नृपशो! विहाय समरं पंकेऽधुना लीयसे!।।7।।

(अन्वय– नृ–पशो! इन्दोः विमले कुले जन्म व्यपदिशसि, अद्य अपि गदाम् धत्से, माम् दुःशासन–कोष्ण–शोणित–सुरा–क्षीबम् रिपुम् मन्यसे, दर्प–अन्धः मधु–कैटभ–द्विषि हरौ अपि उद्धतम् चेष्टसे, अधुना मे त्रासात् समरम् विहाय पंके लीयसे!।।7।।)

अपि च भो मानाऽन्ध! कौरवाऽधम!

पांचाल्या मन्युवह्निः स्फुटमुपशमितप्राय एव प्रसह्य
व्यामुक्तैः केशपाशैर्हतपतिषु मया कौरवान्तःपुरेषु।
भ्रातुर्दुःशासनस्य स्रवदसृगुरसः पीयमानं निरीक्ष्य
क्रोधात्किं भीमसेने विहितमसमये यत्त्वयाऽस्तोऽभिमानः।

(अन्वय– मया कौरव–अन्तःपुरेषु प्रसह्य हत–पतिषु व्यामुक्तैः केशपाशैः पांचाल्याः, मन्यु–वह्निः स्फुटम्, उपशमित–प्रायः एव भ्रातुः दुःशासनस्य उरसः स्रवत् असृक् पीयमानम् (माम्) निरीक्ष्य, क्रोधात् भीमसेने त्वया किम् विहितम्? यत् असमये अभिमानः अस्तः।।8।।)

उन दोनों में एक जल में घुसने का तो है, किन्तु दूसरा निकलने का नहीं है। इससे अधिक इस विषय में कुमार ही प्रमाण हैं।

उसके पश्चात् घबराहट के साथ, हम सभी उस व्यक्ति को आगे करके चल दिए और तालाब के तट पर जाकर पहचानी हुई दुर्योधन के पैरों के चिह्नों वाली पंक्ति को पाकर भगवान् वासुदेव बोले–

'हे वीर वृकोदर! वस्तुतः सुयोधन **जलस्तम्भनी विद्या** को जानता है। इसलिए निश्चय ही, तुम्हारे भय से वह इस तालाब में जाकर सो गया होगा।' श्रीकृष्ण के इन वचनों को सुनकर, सभी दिशाओं को आपूरित कर देने से भी बढ़कर, सम्पूर्ण जलचर समूह को व्याकुल कर देने वाला, नक्र एवं मकर आदि को भयभीत कर देने वाला, भयंकर गर्जन करके, उसने तालाब के जल को आलोडित कर दिया और कहा– 'अरे, रे! व्यर्थ ही प्रसिद्धि पाने वाले, मिथ्या बलाभिमानी! पांचाल पुत्री द्रौपदी के केश एवं वस्त्रों को खींचने के महान् पाप को करने वाले! धृतराष्ट्र पुत्र, नीच दुर्योधन!

हे मनुष्यों में पशुतुल्य दुर्योधन! तू निर्मल चन्द्रवंश में अपने जन्म को कहता है, किन्तु फिर (सभी भाइयों के मारे जाने पर भी) **इस समय गदा धारण किए हुए है? दुःशासन के उष्ण रुधिररूपी मदिरा पान करने से मदमस्त, मुझे अपना शत्रु मान रहा है? अहंकार से अन्धा बना हुआ तू, मधु और कैटभ का विनाश करने वाले, श्रीकृष्ण के साथ भी उद्दण्डता करने की चेष्टा करता है, जबकि इस समय तू मेरे भय से युद्ध से भागकर, यहाँ कीचड़ में छिपकर बैठ गया है।।7।।**

और भी, हे अहंकार के अन्धे! कौरवाधम!

मैंने जिसप्रकार कौरवों के अन्तःपुर की मारे गए पतियों वाली, स्त्रियों में, बलपूर्वक खुले केशपाश वाली, द्रौपदी के क्रोधरूपी अग्नि को तो स्पष्टरूप से शान्त कर ही दिया है। अपने भाई दुःशासन के वक्षःस्थल से प्रवाहित होने वाले, रक्त को पीता हुआ मुझे देखकर, क्रोध से अपकारी मेरे साथ बदले में तूने क्या किया? जो असमय में ही तेरा अभिमान समाप्त हो गया है।।8।।

द्रौपदी– नाथ! अपनीतो मे मन्युर्यदि पुनरपि सुलभं दर्शनं भविष्यति।[1]

युधिष्ठिरः– कृष्णे! नाऽमंगलानि व्याहर्तुमर्हस्यस्मिन्काले। भद्र! ततस्ततः?।

पांचालकः– देव! ततश्चैवं भाषमाणेन वृकोदरेणाऽवतीर्य क्रोधोद्धतं भ्रमितगदापरिघपाणिना सहसैवोल्लंघिततीरमुत्सन्ननलिनीवनम्, अपविद्ध-मूर्च्छितग्राहम्, उद्भ्रान्तमत्स्यशकुन्तमतिभैरवभ्रमितवारिसंचयमायतमपि तत्सरः समन्तादालोडितम्।

युधिष्ठिरः– भद्र! तथापि किं नोत्थितः?

पांचालकः– देव! कथं नोत्थितः?

त्यक्त्वोत्थितः सरभसं सरसः स मूल–
मुद्भूतकोपदहनोग्रविषस्फुलिंगः।
आयस्तभीमभुजमन्दरवेल्लनाभिः
क्षीराम्बुधेः सुमथितादिव कालकूटः।।9।।

(अन्वय– सरसः मूलम् सरभसम् त्यक्त्वा, उद्भूत–कोप–दहन–उग्र–विष–स्फुलिंगः सः आयस्त–भीम–भुजमन्दर–वेल्लनाभिः सुमथितात् क्षीर–अम्बुधेः कालकूटः इव उत्थितः।।9।।)

युधिष्ठिर– साधु सुक्षत्रिय! साधु!

द्रौपदीः– प्रतिपन्नो समरो न वा?[2]

पांचालकः– उत्थाय च तस्मात्सलिलाशयात्करयुगलोत्तम्भित-तोरणीकृतभीमगदः कथयति स्म– अरे रे, मारुते! किं भयेन प्रलीनं दुर्योधनं मन्यते भवान्? मूढ! अनिहतपाण्डुपुत्रः प्रकाशम् लज्जमानो विश्रमितुमध्यवसितवानस्मि पातालम्।'

एवं चोक्तवति वासुदेवकिरीटिभ्यां द्वावप्यन्तःसलिलं निषिद्ध-समराऽऽरम्भौ स्थलमुत्तारितौ भीमसुयोधनौ। आसीनश्च कौरवराजः क्षितितले गदां निक्षिप्य विशीर्णरथसहस्रं निहतकुरुशतगजवाजिनर–

---

1. णाह! अवणीदो मे मण्णू जइ पुणो वि सुलहं दंसणं भविस्सदि।

2. पडिवराणो समरो ण वा?

द्रौपदी– स्वामी! यदि आपका दर्शन मुझे फिर से हो जाए, तो मेरा क्रोध दूर हो सकेगा।

युधिष्ठिर– हे कृष्णे! इस अवसर पर अमंगल कहना उचित नहीं है। भद्र! उसके बाद ।

पांचालक– महाराज! उसके बाद, इसप्रकार कहते हुए वृकोदर ने क्रोध से उद्धत परिघ के समान, गदा को घुमाते हुए, विशाल होते हुए भी सहसा उस तालाब को मथ डाला, जिसका जल, तट से बाहर तक उछल रहा था, उसके सभी कमलिनी–वन विनष्ट हो गए थे। मूर्च्छित होकर मकर आदि ग्राह, जिसके बाहर पड़े हुए थे। मछलियाँ एवं जल पक्षी जिसमें व्याकुल हो उठे थे, जिसमें अत्यधिक भयंकर भँवर और जलों का संचय था।

युधिष्ठिर– भद्र! क्या वह फिर भी नहीं उठा?

पांचालक– महाराज! क्यों नहीं उठा?

उस तालाब के तल को सहसा छोड़कर, क्रोधरूपी अग्नि से उग्र विष की चिंगारियाँ निकालता हुआ, वह दुर्योधन भीम के विशाल भुजारूपी मन्दराचल के मन्थनों से भलीप्रकार मथे जाते हुए, क्षीर–सागर के कालकूट विष के समान उठ खड़ा हुआ।।9।।

युधिष्ठिरः–साधु, सुक्षत्रिय! साधु।

द्रौपदी– उसके बाद युद्ध हुआ कि नहीं?

पांचालक– और उस जलाशय से उठकर, अपने दोनों हाथों को उठाकर, अपनी भयंकर गदा को तोरण के समान करते हुए, वह दुर्योधन कहने लगा– 'अरे, रे मरुत्पुत्र! क्या आप मुझ दुर्योधन को भय के कारण छिपा हुआ मान रहे हैं? मूर्ख! पाण्डुपुत्रों को मारने के अभाव में लज्जित होता हुआ मैं, पाताल में विश्राम करने के लिए चला गया था।

और उसके ऐसा कहने पर, वासुदेव और अर्जुन दोनों ने ही जल में युद्ध करने से रोककर, भीम और सुयोधन दोनों को ही स्थल पर उतार दिया। तब बैठा हुआ कौरवराज भूतल पर गदा को फैंककर, नष्ट हुए हजारों रथों, सैंकड़ों मारे हुए कौरवों एवं हजारों हाथी घोड़े

सहस्रकलेवरसम्मर्दसम्पतद्गृध्रकंकजम्बुकम्, उत्सन्नसुयोधनबलम्, अस्म-द्वीरमुक्तसिंहनादसवंलितसमरतूर्यम्, अकौरवं रणस्थानमवलोक्या-ऽऽयतमुष्णं च निःश्वसितवान्। ततश्च वृकोदरेणाभिहितम्– 'अयि भोः कौरवराजः! कृतं बन्धुनाशदर्शनमन्युना। मैवं विषादं कृथाः, पर्याप्ताः पाण्डवाः समराया– ऽहमसहायः,' इति। किंच–

पंचानां मन्यसेऽस्माकं यं सुयोधं सुयोधन!
दंशितस्याऽऽत्तशस्त्रस्य तेन तेऽस्तु रणोत्सवः।।10।।

(अन्वय– सुयोधन! अस्माकम् पंचानाम् अयम् सुयोधम् मन्यसे तेन दंशितस्य आत्त–शस्त्रस्य ते रणोत्सवः अस्तु।।10।।)

इत्थं श्रुत्वाऽसूयान्वितां दृष्टिं कुमारयोर्निक्षिप्योक्तवान्धार्तराष्ट्रः।

कर्णदुःशासनवधात्तुल्यावेव युवां मम।
अप्रियोऽपि प्रियो योद्धुं त्वमेव प्रियसाहसः।।11।।

(अन्वय– कर्ण–दुःशासन–वधात् युवाम् मम तुल्यौ एव प्रिय–साहसः त्वम् एव अप्रियः अपि, योद्धुम् प्रियः।।11।।)

इत्युत्थाय च परस्परक्रोधाधिक्षेपपरुषवाक्कलहप्रस्तावितघोर-संग्रामौ विचित्रविभ्रमभ्रमितगदापरिभासुरभुजदण्डौ, मण्डलैर्विचरितुमारब्धौ भीमदुर्योधनौ। अहं च देवेन चक्रपाणिना देवसकाशमनुप्रेषितः। आह च देवो देवकीनन्दनः– अपर्युषितप्रतिज्ञे च मारुतौ प्रनष्टे कौरवराजे, महानासीन्नो विषादः। सम्प्रति पुनर्भीमसेनेनाऽऽसादिते निष्कण्टकीभूतं भुवनतलं परिकलयतु भवान्। अभ्युदयोचिताश्चानवरतमंगलसमारम्भाः प्रवर्त्त्यन्ताम्। कृतं सन्देहेन।

एवं मनुष्यों के पड़े हुए शरीरों को खाने के लिए गिर रहे, गिद्ध, कंक और शृगालों वाले, नष्ट हुए सुयोधन के सैन्य बल वाले उस स्थान पर, हमारे वीरों द्वारा सिंहनाद मिश्रित वाद्य–ध्वनि वाले, कौरवों से रहित युद्धस्थल को देखकर, उस दुर्योधन ने अत्यन्त लम्बी और गर्म श्वास ली और उसके बाद वृकोदर बोला– अरे! कुरुराज! भाइयों के विनाश को देखकर, इसप्रकार क्रोध मत करो, 'पाण्डव तो बहुत हैं और युद्ध करने के लिए मैं अकेला ही रह गया हूँ।' ऐसा विषाद मत करो, इसलिए,

हे सुयोधन! हम पाँचों पाण्डवों में से तुम, जिसे लड़ने के योग्य समझते हो, उसी के साथ कवच पहनकर, अस्त्र धारण किए हुए तुम्हारा रणोत्सव हो जाए।।10।।

यह सुनकर दूसरे के उत्कर्ष को सहन न कर पाने वाली दृष्टि भीम और अर्जुन पर डालकर, दुर्योधन बोला–

कर्ण और दुःशासन के वध के कारण, तुम दोनों मेरे लिए एक समान ही हो, साहसप्रिय होने से तुम भी, अप्रिय होते हुए भी युद्ध करने के लिए मेरे लिए प्रिय हो।।11।।

यह कहकर और उठकर, आपस में क्रोध के आक्षेप से कठोर वाणी और विवाद के साथ, घोर युद्ध आरम्भ करने वाले, विचित्र प्रकार के विलास से घुमायी गदा से सुशोभित भुजदण्ड वाले, भीम एवं दुर्योधन ने घेरा बनाकर, घूमना आरम्भ कर दिया और तभी भगवान् चक्रपाणि ने मुझे आपके पास भेज दिया और भगवान् देवकीनन्दन ने कहा कि–शीघ्र ही भीमसेन की प्रतिज्ञा पूरी न होने के कारण, दुर्योधन के गायब हो जाने से, हम सभी को महान् विषाद हो गया था, किन्तु अब फिर से भीमसेन द्वारा सुयोधन के पा लेने पर, (हे युधिष्ठिर) आप पृथ्वीतल को निष्कण्टक हुआ समझ लीजिए एवं निरन्तर विजय के समय के योग्य मंगलोत्सवों को मनाना आरम्भ कर दीजिए तथा विजय के सम्बन्ध में सन्देह न करें–

पूर्यन्तां सलिलेन रत्नकलशा राज्याभिषेकाय ते,
कृष्णाऽत्यन्तचिरोज्झिते च कबरीबन्धे करोतु क्षणम्।
रामे घोरकुठारभासुरकरे क्षत्रद्रुमोच्छेदिनि,
क्रोधान्धे च वृकोदरे परिपतत्याजौ कुतः संशयः।।12

(अन्वय– रत्नकलशाः ते राज्य–अभिषेकाय सलिलेन पूर्यन्ताम्, अत्यन्त–चिर–उज्झिते च कबरी–बन्धे कृष्णा क्षणम् करोतु, घोर–कुठार–भासुर–करे क्षत्र–द्रुम–उच्छेदिनि रामे, क्रोध–अन्धे वृकोदरे च आजौ परिपतति, संशयः कुतः?।।12)

द्रौपदी– (सबाष्पम्) यदेवस्त्रिभुवननाथो भणति तत्कथमन्यथा भविष्यति।[1]

पांचालकः– न केवलमियमाशीः, असुरनिषूदनस्याऽऽदेशोऽपि।

युधिष्ठिरः– को हि नाम भगवता सन्दिष्टं विकल्पयति? कः कोऽत्र भोः? (प्रविश्य)

कंचुकीः– आज्ञापयतु देवः।

युधिष्ठिरः– कंचुकिन्! देवस्य देवकीनन्दनस्य बहुमानाद्वत्सस्य मे विजयमंगलाय प्रवर्त्यन्तां तदुचिताः समारम्भाः।

कंचुकी– यथाऽऽज्ञापयति देवः। (सोत्साहं परिक्रम्य) भो भोः संविधातॄणां पुरस्सराः! यथा प्रधानमन्तर्वेश्मिकाः! दौवारिकाश्च! एष खलु भुजबलपरिक्षेपोत्तीर्णकौरवपरिभवसागरस्य, निर्व्यूढदुर्वहप्रतिज्ञाभारस्य, सुयोधनाऽनुजशतोन्मूलनप्रभंजनस्य, दुःशासनोरःस्थलविदलननरसिंहस्य, दुर्योधनोरुस्तम्भभंगविनिश्चितविजयस्य बलिनः प्राभंजनेर्वृकोदरस्य स्नेह–पक्षपातिना मनसा मंगलानि कर्तुमाज्ञापयति देवो युधिष्ठिरः। (आकाशे)

किं ब्रूथ– 'सर्वतोऽधिकतरमपि प्रवृत्तं किं नालोकयसि' इति। साधु पुत्रकाः! साधु। अनुक्तहितकारिता हि प्रकाशयति मनोगतां स्वामिभक्तिम्।

---

[1]. जं देवो त्तिहअणणाहो भणादि तं कहं अण्णहा भविस्सदि।

तुम्हारे राज्याभिषेक के लिए रत्नकलश जलों से भर लिए जाएँ, लम्बे समय से खुले बालों को बाँधने के लिए द्रौपदी उत्सव मनावे? कठोर फरसे से प्रदीप्त हाथ वाले और क्षत्रियरूपी वृक्षों को काटने वाले परशुराम और क्रोध से अन्धे वृकोदर के युद्धभूमि में उतरने पर विजय में सन्देह का कोई स्थान नहीं है।।12।।

द्रौपदी– (अश्रुपूर्वक) तीनों लोकों के स्वामी जो देव कहते हैं, वह भला अन्यथा कैसे हो सकता है?

पांचालक– यह केवल आशीर्वाद ही नहीं है, अपितु असुर–निषूदन का आदेश भी है।

युधिष्ठिर– भगवान् के दिए हुए सन्देश में भला कोई विकल्प सम्भव है? अरे! यहाँ कौन है?

कंचुकी– महाराज! आज्ञा प्रदान कीजिए।

युधिष्ठिर– हे कंचुकी! देव, देवकीनन्दन के आदरणीय होने से मेरे वत्स भीमसेन के विजय मंगल हेतु उचित तैयारियाँ आरम्भ कर दी जाएँ।

कंचुकी– महाराज की जैसी आज्ञा (उत्साहपूर्वक घूमकर) अरे! ओ, कार्यकर्ताओं में अग्रणी! अन्तःपुर के प्रधान कर्मचारियों! द्वारपालों! अपने भुजबल से कौरवों द्वारा किए गए परिभवरूपी सागर को पार करने वाले, दुर्वह प्रतिज्ञाभार को पूरा करने वाले, सुयोधन के सौ भाई रूपी वृक्षों को उखाड़कर फैंकने वाली आँधी के समान, दुःशासन के वक्षःस्थल को नृसिंह के समान विदीर्ण करने वाले, दुर्योधन की जाँघों को तोड़ने से सुनिश्चित विजय वाले, प्रबल आँधी के समान भयंकर, वायुपुत्र वृकोदर के स्नेह के पक्षपाती, ये महाराज युधिष्ठिर विजयोत्सव मनाने के लिए, अपने मन से आज्ञा दे रहे हैं। (आकाश में) चारों ओर मनाए जा रहे महोत्सव को क्यों नहीं देख रहे हो? साधु, पुत्रों! साधु, बिना कहे ही स्वामी का हित करना, हार्दिक स्वामी–भक्ति को ही प्रकट करता है।

युधिष्ठिरः– आर्य जयन्धर!

कंचुकी– आज्ञापयतु देवः।

युधिष्ठिरः– गच्छ, प्रियख्यापकं पांचालकं पारितोषिकेणा परितोषय।

कंचुकी– यदाज्ञापयति देवः। (इति पांचालकेन सह निष्क्रान्तः)

द्रौपदी– महाराज! किं निमित्तं पुनर्नाथभीमसेनेन स दुराचारो भणितः– 'पंचानामप्यस्माकं मध्ये येन ते रोचते तेन सह ते संग्रामो भवतु' इति? यदि नामैतयोः माद्रीसुतयोरेकतरेण प्रार्थितस्तेन संग्रामो भवेत्ततोऽत्याहितं भवेत्।[1]

युधिष्ठिरः– कृष्णे! एवं मन्यते जरासन्धघाती, हतसकल सुहृद्बन्धुवीरानुजराजन्यासु, कृपकृतवर्माश्वत्थामशेषास्वेकादशस्वक्षौहिणीष्वबान्धवः शरीरमात्रविभवः कदाचिदुत्सृष्टनिजाऽभिमानो धार्तराष्ट्रः परित्यजेदायुधं तपोवनं वा व्रजेत्सन्धिं वा पितृमुखेन याचेत, एवं सति सुदूरमतिक्रान्तः प्रतिज्ञाभारो भवेत्सकलरिपुजयस्येति। समरं प्रतिपत्तुं पंचानामपि पाण्डवानामेकस्यापि नैव क्षमः सुयोधनः। शंके चाऽहं युद्धं वृकोदरस्यैवाऽनेन। अयि सुक्षत्रिये! पश्य–

क्रोधोद्गूर्णगदस्य नास्ति सदृशः सत्यं रणे मारुतेः,
कौरव्ये कृतहस्तता पुनरियं देवे यथा सीरिणि।
स्वस्त्यस्तूद्धतधार्तराष्ट्रनलिनीनागाय वत्साय मे,
शंके तस्य सुयोधनेन समरं, नैवेतरेषामहम्।।13।।

(अन्वय– रणे क्रोधोत् गूर्ण–गदस्य मारुतेः सदृशः (अन्यः) न अस्ति, सत्यम्, कौरव्ये पुनः देवे सीरिणि यथा इयम् कृत–हस्तता, उद्धत–धार्तराष्ट्र–नलिनी–नागाय मे वत्साय स्वस्ति अस्तु, अहम् तस्य सुयोधनेन समरम् शंके, इतरेषाम् न एव ।।13।।)

(नेपथ्ये)

---

[1]. महाराअ! किंणिमित्तं उण णाहभीमसेणेण सो दुराआरो भणिदो– 'पंचाणं वि अम्हाणं मज्झे जेण दे रोअदि तेण सह दे संगामो होदु' त्ति। जह मद्दीसुदाणं एकदरेण सह पत्थिदो संगामो भवे तदो अच्चाहिदं भवे।

युधिष्ठिर– आर्य जयन्धर!

कंचुकी– महाराज! आज्ञा दीजिए।

युधिष्ठिर– जाओ! प्रिय सूचना प्रदान करने वाले, पांचालक को पारितोषिक प्रदान कर सन्तुष्ट करो।

कंचुकी– महाराज की जैसी आज्ञा।

(ऐसा कहकर पांचालक के साथ निकल जाता है)

द्रौपदी– महाराज! भला स्वामी भीमसेन ने उस दुराचारी से यह कैसे कह दिया कि इन पाँचों में से, जो तुम्हें रुचिकर हो, उसी के साथ तुम्हारा संग्राम होवे। यदि इन माद्रीपुत्रों में से किसी एक के साथ, वह युद्ध को माँग लेता, तो महान् अनर्थ हो जाता।

युधिष्ठिर– हे कृष्णे! जरासन्ध का वध करने वाले, भीम ऐसा सोचते थे कि–'सभी मित्रों, बन्धुओं और राजाओं का, जिसमें वध किया जा चुका है एवं कृपाचार्य, कृतवर्मा एवं अश्वत्थामा ये तीन वीर ही, जिसमें शेष बचे हुए हैं, ऐसी ग्यारह अक्षौहिणी सेनाओं में बन्धुओं से रहित, शरीरमात्र ऐश्वर्य से सम्पन्न, यह दुर्योधन कहीं अपने अभिमान का परित्याग कर दे या फिर तपोवन में चला जाए अथवा अपने पिता के मुँह से सन्धि की याचना करे। ऐसा होने पर सभी शत्रुओं की विजय की कठिन प्रतिज्ञा का भार उतारना, अत्यधिक दूर ही चला जाएगा तथा पाँचों पाण्डवों में किसी एक के साथ भी सुयोधन युद्ध करने में समर्थ नहीं है। इसलिए इस सम्बन्ध में मुझे तो यही शंका है कि वृकोदर के साथ ही इस दुर्योधन का गदा–युद्ध हो रहा है।

(नेपथ्य में)

शब्दार्थ– प्रियख्यापकम्–प्रिय सूचना देने वाले को, परितोषय–संतुष्ट करो, निमित्तम्–कारण, अत्याहितम्–अनर्थ, कदाचित्–कभी, सदृशः–समान, अनेन–इसके द्वारा, याचेत्–माँग लेवे, एवंसति–ऐसा होने पर।

तृषितोऽस्मि भोस्तृषितोऽस्मि। सम्भावयतु कश्चित्सलिलच्छाया-सम्प्रदानेन माम्।

युधिष्ठिरः— (आकर्ण्य) कः कोऽत्र भोः?

(प्रविश्य, सत्वरम्)

कंचुकी— आज्ञापयतु देवः।

युधिष्ठिरः— ज्ञायतां किमेतत्?

कंचुकी— यदाज्ञापयति देवः।

(इति निष्क्रम्य पुनः प्रविश्य)

देव! क्षुण्मानतिथिरुपस्थितः।

युधिष्ठिरः— शीघ्रं प्रवेशय।

कंचुकी— यदाज्ञापयति देवः। (इति निष्क्रान्तः)

(ततः प्रविशति मुनिवेषधारी चार्वाको नाम राक्षसः)

राक्षसः— (आत्मगतम्) एषोऽस्मि चार्वाको नाम राक्षसः, सुयोधनस्य मित्रं पाण्डवान् वंचयितुं भ्रमामि। (प्रकाशम्) तृषितोऽस्मि, तृषितोऽस्मि। सम्भावयतु मां कश्चिज्जलच्छायाप्रदानेन। (इति राज्ञः समीपमुसर्पति)

(सर्व उत्तिष्ठन्ति)

युधिष्ठिरः— (सहसोत्थाय) मुने! अभिवादये।

राक्षसः— अकालोऽयं समुदाचारस्य, जलप्रदानेन सम्भावयतु मां भवान्।

युधिष्ठिरः— मुने! इदमासनम्। उपविश्यताम्।

राक्षसः— उपविश्य, ननु भवताऽपि क्रियतामासनपरिग्रहः।

युधिष्ठिरः— (उपविश्य) कः कोऽत्र भोः? सलिलमुपनय।

(प्रविश्य गृहीतभृंगारः[1])

कंचुकी—(उपसृत्य) महाराज! शिशिरसुरभिसलिलसम्पूर्णोऽयं भृंगारः, पानभाजनं चेदम्।

---

[1]. स्वर्णनिर्मित कलश, जिसके मुख से जल निकलता था तथा इसका आकार मुडावदार गले वाली बड़ी सुराही के समान होता था।

मैं प्यासा हूँ, अरे! मैं प्यासा हूँ। कोई मुझे पानी और छाया प्रदान कर अनुगृहीत करे।

युधिष्ठिर– (सुनकर) अरे! यहाँ पर कोई है?

(प्रवेश करके शीघ्रतापूर्वक)

कंचुकी– महाराज्! आज्ञा प्रदान कीजिए।

युधिष्ठिर– पता करो, यह क्या है?

कंचुकी– जैसी महाराज की आज्ञा।

(ऐसा कहकर निकलकर फिर से प्रवेश करके)

महाराज! भूखा अतिथि उपस्थित हुआ है।

युधिष्ठिर– शीघ्र प्रवेश कराओ।

कंचुकी– जैसी महाराज की आज्ञा।

(ऐसा कहकर निकल जाता है)

(उसके बाद मुनिवेष धारण किए चार्वाक नामक राक्षस प्रवेश करता है)

राक्षस– (मन में) यह मैं चार्वाक नामक राक्षस, सुयोधन का मित्र पाण्डवों को छलने के लिए घूम रहा हूँ। (प्रकट में) मैं प्यासा हूँ, मैं प्यासा हूँ। कोई मुझे पानी पिलाकर तथा छाया प्रदान करके अनुगृहीत करे। (यह कहकर राजा के पास जाता है)

(सभी उठ जाते हैं)

युधिष्ठिर– (अकस्मात् उठकर) हे मुने! मैं अभिवादन करता हूँ।

राक्षस– यह शिष्टाचार का समय नहीं है, आप तो मुझे जल देकर अनुगृहीत करें।

युधिष्ठिर– हे मुने! यह आसन है, आप इस पर बैठिए।

राक्षस– (बैठकर) निश्चय ही, आप भी आसन स्वीकार कीजिए।

युधिष्ठिर– (बैठकर) अरे! यहाँ पर कोई है? जल लाओ।

(स्वर्णिम जलपात्र लिए हुए प्रवेश करके)

कंचुकी– (पास जाकर) महाराज! शीतल एवं सुगन्धित जल से भरा हुआ, यह स्वर्णिम जल का पात्र (भृङ्गार) और यह जल पीने का पात्र है।

युधिष्ठिरः– मुने! निर्वर्त्यतामुदन्याप्रतीकारः।

राक्षसः– (पादौ प्रक्षाल्योपस्पृशन्विचिन्त्य) भोः! भोः, क्षत्रियस्त्वमिति मन्ये?

युधिष्ठिरः– सम्यग्वेदी भवान्। क्षत्रिय एवाऽस्मि।

राक्षसः– यद्येवं प्रतिदिनसुलभस्वजनविनाशनेषु संग्रामेषु युष्मत्तो नाऽऽदेयं सलिलादिकम्। भवतु, छाययैवाऽनया सरस्वतीशिशिरतरंग-स्पृशा मरुता चाऽनेन विगतक्लमो भविष्यामि।

द्रौपदी– बुद्धिमतिके! वीजय महर्षिमनेन तालवृन्तेन।[1]

(चेटी तथा करोति)

राक्षसः– भवति! अनुचित्तोऽयमस्मासु समुदाचारः।

युधिष्ठिरः– मुने! कथय कथमेवं भवान्परिश्रान्तः?

राक्षसः– मुनिजनसुलभेन कौतूहलेन तत्रभवतां महाक्षत्रियाणां द्वन्द्वयुद्धमवलोकयितुं पर्यटामि समन्तपंचकम्। अद्य तु बलवत्तया शारदा-ऽऽतपस्याऽपर्याप्तमेवावलोक्य गदायुद्धमर्जुनसुयोधनयोरागतोऽस्मि।

(सर्वे विषादं नाटयन्ति)

कंचुकी– मुने! न खल्वेदम्। भीमसुयोधनयोरिति कथय।

राक्षसः– आः! अविदितवृान्त एव कथं मामाक्षिपसि?

युधिष्ठिरः– महर्षे! कथय कथय।

राक्षसः– क्षणमात्रं विश्रम्य सर्वं कथयामि भवतः, न पुनरस्य वृद्धस्य।

युधिष्ठिरः– भगवन्! एतावदेव कथय– किंपुनरर्जुनसुयोधन-योरिति।

राक्षस– पूर्वमेव कथितं मया–प्रवृत्तं गदायुद्धमर्जुनसुयोधनयोरिति।

युधिष्ठिरः– न भीमसुयोधनयोरिति?

---

[1]. बुद्धिमदिए!वीएहि महेसिं इमिणा तालविन्तेण।

युधिष्ठिर– हे मुने! आप अपनी प्यास को शान्त कीजिए।

राक्षस– (दोनों पैरों को धोकर, आचमन करते हुए, सोचकर) अरे! अरे! मैं मानता हूँ कि तुम क्षत्रिय हो?

युधिष्ठिर– आप ठीक समझते हैं। मैं क्षत्रिय ही हूँ।

राक्षस– यदि ऐसा है तो प्रतिदिन हो रहे, स्वजन विनाश वाले युद्धों में, तुमसे तो जलादि ग्रहण करना नहीं चाहिए। ठीक है, इस छाया से एवं सरस्वती नदी की शीतल तरंगों वाली वायु के स्पर्श से ही, थकावट एवं प्यास को दूर करूँगा।

द्रौपदी– हे बुद्धिमतिके! इस तालवृन्त से महर्षि के ऊपर पंखा झलो।

(चेटी वैसा करती है)

राक्षस– हे देवि! हम मुनियों पर स्त्रियों द्वारा किया गया सेवा शुश्रूषा विषयक आचरण (समुदाचार) उचित नहीं है।

युधिष्ठिर– हे मुने! कहिए, आप इसप्रकार कैसे थक गए?

राक्षस– मुनिजन सुलभ कौतूहल द्वारा आप महाक्षत्रियों का द्वन्द्व युद्ध देखने के लिए मैं **समन्तपंचक क्षेत्र** में घूम रहा था। आज तो शरदऋतु के बलवान् आतप के कारण अर्जुन और सुयोधन का गदा युद्ध देखकर आ रहा हूँ। (सभी विषाद का अभिनय करते हैं)

कंचुकी– हे मुने! वास्तव में ऐसा नहीं है, आप भीम और सुयोधन का कहिए।

राक्षस– अरे! समाचार को न जानने वाला तू, इसप्रकार मेरे ऊपर आक्षेप क्यों लगा रहा है?

युधिष्ठिर– हे महर्षि! कहिए, कहिए।

राक्षस– क्षण भर के लिए विश्राम करके, सभी कुछ आपसे कहता हूँ किन्तु इस वृद्ध से नहीं कहूँगा।

युधिष्ठिर– भगवन्! यही कहिए, क्या अर्जुन और दुर्योधन में?

राक्षस– मैंने पूर्व में ही कह दिया कि अर्जुन और सुयोधन में गदायुद्ध आरम्भ हो गया।

युधिष्ठिर– भीम और सुयोधन में गदायुद्ध नहीं हुआ?

राक्षसः– वृत्तं तत्।

(युधिष्ठिरो द्रौपदी च मोहमुपगतौ)

कंचुकी– (सलिलेनासिच्य) समाश्वसितु देवी देवी च।

चेटी– (देवीं प्रति) समाश्वसितु समाश्वसितु देवी।[1]

(उभौ संज्ञां लभेते)

युधिष्ठिरः– किं कथयसि मुने! वृत्तं भीमसुयोधनयोर्गदायुद्धमिति।

द्रौपदीः– भगवन्! कथय कथय किं वृत्तमिति।[2]

राक्षसः– कंचुकिन्! कौ पुनरेतौ?

कंचुकी– एष देवो युधिष्ठिरः, इयमपि पांचालतनया।

राक्षसः– आः! दारुणामुपक्रान्तं मया नृशंसेन।

द्रौपदी– हा नाथ भीमसेन![3] (इति मोहमुपगता)

कंचुकी– किं नाम कथितम्?

चेटी– समाश्वसितु समाश्वसितु देवी।[4]

युधिष्ठिरः– (सास्रम्) ब्रह्मन्।

पदे सन्दिग्ध एवास्मिन्दुःखमास्ते युधिष्ठिरः।
वत्सस्य निश्चिते तत्त्वे प्राणत्यागादयं सुखी।।14।।

(अन्वय– सन्दिग्धः एव अस्मिन् पदे युधिष्ठिरः दुःखम् आस्ते वत्सस्य तत्त्वे निश्चिते, अयम् प्राण–त्यागात् सुखी।।14।।)

राक्षसः– (सानन्दमात्मगतम्) अयमेव मे यत्नः। (प्रकाशम्) यद्येवम् अवश्यं कथनीयं, तदा संक्षेपतः कथयामि, न युक्तं बन्धुव्यसनं विस्तरेण वेदयितुम्।

युधिष्ठिरः– (अश्रूणि मुंचन्)

सर्वथा कथय ब्रह्मन्संक्षेपाद्विस्तरेण वा।
वत्सस्य किमपि श्रोतुमेष दत्तः क्षणो मया।।15।।

---

1. समस्ससदु समस्ससदु देवी।
2. भअवं! कहेहि, कहेहि किं वुत्तं? त्ति।
3. हा णाह भीमसेण।
4. समस्ससदु समस्ससदु देवी।

राक्षस– वह तो हो गया।

(युधिष्ठिर और द्रौपदी दोनों मूर्च्छित हो जाते हैं)

कंचुकी– (जल छिड़ककर) महाराज! और महारानी! धैर्य धारण करें।

चेटी– (देवी के प्रति) महारानी! धैर्य धारण करें, धैर्य धारण करें।

(दोनों होश में आते हैं)

युधिष्ठिर– हे मुने! आप क्या कर रहे हैं? भीम और सुयोधन में गदायुद्ध हो चुका।

द्रौपदी– भगवन्! कहिए, कहिए, क्या हो चुका?

राक्षस– हे कंचुकिन्! ये दोनों कौन हैं?

कंचुकी– ये महाराज युधिष्ठिर हैं और ये भी पांचालराज की पुत्री द्रौपदी हैं।

राक्षस– हाय, मुझ कठोर ने अत्यधिक दुःखद वृतान्त कहना आरम्भ कर दिया।

द्रौपदी– हाय, नाथ भीमसेन! (यह कहकर मूर्च्छित हो जाती है)

कंचुकी– भला आपने क्या कहा?

चेटी– देवी! धैर्य धारण कीजिए, धैर्य धारण कीजिए।

युधिष्ठिर– (अश्रुपूर्वक) हे ब्रह्मन्!

इस सन्दिग्ध पद को कहने पर तो यह युधिष्ठिर अत्यधिक दुःखी हो गया है। वत्स भीम के न होने की बात निश्चित होने पर तो यह मैं प्राण देकर ही सुखी हो सकूँगा।।14।।

राक्षस– (आनन्दपूर्वक मन में) मेरा भी यही प्रयत्न है। (प्रकट में) यदि ऐसा है तो अवश्य ही कहना चाहिए। तब तो संक्षेप में ही कहता हूँ, क्योंकि बन्धुओं के विनाश को विस्तार से कहना ठीक नहीं है।

युधिष्ठिर– (अश्रु बहाते हुए)

हे भगवन्! संक्षेप में या विस्तार से किसी प्रकार भी कहिए, मैं वत्स भीम का जो कुछ भी है, उसे सुनने के लिए तैयार हूँ।।15।।

(अन्वय– ब्रह्मन्! सर्वथा संक्षेपात् विस्तरेण वा कथय, वत्सस्य किम् अपि श्रोतुम् एषः मया क्षणः दत्तः।।15।।)

राक्षसः– श्रूयताम्।

तस्मिन् कौरवभीमयोर्गुरुगदाघोरध्वनौ संयुगे

द्रौपदी– (सहसोत्थाय) ततस्ततः?[1]

राक्षसः– (स्वगतम्) कथं पुनरनयोर्लब्धसंज्ञतामपनयामि?

(प्रकाशम्)

सीरी सत्वरमागतश्चिरमभूत्तस्याग्रतः संगरः।
आलम्ब्य प्रियशिष्यतां तु हलिना संज्ञा रहस्याहिता
यामासाद्य कुरूत्तमः प्रतिकृतिं दुःशासनारौ गतः।।16।।

(अन्वय– कौरव–भीमयोः तस्मिन् गुरु–गदा–घोर–ध्वनौ संयुगे सीरी सत्वरम् आगतः, तस्य अग्रतः संगरः चिरम् अभूत्, हलिना तु प्रिय–शिष्यताम् आलम्ब्य रहसि संज्ञा आहिता, याम् आसाद्य कुरूत्तमः दुःशासन–अरौ प्रतिकृतिम् गतः।।16।।)

युधिष्ठिरः– हा वत्स वृकोदर! (इति मोहमुपगतः)

द्रौपदी– हा नाथ भीमसेन! हा मम परिभवप्रतीकारपरित्यक्त-जीवित! जटासुर–बक–हिडिम्ब–किर्मीर–कीचक–जरासन्ध–निषूदन! सौगन्धिकाहरण–चाटुकार! देहि मे प्रतिवचनम्।[2]

(इति मोहमुपगता)

कंचुकी– (सास्रम्) हा कुमार भीमसेन! धार्तराष्ट्रकुलकमलिनी प्रालेयवर्ष! (ससंभ्रमम्) समाश्वसितु महाराजः। भद्रे! समाश्वासय स्वामिनीम्। महर्षे! त्वमपि तावदाश्वासय राजानम्।

राक्षसः– (स्वागतम्) आश्वासयामि प्राणान्परित्याजयितुम्। (प्रकाशम्) अयि भो भीमाग्रज! क्षणमेकं चीयतां समाश्वासः। कथा-ऽवशेषोऽप्यस्ति।

---

[1]. तदो तदो?

[2]. हा णाह भीमसेण! हा मह परिभवपडीआरपरिच्चत्तजीविअ! जडासुरवअहिडिम्ब किम्मीरकीचअजरासन्धणिसूदण! सोअन्धिआह रणचाडुआर! देहि मे पडिवअणम्।

राक्षस– सुनिए।

कौरवराज एवं भीम इन दोनों के भयंकर शब्द वाले गदायुद्ध के होने पर.....

द्रौपदी– (सहसा उठकर) उसके बाद क्या हुआ, उसके बाद क्या हुआ?

राक्षस– (मन में) इन दोनों के चैतन्य को फिर से कैसे दूर किया जाए? (प्रकट में)

वहाँ पर शीघ्र ही बलराम आ गए, उनके सामने ही बहुत समय तक उनका युद्ध होता रहा। प्रिय शिष्य होनें के कारण उसके बाद बलराम ने दुर्योधन को एकान्त में संकेत किया और उस संकेत को प्राप्त करके, कुरुपति दुर्योधन ने शत्रु भीमसेन से बदला ले ही लिया।।16।।

युधिष्ठिर– हाय! वत्स वृकोदर!

(यह कहकर मूर्च्छित हो जाता है)

द्रौपदी– हाय, स्वामी! भीमसेन, हाय! मेरे तिरस्कार का बदला लेने के लिए, अपने प्राणों को देने वाले, हाय! जटासुर, बक, हिडिम्ब, किर्मीर, कीचक और जरासन्ध का विनाश करने वाले, हाय! गन्धमादन पर्वत पर उत्पन्न होने वाले स्वर्णकमल को लाकर मुझे प्रदान करने वाले, मुझे प्रत्युत्तर प्रदान कीजिए। (ऐसा कहकर मूर्च्छित हो जाती है)

कंचुकी– (अश्रुपूर्वक) हाय! कुमार भीमसेन, धृतराष्ट्र के कुलरूपी कमलिनियों के वन पर पाले की वर्षा करके, उनका विनाश करने वाले, (घबराकर) महाराज! धैर्य धारण कीजिए, धैर्य धारण कीजिए। भद्रे! महारानी को धैर्य दिलाइए। हे महर्षि! आप भी महाराज को धीरज बँधाइए।

राक्षस– (मन में) प्राण त्याग कराने के लिए धैर्य बँधाता हूँ। (प्रकट में) अरे! ओ, भीम के बड़े भाई युधिष्ठिर! एक क्षण के लिए धैर्य रखिए, क्योंकि अभी कुछ कथा शेष है।

(अन्वय– ब्रह्मन्! सर्वथा संक्षेपात् विस्तरेण वा कथय, वत्सस्य किम् अपि श्रोतुम् एषः मया क्षणः दत्तः ।।15।।)

राक्षसः– श्रूयताम्।

तस्मिन् कौरवभीमयोर्गुरुगदाघोरध्वनौ संयुगे

द्रौपदी– (सहसोत्थाय) ततस्ततः?[1]

राक्षसः– (स्वगतम्) कथं पुनरनयोर्लब्धसंज्ञतामपनयामि?

(प्रकाशम्)

सीरी सत्वरमागतश्चिरमभूत्तस्याग्रतः संगरः।
आलम्ब्य प्रियशिष्यतां तु हलिना संज्ञा रहस्याहिता
यामासाद्य कुरूत्तमः प्रतिकृतिं दुःशासनारौ गतः।।16।।

(अन्वय– कौरव–भीमयोः तस्मिन् गुरु–गदा–घोर–ध्वनौ संयुगे सीरी सत्वरम् आगतः, तस्य अग्रतः संगरः चिरम् अभूत्, हलिना तु प्रिय–शिष्यताम् आलम्ब्य रहसि संज्ञा आहिता, याम् आसाद्य कुरूत्तमः दुःशासन–अरौ प्रतिकृतिम् गतः।।16।।)

युधिष्ठिरः– हा वत्स वृकोदर! (इति मोहमुपगतः)

द्रौपदी– हा नाथ भीमसेन! हा मम परिभवप्रतीकारपरित्यक्त-जीवित! जटासुर–बक–हिडिम्ब–किर्मीर–कीचक–जरासन्ध–निषूदन! सौगन्धिकाहरण–चाटुकार! देहि मे प्रतिवचनम्।[2]

(इति मोहमुपगता)

कंचुकी– (सास्रम्) हा कुमार भीमसेन! धार्तराष्ट्रकुलकमलिनी प्रालेयवर्ष! (ससंभ्रमम्) समाश्वसितु महाराजः। भद्रे! समाश्वासय स्वामिनीम्। महर्षे! त्वमपि तावदाश्वासय राजानम्।

राक्षसः– (स्वागतम्) आश्वासयामि प्राणान्परित्याजयितुम्। (प्रकाशम्) अयि भो भीमाग्रज! क्षणमेकं चीयतां समाश्वासः। कथा-ऽवशेषोऽप्यस्ति।

---

[1]. तदो तदो?

[2]. हा णाह भीमसेण! हा मह परिभवपडीआरपरिच्चत्तजीविअ! जडासुरवअहिडिम्ब किम्मीरकीचअजरासन्धणिसूदण! सोअन्धिआह रणचाडुआर! देहि मे पडिवअणम्।

राक्षस– सुनिए।

कौरवराज एवं भीम इन दोनों के भयंकर शब्द वाले गदायुद्ध के होने पर.....

द्रौपदी– (सहसा उठकर) उसके बाद क्या हुआ, उसके बाद क्या हुआ?

राक्षस– (मन में) इन दोनों के चैतन्य को फिर से कैसे दूर किया जाए? (प्रकट में)

वहाँ पर शीघ्र ही बलराम आ गए, उनके सामने ही बहुत समय तक उनका युद्ध होता रहा। प्रिय शिष्य होने के कारण उसके बाद बलराम ने दुर्योधन को एकान्त में संकेत किया और उस संकेत को प्राप्त करके, कुरुपति दुर्योधन ने शत्रु भीमसेन से बदला ले ही लिया।।16।।

युधिष्ठिर– हाय! वत्स वृकोदर!

(यह कहकर मूर्च्छित हो जाता है)

द्रौपदी– हाय, स्वामी! भीमसेन, हाय! मेरे तिरस्कार का बदला लेने के लिए, अपने प्राणों को देने वाले, हाय! जटासुर, बक, हिडिम्ब, किर्मीर, कीचक और जरासन्ध का विनाश करने वाले, हाय! गन्धमादन पर्वत पर उत्पन्न होने वाले स्वर्णकमल को लाकर मुझे प्रदान करने वाले, मुझे प्रत्युत्तर प्रदान कीजिए। (ऐसा कहकर मूर्च्छित हो जाती है)

कंचुकी– (अश्रुपूर्वक) हाय! कुमार भीमसेन, धृतराष्ट्र के कुलरूपी कमलिनियों के वन पर पाले की वर्षा करके, उनका विनाश करने वाले, (घबराकर) महाराज! धैर्य धारण कीजिए, धैर्य धारण कीजिए। भद्रे! महारानी को धैर्य दिलाइए। हे महर्षि! आप भी महाराज को धीरज बँधाइए।

राक्षस– (मन में) प्राण त्याग कराने के लिए धैर्य बँधाता हूँ। (प्रकट में) अरे! ओ, भीम के बड़े भाई युधिष्ठिर! एक क्षण के लिए धैर्य रखिए, क्योंकि अभी कुछ कथा शेष है।

युधिष्ठिरः– (समाश्वस्य) महर्षे! किमस्ति कथाशेषः?

द्रौपदी– (प्रतिबुद्धा) भगवन् कथय कीदृशः कथाशेषः, इति?[1]

कंचुकी– कथय कथय?

चेटी– कथय, कथय।[2]

राक्षसः– ततश्च हते तस्मिन्सुक्षत्रिये वीरसुलभां गतिमुपगते समग्रसंगलितं भ्रातृवधशोकजं बाष्पं प्रमृज्य, भ्रातृवधशोकादपहाय गाण्डीवं प्रत्यग्रक्षतजच्छटाचर्चितां तामेव गदां भ्रातृहस्ताद्यत्नादाकृष्य, निवार्यमाणोऽपि सन्धित्सुना भगवता वासुदेवेन, आगच्छाऽऽगच्छेति सोपहासं भ्रमितगदाझंकारमूर्च्छितगम्भीरवचनध्वनिनाऽऽहूयमानः कौरवराजेन, तृतीयो–ऽनुजस्ते किरीटीयोद्धुमारब्धः। तथाऽकृतिनस्तस्य गदाऽऽघातानि धनमुत्प्रेक्षमाणेन कामपालेनाऽर्जुनपक्षपाती देवकी सूनुरतिप्रयत्नात् स्वरथमारोप्य द्वारकां नीतः।

युधिष्ठिरः–साधु, भो अर्जुन! तदैव प्रतिपन्ना वृकोदरपदवी गाण्डीवं परित्यजता। अहं पुनः केनोपायेन प्राणाऽपगमनमहोत्सवमुत्सहिष्ये?

द्रौपदी– हा नाथ भीमसेन! न युक्तमिदानीं ते कनीयांसं भ्रातरमशिक्षितं गदायां, दारुणस्य शत्रोरभिमुखं गच्छन्तमुपेक्षितुम्।[3]

(इति मोहमुपगता)

राक्षसः– ततश्चाहम्......।

युधिष्ठिरः– भवतु मुने! किमतः परं श्रुतेन। हा तात! कान्तारव्यसनबान्धव! हा मच्छरीरस्थितिविच्छेदकातर! जतुगृहविपत्समुद्रतरणयानपात्र! हा किर्मीरहिडिम्बाऽसुरजरासन्धविजयमल्ल! हा कीचकसुयोधनाऽनुजशतकमलिनीकुंजर! हा द्यूतपणप्रणयिन्! मदाज्ञासम्पादक! हा कौरववनदावानल!

---

1 . भअवं! कहेहि कीदिसो कहासेसो त्ति?

2 . कहेहि कहेहि।

3 . हा णाह भीमसेण। ण जुत्तं दाणीं दे कणीअसं भादरं असिक्खिदं गदाए दारुणस्स सत्तुणो अहिमुहं गच्छन्तं उवक्खिदुम्।

युधिष्ठिर– (धैर्य धारण करके) हे महर्षे! क्या अभी भी कथा शेष है?

द्रौपदी– (होश में आकर) भगवन्! कहिए, कैसी कथा शेष है?

कंचुकी– कहिए, कहिए।

चेटी– कहिए, कहिए।

राक्षस– उसके बाद, उस वीर के मारे जाने एवं वीरोचित गति को प्राप्त होने पर, भ्रातृशोक से उत्पन्न सभी, पिघले हुए आँसुओं को पोंछकर, भ्रातृवध के शोक के कारण गाण्डीव को त्यागकर, ताजे बह रहे रक्त की छटा से चर्चित, उसी गदा को भाई भीम के हाथ से खींचकर, सन्धि के इच्छुक भगवान् वासुदेव द्वारा मना किए जाने पर भी, आ जा, आ जा, इसप्रकार उपहास कर रहे, घुमाई हुई गदा की झंकार से अस्पष्ट और गम्भीर वचनों की ध्वनि से, कौरवराज द्वारा पुकारे जाने पर, तुम्हारे तीसरे अनुज किरीटी अर्जुन ने युद्ध करना आरम्भ कर दिया एवं गदायुद्ध में अकुशल उस किरीटी का गदा के आघात से वध चाह रहे, कामपाल बलराम, अर्जुन के पक्षपाती देवकी नन्दन को अत्यधिक प्रयत्नपूर्वक अपने रथ पर बैठाकर द्वारकापुरी ले गए।

युधिष्ठिर– हे अर्जुन तुम धन्य हो! क्योंकि उसी समय गाण्डीव का परित्याग करके तुमने, वृकोदर के मार्ग का अनुसरण किया। प्राण त्यागरूपी महोत्सव को मैं अब किस उपाय द्वारा सहन करूँगा?

द्रौपदी– हाय स्वामी भीमसेन! गदायुद्ध में अकुशल अपने छोटे भाई के दारुण शत्रु के सामने जाने की उपेक्षा करना, अब उचित नहीं है। (यह कहकर मूर्च्छित हो जाती है)

राक्षस– और उसके बाद मैं......

युधिष्ठिर– अस्तु, हे मुने! इससे अधिक सुनने से क्या लाभ? हा तात! वन के दुःखों में सहायता करने वाले, हाय! मेरे शरीर की स्थिति के विच्छेद की चिन्ता से व्याकुल! हाय! लाक्षागृह रूपी सागर को पार करने में नौका के समान! हाय! किर्मीर, हिडिम्बासुर और जरासन्ध को जीतने वाले वीर! हा कीचक और दुर्योधन के सौ भाइयों रूपी कमलिनी के लिए मतवाले हाथी के समान! हाय! जुए की शर्त का

निर्लज्जस्य दुरोदरव्यसनिनो वत्स! त्वया सीदता
भक्त्या मे समदद्विपाऽयुतबलेनांगीकृता दासता।
किं नामाऽपकृतं मया तदधिकं येनाद्य दूरं गतः
त्यक्त्वाऽनाथमबान्धवं सपदि मां प्रीतिः क्व ते साऽधुना?

(**अन्वय**– वत्स! दुरोदर–व्यसनिनः मे निर्लज्जस्य भक्त्या सीदता समद–द्विप–अयुत–बलेन त्वया दासता अंगीकृता, मया अद्य तत् अधिकम् किम् नाम अपकृतम्? येन अनाथम् अबान्धवम् माम् सपदि त्यक्त्वा दूरम् गतः, सा ते प्रीतिः अधुना क्व (गता)? ।।17।।)

द्रौपदी– (संज्ञामुपलभ्योत्थाय च) **महाराज! किमेतद्वर्तते?**[1]

युधिष्ठिरः– कृष्णे! किमन्यत्?

स कीचकनिषूदनो बकहिडिम्बकिर्मीरहा
मदान्धमगधाधिपद्विरदसन्धिभेदाशनिः।
गदापरिघशोभिना भुजयुगेन तेनान्वितः
प्रियस्तव, ममाऽनुजोऽर्जुनगुरुर्गतोऽस्तं किल।।18।।

(**अन्वय**– सः कीचक–निषूदनः, बक–हिडिम्ब–किर्मीर–हा मदान्ध–मगध–अधिप–द्विरद–सन्धि–भेद–अशनिः गदा–परिघ–शोभिना तेन भुज–युगेन अन्वितः तव प्रियः मम अनुजः अर्जुन–गुरुः अस्तम् गतः किल।।18।।)

द्रौपदी– (आकाशे दत्तदृष्टिः) **नाथ! भीमसेन! त्वया किल मे केशाः संयमयितव्याः। न युक्तं वीरस्य क्षत्रियस्य प्रतिज्ञातं शिथिलयितुम्। तत्प्रतिपालय मां यावदुपसर्पामि।**[2]

(पुनर्मोहमुपगता)

युधिष्ठिरः– (आकाशे दत्तदृष्टिः) **अम्ब पृथे! श्रुतोऽयं तव पुत्रस्य समुदाचारः? मामेकमनाथं विलपन्तमुत्सृज्य क्वापि गतः! तात जरासन्ध–शत्रो! किं नाम वैपरीत्यमेतावता कालेनाऽल्पायुषि त्वयि समालोकितं जनेन? अथवा मयैव बहूपलब्धम्।**

---

[1]. महाराअ! किं एदं बट्टइ?

[2]. णाह भीमसेण! तुए किल मे केसा संजमिदव्वा। ण जुत्तं वीरस्स खत्तिअस्स पडिण्णादं सिढिलेदुम्। ता पडिवालेहि मं जाव उवसप्पामि।

पालन करने के प्रेमी! हाय, मेरी आज्ञा का पालन करने वाले! हाय कौरवरूपी वन के लिए दावानल के समान!

वत्स भीम! जुए के व्यसनी, मुझ निर्लज्ज की भक्ति से व्याकुल, मदमत्त दस हजार हाथियों का बल रखने वाले, तुमने दासता को भी स्वीकार कर लिया, फिर मैंने उससे भी बढ़कर आज कौन सा अपराध कर दिया, जिसके कारण अनाथ, बन्धुरहित मुझे शीघ्र ही त्यागकर, तुम दूर चले गए? तुम्हारी वह प्रीति इस समय भला कहाँ चली गयी?।।17।।

द्रौपदी– (होश में आकर और उठकर) महाराज! यह क्या है?

युधिष्ठिर– कृष्णे! और क्या?

कीचक का वध करने वाला, बक, हिडिम्ब, किर्मीर राक्षसों का हन्ता, मदान्ध मगध राजा जरासन्धरूपी हाथी का सन्धिभेद करने में वज्र के समान, गदारूपी परिघ की शोभा से युक्त, प्रसिद्ध बाहुयुगल से सम्पन्न, तुम्हारे प्रिय, मेरे अनुज और अर्जुन के अग्रज वह, भीमसेन निश्चय ही अस्त हो गए हैं।।18।।

द्रौपदी– (आकाश में दृष्टि डालकर) हे स्वामी भीमसेन! तुम्हें तो वस्तुतः अभी मेरे केशों को संवारना भी है। इसलिए वीर क्षत्रिय होकर, आपको अपनी प्रतिज्ञा शिथिल करना उचित नहीं है, तो मेरी रक्षा कीजिए, मैं आ रही हूँ (फिर से मूर्च्छित हो जाती है)

युधिष्ठिर– (आकाश में दृष्टि डालकर) हे माता पृथे! आपने अपने पुत्र का यह शिष्टाचार सुना, वह मुझ अकेले अनाथ को रोता बिलखता हुआ छोड़कर, कहीं चला गया है। हाय! वत्स, जरासन्ध शत्रु! भीम, लोगों ने इतने ही समय में थोड़ी सी अवस्था में, तुममें यह क्या विपरीत देख लिया? या फिर मैंने ही बहुत कुछ प्राप्त कर लिया?

दत्वा मे करदीकृताऽखिलनृपां यन्मेदिनीं लज्जसे,
द्यूते यच्च पणीकृतोऽपि हि मया न क्रुध्यसि, प्रीयसे।
स्थित्यर्थं मम मत्स्यराजभवने प्राप्तोऽसि यत्सूदतां
वत्सैतानि विनश्वरस्य सहसा दृष्टानि चिह्नानि ते।।19।।

(अन्वय– वत्स! करदी–कृत–अखिल–नृपाम् मेदिनीम् मे दत्वा यत् लज्जसे, यत् च द्यूते मया पणी–कृतो अपि न क्रुध्यसि, हि प्रीयसे, यत् मत्स्यराज–भवने मम स्थिति–अर्थम् सूदताम् प्राप्तः असि, एतानि विनश्वरस्य ते चिह्नानि सहसा दृष्टानि।।19।।)

मुने! किं कथयसि? ('तस्मिन्कौरवभीमयोः' 6/16 इत्यादि पठति)

राक्षसः– एवमेतत्।

युधिष्ठिरः– धिगस्मद्भागधेयानि। (आकाशमवलोकयन्) भगवन्–कामपाल! कृष्णाऽग्रज! सुभद्राभ्रातः!

ज्ञातिप्रीतिर्मनसि न कृता, क्षत्रियाणां न धर्मो,
रूढं सख्यं तदपि गणितं नाऽनुजस्यार्जुनेन।
तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः
कोऽयं पन्था यदसि विमुखो मन्दभाग्ये मयीत्थम्।।20।

(अन्वय– ज्ञाति–प्रीतिः मनसि न कृता, क्षत्रियाणाम् धर्मः न, अर्जुनेन अनुजस्य रूढम् तत् सख्यम् अपि न गणितम्, भवतः शिष्ययोः स्नेह–बन्धः कामम् तुल्यः भवतु, कः अयम् पन्थाः, यत् मन्द–भाग्ये मयि इत्थम् विमुखः असि?।।20।।)

(द्रौपदीमुपगम्य) अयि पांचालि! उत्तिष्ठोत्तिष्ठ। समानदुःखावेवाऽऽवां भवावः। मूर्च्छया किं मामेवमतिसन्धत्से?

द्रौपदी– (लब्धसंज्ञा) बध्नातु नाथ! दुर्योधनरुधिराद्रेण हस्तेन दुःशासनविमुक्तं मे केशहस्तम्। हंजे बुद्धिमतिके! तव प्रत्यक्षमेव नाथेन प्रतिज्ञातम्। (कंचुकिनमुपसृत्य) आर्य! किं संदिष्टं तावन्मे देवेन देवकीनन्दनेन 'पुनरपि केशबन्धनमारभ्यता'मिति? तदुपनय मे पुष्पदामानि। विरचय तावत्कबरीम्। कुरु भगवतः पुरुषोत्तमस्य वचनम्।

हे वत्स! अधीन बनाए गए, सभी राजाओं से युक्त पृथ्वी को मुझे सौंपकर भी तुम लज्जित ही बने रहे और जुआ खेलने में मैंने जो भी दाँव पर लगा दिया, उससे तुम क्रुद्ध भी नहीं हुए, अपितु प्रसन्न ही बने रहे। विराट के राजभवन में, मेरी स्थिति के लिए जो तुम रसोइए बन गए, शीघ्र विनष्ट होने वाले, तुम्हारे ये लक्षण मैंने सहसा ही देख लिए थे।।19।।

हे मुनि! क्या कहते हो? (तस्मिन् कौरवभीमयोः 6/16 इत्यादि पढ़ता है)

राक्षस– यह ऐसा ही है।

युधिष्ठिर–हमारे भाग्यों को धिक्कार है। (आकाश को देखते हुए) भगवन् कामपाल! हे श्रीकृष्ण के अग्रज! हे सुभद्रा के बन्धु!

आपने जाति–प्रेम को भी मन में विचार नहीं किया, क्षत्रियधर्म पर भी चिन्तन नहीं किया, अर्जुन की अनुज से उस प्रसिद्ध मित्रता की गणना भी नहीं की। आपका तो अपने दोनों शिष्यों भीम और दुर्योधन पर समान प्रेम होना चाहिए था, क्या यही समान प्रेम था, जो तुम मन्दभाग्य मेरे इसप्रकार विमुख हो गए।।20।।

(द्रौपदी के पास जाकर) अयि! पांचालि! उठो, उठो। हम दोनों एक समान दुःख वाले ही हो जाते हैं। इसप्रकार बेहोशी से तुम मुझे अत्यधिक व्याकुल क्यों कर रही हो?

द्रौपदी– (होश में आकर) हे स्वामी! दुर्योधन के रक्त से भीगे हुए हाथों से दुःशासन द्वारा खोले गए, मेरे केशपाश को बाँधिए। हंजे बुद्धिमतिके! तेरे सामने ही स्वामी ने प्रतिज्ञा की थी (कंचुकी के पास जाकर) आर्य! क्या महाराज देवकीनन्दन ने भी मेरे लिए यही सन्देश भेजा था कि– 'फिर से केशों का बन्धन किया जाए'? तब तो मेरे लिए फूल–मालाएँ लाओ, मेरा जूड़ा तो बाँध दो और भगवान् पुरुषोत्तम के वचनों को पूरा करो,

न खलु सोऽलीकं संदिशति। अथवा किं मयाऽतिसंतप्तया भणितम् अचिरगतमार्यपुत्रमनुगमिष्यामि। (युधिष्ठिरमुपगम्य) महाराज! आदीपय चिताम्। त्वमपि क्षत्रधर्ममनुवर्त्तमान एव नाथस्य जीवितहरस्याऽभिमुखो भव। अथवा यत्ते रोचते।[1]

युधिष्ठिरः– युक्तमाह पांचाली। कंचुकिन्! क्रियतामियं तपस्विनी चितासंविभागेन सह्यवेदना। ममापि सज्यं धनुरुपनय। अलमथवा धनुषा।

तस्यैव देहरुधिरोक्षितपाटलांगी
मादाय संयति गदामपविध्य चापम्।
भ्रातृप्रियेण कृतमद्य यदर्जुनेन
श्रेयो ममाऽपि हि तदेव, कृतं जयेन।।21।।

(अन्वय– तस्य एव देह–रुधिर–उक्षित–पाटलांगीम् गदाम् आदाय चापम् अपविध्य भ्रातृ–प्रियेण अर्जुनेन संयति, यत् अद्य कृतम्, तत् एव मम अपि हि श्रेयः, जयेन कृतम्।।21।।)

राक्षसः– (सविषादमात्मगतम्) कथ गच्छति? भवत्वेवं तावत्। (प्रकाशम्) राजन्! रिपुजयविमुखं ते यदि चेतस्तदा यत्र तत्र वा प्राणत्यागं कुरु, वृथा तत्र गमनम्।

कंचुकी– (सरोषम्) धिङ् मुनिजनाऽसदृशं राक्षसस्य सदृशं भवता व्याहृतम्।

राक्षसः– (सभयं स्वगतम्) किं ज्ञातोऽहमनेन! (प्रकाशम्) भोः कंचुकिन्! एतद् ब्रवीमि– तयोर्गदया खलु युद्धं प्रवृत्तमर्जुनदुर्योधनयोः। जानामि च तयोर्गदायां भुजसारम्। दुःखितस्य पुनरस्य राजर्षेरपरम–निष्टश्रवणं परिहरन्नेवं ब्रवीमि।

---

[1]. बन्धेदु णाहो दुज्जोहणरुधिला द्देण हत्थेण दुस्सासणविमुक्कं मे केसहत्थम्। हंजे बुद्धिमदिए ! तव पच्चक्खं एव्व णाहेण पडिण्णादम्। अज्ज! किं संदिट्ठं दाव मे देवेण देवकीणन्दणेण– 'पुणो वि केसबन्धनं आरम्भीअदु' त्ति? ता उवणेहि मे पुप्फदामाइं। विरएहि दाव कबरीम्। करेहि भवअदो पुरिसोत्तमस्स वअणम्। ण क्खु सो अलीअं संदिसदि। अहवा किं मए संतत्ताए भणिदम्। अचिरगदं अज्जउत्तं अणुगमिस्सम्। महाराअ! आदीवअ चिदाम्। तुमं वि खत्तधम्मं अणुबट्टन्तो एव्व णाहस्स जीविदहरस्स अहिमुहो होहि। अहवा जं दे रोअदि।

क्योंकि वास्तव में वे पुरुषोत्तम असत्य सन्देश नहीं दे सकते हैं अथवा मैंने अत्यधिक व्याकुल होकर यह क्या कह दिया? अभी–अभी स्वर्ग को गए हुए, आर्यपुत्र का मैं अनुगमन करूँगी (युधिष्ठिर के पास जाकर) महाराज! चिता जला दीजिए, आप भी क्षत्रियधर्म का पालन करते हुए, स्वामी के प्राणहर्ता का सामना कीजिए या फिर आपको जो अच्छा लगे वह कीजिए।

युधिष्ठिर– पांचाली ने ठीक ही कहा है। हे कंचुकिन्! चिता तैयार करके इस बेचारी को वेदना सहन करने योग्य बनाओ और मेरा तैयार धनुष भी ले आओ अथवा धनुष को रहने दो,

उस भीमसेन के शरीर के रुधिर से लाल हुई गदा को लेकर, धनुष–बाण का त्याग करके, भ्रातृप्रिय अर्जुन ने युद्ध में जो आज किया, वही मेरे लिए भी श्रेयष्कर है, विजय से क्या लाभ?।।21।।

राक्षस– (विषादपूर्वक मन में) क्या यह (समर भूमि में) जा रहा है? अस्तु, ऐसा ही होवे (प्रकट में) हे राजन्! शत्रु की विजय के विमुख, यदि आपका मन है, तब तो जहाँ चाहे वहाँ पर प्राणों को त्याग सकते हैं। वहाँ युद्धभूमि में जाना व्यर्थ है।

कंचुकी–(क्रोधपूर्वक) धिक्कार है। आपने तो मुनिजनों के प्रतिकूल राक्षसों के समान कह दिया है।

राक्षस– (भयपूर्वक मन में) क्या इसने मुझे पहचान लिया है? (प्रकट में) अरे कंचुकिन्! मैं तो यह कह रहा हूँ कि उन दोनों अर्जुन एवं दुर्योधन में गदायुद्ध आरम्भ हो चुका है और मैं उन दोनों के भुज बल को जानता हूँ। फिर इन राजर्षि का दूसरा अनिष्ट सुनने से बचने के लिए इसप्रकार कह रहा हूँ।

युधिष्ठिरः– (बाष्पं विसृजन्) साधु, महर्षे! साधु। सुस्निग्ध-मभिहितम्।

कंचुकी– महाराज! किं नाम शोकान्धतया देवकल्पेनाऽपि देवेन प्राकृतेनेव त्यज्यते क्षात्रधर्मः?

युधिष्ठिरः– आर्य जयन्धर!

शक्ष्यामि किं परिघपीवरबाहुदण्डौ
वित्तेशशक्रपुरदर्शितवीर्यसारौ।
भीमार्जुनौ क्षितितले प्रविचेष्टमानौ
द्रष्टुं तयोश्च निधनेन रिपुं कृतार्थम्।।22।।

(अन्वय– परिघ–पीवर–बाहु–दण्डौ, वित्तेश–शक्र–पुर–दर्शित-वीर्य–सारौ। क्षितितले प्रविचेष्टमानौ भीम–अर्जुनौ द्रष्टुम् तयोः निधनेन कृतार्थम् च रिपुम् शक्ष्यामि किम्?।।22।।)

अयि पांचालराजतनये! मद्दुर्नयप्राप्तशोच्यदशे! यथा संदीप्यते पावकस्तथा सहितावेव बन्धुजनं सम्भावयावः।

द्रौपदी– आर्य! कुरु दारुसंचयम्। प्रज्वाल्यतां चिता। त्वरते मे हृदयनाथं प्रेक्षितुम्। (सर्वतोऽवलोक्य) कथं न कोऽपि नाथेन विना महाराजस्य वचनं करोति? हा नाथ भीमसेन! तदेवेदं राजकुलं त्वया विरहितं परिजनोऽपि साम्प्रतं परिहरति।[1]

राक्षसः– सदृशमिदं भरतकुलवधूनां यत्पत्युरनुमरणम्।

युधिष्ठिरः– महर्षे! न कश्चिच्छृणोति तावदावयोर्वचनम्। तदिन्धन-प्रदानेन प्रसादः क्रियताम्।

राक्षसः– मुनिजनविरुद्धमिदम्। (स्वगतम्) पूर्णो मे मनोरथः। यावदनुपलक्षितः समीपेऽहं समिन्धयामि वह्निम्। (प्रकाशम्) राजन्! न शक्नुमो वयमवस्थातुम्। (इति निष्क्रान्तः)

---

1 . अज्ज! करेहि दारुसंचअम्। पज्जलीअदु चिदा। तुवरदि मे हिअअं णाहं पेक्खिदुम्। (सर्वतोऽवलोक्य) कहं ण को वि णाहेण विणा महाराअस्स वअणं करोदि। हा णाह भीमसेण! तं एव्व एदं राअउलं तुए विरहिदं पडिअणो वि संपदं परिहरदि।

युधिष्ठिर– (अश्रु छोड़ते हुए) धन्य हो महर्षि! धन्य हो। आपने अत्यधिक प्रिय कहा।

कंचुकी– महाराज! शोक से अन्धे होने के कारण देवता के समान आप द्वारा, सामान्य व्यक्ति के समान क्षत्रियधर्म का परित्याग किया जा रहा है।

युधिष्ठिर– आर्य जयन्धर!

लोहे के मुद्गर के समान बाहुदण्ड वाले, कुबेर एवं इन्द्र की अलकापुरी और अमरावती में अपने पौरुष का प्रदर्शन करने वाले, भूतल पर तड़पते हुए, भीम और अर्जुन को देखने की एवं उन दोनों के निधन से सफल मनोरथ वाले, मुझमें क्या शत्रु को देखने की सामर्थ्य हो सकती है?।।22।।

मेरी दुर्नीति से इस शोचनीय दशा को प्राप्त हुई! अयि, पांचालराज की पुत्रि! जैसे ही अग्नि भलीप्रकार जल उठे, वैसे ही हम दोनों को अपने प्राण देकर, बन्धुजन का सम्मान करना चाहिए।

द्रौपदी– आर्य! आप तो काष्ठ संचय कीजिए और चिता जलाइए। मेरा हृदय स्वामी को देखने के लिए शीघ्रता कर रहा है। (चारों ओर देखकर) स्वामी के बिना कोई भी महाराज के वचनों को क्यों नहीं मान रहा है? हे नाथ, भीमसेन! तुमसे विरहित उसी राजकुल को यह परिजन वर्ग भी अब छोड़ रहा है।

राक्षस– पति का अनुगमन करना ही भरतवंशियों की वधुओं के अनुकूल है।

युधिष्ठिर– हे महर्षि! हम दोनों के वचनों को कोई भी नहीं सुन रहा है। इसलिए ईंधन प्रदान करके, कृपा कीजिए।

राक्षस– यह तो मुनियों के विरुद्ध है (मन में) मेरा मनोरथ पूरा हुआ, तब तक पास में ही छिपकर मैं अग्नि को प्रज्वलित कर देता हूँ। (प्रकट में) राजन्! अब हम यहाँ पर नहीं ठहर सकते हैं।

(ऐसा कहकर निकल जाता है)

युधिष्ठिरः— कृष्णे! न कश्चिदस्मद्वचनं करोति। भवतु। स्वयमेवाऽहं दारुसंचयं कृत्वा चितामादीपयामि।

द्रौपदीः— त्वरतां त्वरतां महाराजः।[1]

(नेपथ्ये कलकलः)

द्रौपदी— (सभयमाकर्ण्य) महाराज! कस्याप्येष तेजोबलदर्पितस्य विषमः शंखनिर्घोषः श्रूयते। अपरमप्यप्रियम् श्रोतुमस्ति निर्बन्धः, ततो विलम्ब्यते।[2]

युधिष्ठिरः— न खलु विलम्ब्यते। उत्तिष्ठ।

(सर्वे परिक्रामन्ति)

संदिश्य निवर्तय परिजनम्।

द्रौपदी—महाराज! अम्बायै एवं संदेक्ष्यामि— यः स बकहिडिम्ब-किर्मीरजटासुरजरासन्धविजयमल्लोऽपि ते मध्यमपुत्रो मम हताशायाः पक्षपातेन परलोकं गतः' इति।[3]

युधिष्ठिरः— भद्रे बुद्धिमतिके! उच्यतामस्मद्वचनादम्बा—

येनासि तत्र जतुवेशमनि दीप्यमाने
उत्तारिता सह सुतैर्भुजयोर्बलेन।
तस्य प्रियस्य बलिनस्तनयस्य पाप—
माख्यामि तेऽम्ब! कथयेत्कथमीदृगन्यः।।23।।

(अन्वय— अम्ब! येन भुजयोः बलेन तत्र जतु—वेशमनि दीप्यमाने सुतैः सह उत्तारिता असि,तस्य बलिनः प्रियस्य तनयस्य पापम् आख्यामि, ते अन्यः ईदृक् कथम् कथयेत् ।।23।।)

---

[1]. तुवरदु तुवरदु महाराओ।

[2]. महाराअ! कस्स वि एसो तेजो बलदप्पि दस्स विसमो संखणिग्घोसो सुणी अदि। अवरं वि अप्पिअं सुणिदुं अत्थि णिब्बन्धो, तदो विलम्बीअदु!

[3]. महाराअ! अम्बाए एव्व सन्दिसिस्सम्— जो सो बअहिडिम्बकिम्मीर जडासुर जरासन्ध विजअमल्लो वि दे मज्झमपुत्तो मम हदासाए पक्खवादेण परलोअं गदो त्ति'।

युधिष्ठिर– हे कृष्णे! कोई भी हमारे वचनों का पालन नहीं कर रहा है। ठीक है, मैं स्वयं ही काष्ठ एकत्र करके, चिता को प्रदीप्त करता हूँ।

द्रौपदी– महाराज! शीघ्रता कीजिए, शीघ्रता कीजिए।

(नेपथ्य में कोलाहल होता है)

द्रौपदी– (भयपूर्वक सुनकर) महाराज! यह किसी बलशाली और तेजस्वी व्यक्ति का शंखनाद सुनायी दे रहा है। क्या कुछ अन्य अप्रिय सुनने की इच्छा है, जो विलम्ब किया जा रहा है।

युधिष्ठिर– निश्चय ही, विलम्ब नहीं किया जा रहा है। उठो,

(सभी घूमते हैं)

युधिष्ठिर– अयि! पांचालि! माताजी और सपत्नीजन को कुछ सन्देश देकर परिजनों को लौटा दो।

द्रौपदी– महाराज! माताजी के लिए इसप्रकार का सन्देश भेजती हूँ– 'जो वह **बक, हिडिम्ब, किर्मीर, जटासुर** एवं **जरासन्ध** पर मल्लयुद्ध में विजय प्राप्त करने वाले, आपके मध्यम पुत्र थे, मन्दभागिनी मेरे अपमान का बदला लेने के कारण परलोकगामी हो गए।

युधिष्ठिर– भद्रे! बुद्धिमतिके! हमारे वचनों के अनुसार तुम माता जी से कहना कि–

हे माते! अपने भुजबल से, जिसने वहाँ लाक्षागृह में जलाए जाने पर पुत्रों के साथ तुम्हें निकाला था, बलशाली उस प्रिय पुत्र का अमंगल मैं तुम्हें बता रहा हूँ, क्योंकि कोई दूसरा व्यक्ति इसप्रकार का अमंगल भला कैसे कह सकता है?।।23।।

शब्दार्थ– कश्चित्–कोई, करोति–करता है, भवतु–ठीक है, अच्छा, कृत्वा–करके, आदीपयामि–प्रज्वलित करता हूँ, दारु–लकड़ी, काष्ठ, संचय–एकत्र, त्वरताम्– शीघ्रता कीजिए, निर्घोषः–नाद, ध्वनि, श्रोतुम्–सुनने के लिए, निर्बन्धः–आग्रह, अभिलाषा, उत्तिष्ठ–उठो, परिक्रामन्ति–चारों ओर घूमते हैं, संदिश्य–संदेश देकर, निवर्तय–लौट जाओ।

आर्य जयन्धर! त्वमपि सहदेवसकाशं गच्छ। वक्तव्यश्च तत्रभवान्माद्रेयः कनीयान्सकलकुरुकुलकमलाऽऽकरदावानलो युधिष्ठिरः परलोकमभिप्रस्थितः प्रियानुजमप्रतिकूलं सततमाशंसनीयमसंमूढं व्यसनेऽभ्युदये च भवन्तमविरलमालिंग्य शिरसि चाघ्रायेदं प्रार्थयते–

मम हि वयसा दूरेणाऽल्पः श्रुतेन समो भवान्
सहजकृपया बुद्ध्या ज्येष्ठो मनीषितया गुरुः।
शिरसि मुकुलौ पाणी कृत्वा भवन्तमतोऽर्थये
'मयि विरलतां नेयः स्नेहः पितुर्भव वारिदः'।।24।।

(अन्वय– भवान् हि मम वयसा दूरेण अल्पः श्रुतेन समः सहज–कृपया बुद्ध्या, ज्येष्ठः मनीषितया गुरुः, अतः शिरसि मुकुले पाणी कृत्वा भवन्तम् अर्थये, 'मयि स्नेहः विरलतां नेयः, पितुः वारिदः भव'।।24।।)

अपि च– बालिशचरितस्य नित्याभिमानिनोऽश्मसदृशहृदयसारस्यापि नकुलस्य ममाज्ञया वचने स्थातव्यम्। नाऽनुगन्तव्याऽस्मद् पदवी। त्वया हि वत्स!

विस्मृत्याऽस्मांश्रुतिविशदया प्रज्ञया सानुजांश्च
पिण्डान्पाण्डोरुदकपृषतानश्रुगर्भान्प्रदातुम्।
दायादानामपि तु भवने यादवानां कुले वा,
कान्तारे वा कृतवसतिना रक्षणीयं शरीरम्।।25।।

(अन्वय– श्रुति–विशदया प्रज्ञया सानुजान् अस्मान् विस्मृत्य च पाण्डोः अश्रु–गर्भान् उदक–पृषतान् पिण्डान् प्रदातुम् दायादानाम् अपि तु भवने यादवानाम् कुले वा, कान्तारे वा कृत–वसतिना शरीरम् रक्षणीयम् ।।25।।)

गच्छ जयन्धर! अस्मच्छरीरस्पृष्टिकया शापितोऽसि– त्वयाऽकालहीनमिदमवश्यमावेदनीयम्।

द्रौपदी– हला बुद्धिमतिके? भण मम वचनेन प्रियसखीं सुभद्राम् 'वत्साया उत्तरायाश्चतुर्थो मासः प्रतिपन्नस्य गर्भस्य। त्वमेनं कुल–

आर्य जयन्धर! तुम भी सहदेव के पास जाओ और कनिष्ठ माद्री पुत्र सहदेव से कहो कि सम्पूर्ण कुरुकुलरूपी समुद्र में दावानल के समान, युधिष्ठिर परलोक को प्रस्थान कर गए हैं। उन्होंने हमेशा ही अनुकूल रहने वाले, प्रिय अनुज, प्रशंसनीय, विपत्ति एवं सम्पत्ति में कभी भी विमूढ न होने वाले, आपको प्रगाढ़ आलिंगनपूर्वक और मस्तक को सूँघकर यह प्रार्थना की है।

आप वस्तुतः आयु में मुझसे अत्यन्त छोटे, ज्ञान में बराबर, स्वाभाविक दया में और बुद्धि में बड़े और विद्वत्ता में अत्यधिक बड़े हैं। इसलिए आपसे हाथ जोड़कर प्रार्थना है कि मेरे प्रति किए गए स्नेह को विस्मृत कर देना एवं पिताजी को जलतर्पण करने वाले बनना।।24।।

और भी, बालकों जैसे चरित्र वाले, नित्य अभिमानी, पाषाण–हृदय नकुल को भी मेरी आज्ञा से इन्हीं वचनों पर स्थिर रहना चाहिए। उसे मेरे मार्ग का अनुसरण नहीं करना चाहिए।

और वत्स! तुम्हें–

शास्त्रों के अध्ययन से निर्मल बुद्धि द्वारा, अनुज सहित हमें भुलाकर, जल–बिन्दुओं से युक्त, अश्रुपूर्ण पिण्डों को पिता पाण्डु को देने के लिए, दायादों के घर में, यादवों के कुल में अथवा वन में कहीं भी तुम्हें अपने शरीर की रक्षा करनी चाहिए।।25।।

जयन्धर! जाओ। तुम्हें मेरे शरीर की सौगन्ध है, तुम्हें अविलम्ब यह बात अवश्य कहनी है।

द्रौपदी– सखी, बुद्धिमतिके! मेरे कथनानुसार प्रियसखी सुभद्रा को कहना कि–'आज वधू उत्तरा के गर्भ को चार माह हो गए हैं, इसलिए तुम कुल का नाम बनाए रखने वाले, इसकी सावधान होकर

शब्दार्थ– सकाशम्–साथ, अभ्युदये–उन्नति होने पर, आलिंग्य–आलिंगन करके, आघ्राय–सूँघकर, कृत्वा–करके, विस्मृत्य–भूलकर, प्रदातुम्–देने के लिए, रक्षणीयम्–रक्षा करनी चाहिए, गच्छ–जाओ, शापितः–सौगन्ध, शाप दिया हुआ, वा–अथवा, कान्तारे–वन में।

प्रतिष्ठापकं सावधानं रक्षेति। सर्वथा नाभिकुले तां निक्षिपसि। कदाऽपीतो लोकादगतस्य श्वशुरकुलस्याऽस्माकं च सलिलबिन्दुद भविष्यतीति।[1]

युधिष्ठिरः– (सास्रम्) भोः कष्टम्!

शाखारोधस्थगितवसुधामण्डले मण्डिताशे
पीनस्कन्धे सुसदृशमहामूलपर्यन्तबन्धे।
दग्धे दैवात्सुमहति तरौ, तस्य सूक्ष्मांकुरेऽस्मिन्
आशाबन्धं कमपि कुरुते छाययाऽर्थी जनोऽयम्।।26।।

(अन्वय– शाखा–रोध–स्थगित–वसुधा–मण्डले मण्डित–आशे पीन–स्कन्धे सुसदृश–महामूल–पर्यन्त–बन्धे सुमहति तरौ दैवात् दग्धे अयम् छायया अर्थी जनः तस्य अस्मिन् सूक्ष्मांकुरे कम् अपि आशा-बन्धम् कुरुते ।।26।।)

साधु। इदानीमध्यवसितं करणीयम्। (कंचुकिनमवलोक्य) आर्य जयन्धर! स्वशरीरेण शापितोऽसि तदाऽपि न गम्यते?

कंचुकी– (साक्रन्दम्) हा देव पाण्डो! तव सुतानामजातशत्रुभीमार्जुननकुलसहदेवानामयं दारुणः परिणामः?

हा देवि कुन्ति! भोजराजभवनपताके!

भ्रातुस्ते तनयेन शौरिगुरुणा श्यालेन गाण्डीविन–
स्तस्यैवाऽखिलधार्तराष्ट्रनलिनीव्यालोलने दन्तिनः।
आचार्येण वृकोदरस्य हलिनोन्मत्तेन मत्तेन वा
दग्धं त्वत्सुतकाननं ननु मही यस्याश्रयाच्छीतला।।27।।

(अन्वय– ते भ्रातुः तनयेन शौरि–गुरुणा गाण्डीविनः श्यालेन तस्य एव अखिल–धार्तराष्ट्र–नलिनी–व्यालोलने दन्तिनः, वृकोदरस्य आचार्येण हलिना उन्मत्तेन मत्तेन वा त्वत् सुत–काननम् दग्धम् यस्य आश्रयात् शीतला मही ननु।।27।।)

---

[1]. हला बुद्धिमदिए! भणाहि मह वअणेण पिअसहीं सुभद्दाम्– 'अज्ज वच्छाए उत्तराए चउत्थो मासो पडिवण्णस्स गब्भस्स। तुमं एव्व कुलपडिट्ठाअवं सावहाणं रक्खत्ति। सव्वथा णावि उले तं णिक्खिवसि। कदा वि इदो लोआदो गदस्स ससुरउलस्स अम्हाणं अ सलिलबिन्दुदो भविस्सदि त्ति'।

रक्षा करना। निश्चय ही, इसे तुम अपने पिता के घर पर रख देना, क्योंकि सम्भव है कि यही इस लोक से प्रस्थान किए पाण्डुवंश का तथा इन सभी को जलदान करने वाला बने।

युधिष्ठिर– (अश्रुपूर्वक) अरे! कष्ट है!

शाखाओं के विस्तार से सम्पूर्ण भूमण्डल को आच्छादित करने वाले, दिशाओं को सुशोभित करने वाले, मोटे तने से युक्त, जड़ों तक बाँधे गए, विशाल थाँवले वाले, विशाल वृक्ष के दुर्भाग्यवश नष्ट होने पर, उसके सूक्ष्म अंकुर पर, छाया चाहने वाला, यह कोई व्यक्ति विचित्र प्रकार की आशा बाँधे हुए है।।26।।

ठीक है, अब तो निश्चय को पूरा करना चाहिए। (कंचुकी को देखकर) आर्य जयन्धर! मैंने तुम्हें अपने शरीर की सौंगन्ध दी है, फिर भी तुम नहीं जा रहे हो।

कंचुकी– (क्रन्दन करते हुए) हा देव, पाण्डो! आपके युधिष्ठिर, भीम, अर्जुन, नकुल और सहदेव इन पाँचों पुत्रों का क्या यही दारुण परिणाम है?

हाय! भोजराज के भवन की पताका के समान! देवि! कुन्ति!

तुम्हारे भाई, वसुदेव के पुत्र श्रीकृष्ण के अग्रज, गाण्डीवी अर्जुन के साले, बलराम ने, उसी सम्पूर्ण धार्तराष्ट्र कुलरूपी कमलिनी को मथ डालने में हाथी के समान, वृकोदर के उन्मत्त अथवा मद से युक्त होकर, तुम्हारे पुत्ररूपी कानन को भस्म कर दिया है, जिस भीम के आश्रय से सम्पूर्ण पृथ्वी निश्चय ही, शान्त बनी हुई थी।।27।।

शब्दार्थ– लोकात्– संसार से, स्थगित–ढ़क देना, दग्धे–जलने पर, आशा-बन्धम्–आशा का बन्धन, इदानीम्–इस समय, अध्यवसितम्–निश्चय को, अवलोक्य–देखकर, तदापि–फिर भी, गम्यते–जाया जा रहा है, अजात–अनुत्पन्न, दारुणः–कठोर, श्यालेन–साले द्वारा, दन्तिनः–हाथी, हलिना–बलराम द्वारा, मही–पृथ्वी, ननु–निश्चय ही, शीतला–शान्त, उन्मत्तेन–उन्मत्त द्वारा, नलिनी–कमलिनी, व्यालोलने–मथ डालने पर।

(इति रुदन्निष्क्रान्तः)

युधिष्ठिरः— जयन्धर, जयन्धर!

(प्रविश्य)

कंचुकी— आज्ञापयतु देवः।

युधिष्ठिरः— वक्तव्यमिति ब्रवीमि, न पुनरेतावन्ति भागधेयानि नः यदि कदाचिद्विजयी स्याद्वत्सोऽर्जुनस्तद्वक्तव्योऽस्मद्वचनाद्भवता।

हली हेतुः सत्यं भवति मम वत्सस्य निधने,
तथाऽप्येष भ्राता सहजसुहृदस्ते मधुरिपोः।
अतः क्रोधः कार्यो न खलु मयि चेत्प्रेम भवतो
वनं गच्छेर्मा गाः पुनरकरुणां क्षात्रपदवीम्। ।28।।

(अन्वय— मम वत्सस्य निधने हली सत्यम् हेतुः भवति, तथा अपि एषः ते सहज—सुहृदः मधु—रिपोः भ्राता, अतः क्रोधः न खलु कार्यः, चेत् भवतः मयि प्रेम, वनम् गच्छेः पुनः अकरुणाम् क्षात्र—पदवीम् मा गाः ।।28।।)

